शिक्षामन्त्रालय भारत सरकार की आर्थिक सहायता द्वारा प्रकाशित

वीराङ्गनावैभवम्

★

म. म. पण्डितराज श्रीगोपालशास्त्रि
दर्शनकेशरि-प्रणीतम्

★

मोतीलाल बनारसीदास
दिल्ली :: पटना :: वाराणसी

शिक्षामन्त्रालय भारत सरकार की आर्थिक सहायता द्वारा प्रकाशित

श्रीमते नैष्ठिक ब्रह्मचारिणे परमगुरवे श्री लक्ष्मणाऽभिधेयाय शिवाय सादरं सश्रद्धमुपहृतम् —
श्रीगोपालशास्त्रिणा
२।५।७१ई.

वीराङ्गनावैभवम्

म. म. पण्डितराज श्रीगोपालशास्त्रि
दर्शनकेशरि-प्रणीतम्

मो ती ला ल ब ना र सी दा स
दिल्ली : वाराणसी : पटना

प्रकाशक :—
© मोतीलाल बनारसी दास
चौक, वाराणसी ।

प्रथम संस्करण—१९७०

मुद्रक :—
कौस्तुभानन्द पाण्डेय
पर्वतीय मुद्रणालय
पंचगंगा, वाराणसी-१

समर्पणम्

सिद्धिश्रीमदशेषशास्त्र-विदुषे विद्यार्णवालोडिने।
द्वैताद्वैतविमर्श - विश्वगुरवे स्वात्मासिने सर्वदा॥
शश्वच्छैवसुधाप्रवर्षणकृते वाराणसी - वासिने।
श्रीरामेश्वरझाऽभिधान-विभृतेऽप्याचार्य्यवर्य्याय वै॥ १॥
सिद्धां तां मिथिलां महीं स्वजनुषाऽलङ्कुर्वते योगिने।
पूर्णा यं समुपेत्य साऽप्यभिनवा या प्रत्यभिज्ञौत्पली॥
यस्माल्लब्धवरोऽस्मि पूर्णविभवो गोपालशास्त्री शिवः।
पूजां स्वां कृतिमर्पये स्वगुरवे 'वीराङ्गनावैभवम्'॥ २॥

तदीयस्यैव 'दर्शनकेशरिणः'
सौ० १५ ज्येष्ठे २०२७ वै

विषय-सूची

तृतीयः प्रबोधः

—:*:—

श्रीमतां स्वतन्त्रता-संग्रामे सम्मान्य-सेनानीनाम्
भूतपूर्व-बहु - प्रान्तीय - राज्यपालानाम्
प्राच्य-पाश्चात्योभय-संस्कृतिविदाम्
भारतीय-मर्यादा-प्रियाणां
श्रीश्रीप्रकाशमहोदयानां

सम्मतिः*

अद्य स्वसम्मानितमित्रेण सहयोगिना च श्री-पं० रा० गोपालशास्त्रिणा दर्शनकेशरिणा विरचितस्य 'वीराङ्गनावैभव'- नामकस्य बालकबालिकोभयपाठ्योपयोगिनः संस्कृत-चम्पूकाव्यस्य पाण्डुलिपिं वीक्ष्य परमप्रसन्नोऽहमस्मि। शास्त्रिवर्यो हि सार्वजनिककार्य्यकर्ता वयोवृद्धोऽध्यापकश्चास्ति। स्वतन्त्रतासंग्रामे तेन सह मे कारागारेऽपि समागमोऽभवत् काशीविद्यापीठे तु शिक्षणकार्य्यवशादतीव नैकटिकः सम्पर्क आसीत्। अद्यत्वे शास्त्रिवर्यः सुदूरे श्रीबदरीनाथधाम्नि पर्वतीयप्रान्ते जोशीमठे पाणिनीयपद्धतिद्वारा संस्कृतभाषाया अध्यापनकर्म्मणि व्यापृतोऽस्ति। अस्माकमध्यापकाः साम्प्रतिकाः प्रायो मौलिक-ग्रन्थं न लिखन्ति। स्वीयलम्बायमानेऽपि अवकाशे समयमेवमेव व्यर्थं यापयन्ति ममत्वितोऽपि विशेषहर्षोद्गमो भवति यच्छास्त्रिवर्येण काशीविद्यापीठपरम्परा सुरक्षितैवास्ति। यतो हि तेनापि मौलिकग्रन्थोऽयं विद्यापीठीयान्याऽध्यापकवत् संसारसमक्षे समुपस्थापितोऽभूदिति।

शास्त्रिवर्यस्य दर्शनकेशरीत्युपाधिरेव व्यनक्ति यत्तेन प्राच्यदर्शनानां विशेषरूपतोऽध्ययनं विहितमिति। परन्तु स न केवलं ग्रन्थाध्ययन एव

*हिन्दीराष्ट्रभाषामयीयं सम्मतिः संस्कृतपुस्तकमिति संस्कृतेऽनूदिताऽस्ति।

व्यापृतोऽभूत्, प्रत्युत संसारस्य गतिविधिविवेचनायामपि संलग्नोऽभवत्। स हि सामाजिक-शैक्षिक—विकाशक्रमयोः सहानुभूतिदृष्ट्या निरन्तरं निरीक्षणं कुर्वन्नभूत्। तथा प्राचीनरूढीनां शिक्षाणां च त्रुटिमपि विनैव नवीनाऽऽचारविचाराणामन्धानुकरणं दूरीकर्तुं स प्रयतमानोऽभूत्। यत्कथं हि भारतीय-समाज-शिक्षयोर्वास्तविकः सुधार उत्कर्षश्च भवितुमर्हति। यतो वयं पूर्वकालिकानुभवप्रयोगेण साम्प्रतिकसमुचिताऽचारविचाराणां च संग्रहेण स्वाभ्युदयं कर्तुं शक्नुम इति।

वीराङ्गनावैभवमिदं ग्रन्थरत्नं तस्यैव विचारविमर्शस्य सुफलम्। तेनहि शास्त्रिवर्य्येण वेदेभ्य आरभ्य रामायण-महाभारत पुराण-काव्य-शास्त्रप्रभृति-संस्कृत-वाङ्मयमहार्णव-मन्थनं विधाय तदीयनिधीनां भारतीयार्य्यनारीणां प्राक्तनादर्शमर्य्यादायाः सम्यक् संस्कृतगद्यपद्यात्मक-चम्पूकाव्यरूपेण संग्रहो विहितः। विदुषीणां वीराङ्गनानां चरित्रचित्रणेन तासां सदुपदेशेन च भारतीयसमाजस्य तदुत्तरभावि-सन्तानानाञ्च शिक्षणमुपदिष्टम्। प्राचीननवीन-विचाराणाञ्च यथोचितं सामञ्जस्यं साधितम्। कथं वयं स्वीयार्य्याङ्गनासमाजस्य वास्तविक-शिक्षाप्रदानेन सम्यगभ्युदयं कर्तुमर्हाम इति समुन्नतादर्शस्तु ग्रन्थरत्नस्यास्य प्रत्येकपृष्ठे निबद्धो दृश्यते। कीदृश्या शिक्षया वयं निजभाविसन्तानान् समाजोपयोगिनः सच्चरित्रान् सुन्दरान् सुशिक्षितान् संयमिनः सुदृढांश्च कर्तुं शक्नुम इति विशदं विवेचितं विद्यते। नारीजातेरादर्श-सतीत्वधर्मस्य दृढतैव हि भारतीय-समाजस्य शिलापृष्ठमिति हि ग्रन्थरत्नस्यास्य लक्ष्यं प्रतीयते।

ज्येष्ठभ्रातृत्वपदादहं शास्त्रिवर्य्याय धन्यवादं वितरामि यदसौ स्वतन्त्र-भारतेऽस्मिन् बालकबालिकाशिक्षाकृते संस्कृतगद्यपद्यात्मक-चम्पूकाव्यरूपमिदं ग्रन्थरत्नं भारतीयराष्ट्रस्य पुरस्तादुपहृतवान्। महता परिश्रमेण विचारविमर्शपुरस्सरमुपनिबद्धमिदं सुस्पष्टमेवोद्घोष-

यति यद्देशभक्तेर्लोकसेवायाश्च प्रेम्णा प्रेरितेनैव शास्त्रिवर्य्येण विरचितमिदं ग्रन्थरत्नमिति ।

अतो ममेयं शुभकामनाऽस्ति यद्भारतीयनरनारीसमुदाया विशेषतश्च कोमलमतयो बालक-बालिकावर्गा वर्तमान-युवकयुवतयश्चैतेन लाभान्विताः स्युरिति । प्रतिदिनं चास्योत्तरोत्तरमधिकाधिकः प्रचारः प्रसारश्च स्याद् । यतश्च सम्भाविताद् सामाजिकशैक्षिकसङ्कटात् सर्वेऽपि भारतीयाः स्वात्मरक्षां कर्तुं प्रभवेयुस्तथा वैदेशिकानां समक्षे निजराष्ट्रस्य स्वतन्त्रभारतस्य सुन्दरमादर्शं शुद्धं संस्थापयितुम्पारयेयुरित्यलम् ।

सेवाश्रम, वाराणसी
२२।२।६८

श्रीप्रकाशः ।

भूमिका

प्राप्तस्वातन्त्र्यभव्ये विविधजनयुते भारतेऽस्मिन् समन्ताद्
बालानां पाठयोग्यं नहि किमपि शिवं प्राप्यते पुस्तकं यत् ॥
तद् दृष्ट्वा खिन्नचेता अहमिदममलं चम्पुकाव्यं प्रशस्तं
श्रीशम्भोः सम्प्रसादात् सकलगुणयुतं पाठकेभ्योऽर्पयामि ॥

अद्यत्वे स्वतन्त्रेऽप्यस्मिन् भारते बालक-बालिकानां पाठयोग्यं सामाजिकं साहित्यिकं च ग्रन्थरत्नं नोपलभ्यते। इममेवाभावं दूरीकर्तुं सदिच्छया प्रेरितोऽहं श्रीबदरीनाथस्य भगवतः प्रसादात्सन्निबद्धमिदं वीराङ्गनावैभवं नाम चम्पूकाव्यं सद्ग्रन्थरत्नं पाठकानां पुरतः समुपहरामि।

यदाऽहं षट्सप्तत्युत्तरोनविंशशतवैक्रमाब्दात्पञ्चोत्तरविंशशतवैक्रमाब्दावधि काशीविद्यापीठे प्राच्यदर्शनस्य संस्कृतभाषायाश्च प्राचार्य्योऽभवम्। तदैवाऽर्द्धाङ्गिन्याः श्रीमत्या लगनादेव्या आकस्मिके स्वर्गारोहणे तद्वियोगे वियोगिनीच्छन्दसा ३२ द्वात्रिंशत् पद्यात्मकं शोकोद्गारकाव्यं[1] व्यरीरचम्। यच्च सूर्य्योदय-नाम्नि पत्रे प्रकाश्य मे पितृष्वसेयः श्रीमदवधेशद्विवेदी मह्यं समर्पयन्नुवाच।

---

१. अहहा ? किमभूदतर्कितं त्वमकाण्डे प्रविहाय मां गता।
न मया परिकल्पितं प्रिये ! द्रुतमेवं परलोकमेष्यसि ॥
'सुतयोर्न विवाहदर्शनं विधिना मे लिखितं विभाव्यताम्'।
अधुनापि दुनोति तद्वचो मम मर्माणि वदामि कम्प्रति ॥
अपि दानविधानतः कदाचिदियं लब्धसुजीवना भवेद्।
इति विप्रकुलाय यत् किमप्यददां हस्तगतं ममाऽभवत् ॥
तुलसी क्वच जाह्नवी-जलं क्व च हा ! वैतरणी-तरी च गौः।
इति वादिनि तत्र वै जने सकलं यन्त्रवदाचरं तदा ॥

"सम्प्रति स्त्रीसमाजोपयोगि ग्रन्थरत्नं सामाजिकं साहित्यिकं वा संस्कृतभाषायां हिन्दीभाषायां वा क्वापि नोपलभ्यते। संस्कृतभाषायां हितोपदेश-पञ्चतन्त्रादि-पुस्तकन्तु तादृशमश्लीलं विद्यते। यत्कन्यकानां हस्ते पठितुं दातुमेव न शक्यते। नापि केनापि पुंसा तानि तासां समक्षे पाठयितुं शक्यन्ते। एतादृशमेव बीभत्सदृश्यं तेषूपनिबद्धमस्ति। अतश्च भवताऽस्मिन् विषये कन्योपयोगि संस्कृतसाहित्यं लेखितुमवधानं देयम्।"

तस्येदं कथनं मे हृदये निगूढमासीद्। यदाऽहमिह पुण्यस्मृतेः श्री-पार्वतीदेव्यास्तपःस्थल्यां श्रीबदरीनाथधाम्नि जोशीमठे पाणिनि-पद्धतेः प्रचारबुद्धया श्रीबदरीनाथवेद-वेदाङ्गमहाविद्यालये प्रधाना-चार्यपदमङ्गीकृत्य समागमम्। तदा छात्राणां संस्कृताऽध्यापनप्रस-ङ्गतस्तदीयं कथनं पुनर्जागरितञ्जातम्। यस्य फलस्वरूपं 'नारी-जागरणं नाटकम्' 'वीराङ्गनावैभवञ्च' चम्पूकाव्यम्। इति ग्रन्थरत्न-द्वयं विरचितमभवत्।

'नारीजागरणनाटकं' तु संस्कृतभाषायां तथा हिन्दीराष्ट्रभाषा-याञ्च मुद्रितमस्ति। यस्य प्रचारः प्रसारश्च महता वेगेन बोभूयते। अस्यैव वीराङ्गनावैभवस्य चम्पूकाव्यात्मनो ग्रन्थरत्नस्य संक्षिप्तः परिचयोऽत्राधःप्रदीयते—

ग्रन्थपरिचयः

ग्रन्थस्यास्योपयोगितां तु भारतशासनस्य केन्द्रस्थानस्थदिल्लीनग-रीयशिक्षामन्त्रालयाधिकारिण एव निजव्ययेन मुद्रापणं विधाय प्रमा-

---

अधुना क्षणतः क्षणं प्रिये ! महती शोकततिर्विवर्द्धते।
न कृतं तव चिन्तितं मया कथितं ते श्रुतमेव नादरात्॥
सकलं तव चेष्टितं प्रिये प्रविचिन्त्येह मयापि शिक्षितम्।
प्रमदा पतिभक्तिशालिनी न बिभेति त्रिदशाधिपादपि॥ इत्यादि
(मुद्रितशोकोद्गारा न्नारीजागरणनाटकादुद्धृतोऽयमंशः। सम्पादकः)

णितवन्त इति नास्ति तत्रास्माकं किञ्चिद्वक्तव्यम्। भारतीयप्रान्तीय-राज्यशासकेषु शिक्षाधिकारिणां समक्षे ममैतदेव वक्तव्यं विद्यते। यत्ते स्व-स्व-प्रान्तीय-शिक्षायां ग्रन्थस्यास्य पाठ्यपुस्तकत्वेन सन्निवेशं विधाय भारतीय-संस्कृतभाषायाः भारतीयसंस्कृतेश्च प्रचारे संरक्षणे च निजकर्तव्यं पालयन्तु। इतोऽन्यत् किं तेभ्योऽपेक्ष्यते।

विषयोऽस्यायमेवास्ति-यदभिन्ननिमित्तोपादान-कारणात् शक्तिमच्छिवादेवास्य जगतः सृष्टिर्जायते। आगमिक-परिभाषया परमाद्वय चिदानन्दैकघनस्वरूपस्य महाशिवस्य शक्ति-विलास एवायं सर्गोऽभिधीयते। फलतः सृष्टौ अघटन-घटनापटीयसी शक्तिरेव प्राधान्यं बिभर्ति। तस्या एव महाशक्तेर्धारायां वर्तमानस्य स्त्रीसमाजस्याऽलौकिकं लौकिकं च यत् स्वरूपद्वयमस्ति तस्यैव द्विविधस्य चरित्रं वेदादारभ्य सर्व-संस्कृत-वाङ्मयेषु काव्यपुराणादिषु च यत्र तत्र विस्तृतं विद्यते। तस्यैकत्र संग्रहं सुविहितक्रमं सरलमसृणमञ्जुलसंस्कृतभाषया निबध्य साम्प्रतिकसंस्कृताध्यायिवर्ग-समक्षे संस्थापनम् इति।

तत्र सन्ति चत्वारः प्रबोधाः। प्रथमे प्रबोधे-मङ्गलाचरणादारभ्य ग्रन्थप्रणयननिदान-ग्रन्थकर्तृ-चिन्तार्य्यनारीगुणकीर्तनविश्वेश्वरीस्तुति-प्रभृतिविज्ञानकलाप्रहितविषयाणां विवेचनेन सह भारतीयार्य्यनारीसम्बन्धे वैदेशिकानां विदुषां विविधा हार्दिकोद्गाराः सन्ति। द्वितीयप्रबोधे-महामायात्रिविध-चरितचित्रणादारभ्यालौकिक-दिव्यसतीनारीचरित्रचित्रणम्। तृतीयप्रबोधे-मन्त्रिसुताया विषयाकुमार्य्याः चरितादारभ्य पद्मिनीप्रभृति-लौकिकनारीणां चरित्रचित्रणम्। चतुर्थ-प्रबोधे ग्रामीणकन्यका-क्षेत्रगोपिका प्रभृति-साहसिकदिव्यविभूतीनां चरित्रचित्रणेन सह क्रान्तिकारिणीनां कुमारीणां वधूटीनां च गोरण्डशासनाद्भारतोद्धारे स्वात्मसमर्पणम् निर्दिष्टम्। अन्ते च स्त्री-धर्मप्रश्नोत्तरीरूपत आर्य्यमहिलानां कर्तव्यनिर्देशोऽस्ति मनाक्।

इत्येवमत्युपयोगिनोऽस्य ग्रन्थस्य प्रकाशनं संस्कृतसाहित्यस्य प्रचारे प्रसारे च बद्धपरिकरैः परमप्रसिद्ध-प्रकाशकैः श्रीमोतीलाल बनारसी-

दास नामक-प्रकाशनाधिकारिभिः क्रियत इत्ययमपि स्वर्णसुगन्धसुयोग एवास्ति। मुद्रकोऽपि कौस्तुभानन्द पाण्डेयः सर्वाङ्गसुसज्जितम् मुद्रापयतीति मे धन्यवादपात्रम् इदं प्रकाशक-मुद्रकसज्जन-द्वयम्।

उपसंहारे प्रत्यभिज्ञाशास्त्रस्याद्वितीया विद्वांसः पूर्णप्रत्यभिज्ञाख्य-ग्रन्थलेखकाः शब्दशास्त्रस्य पाणिनीयपद्धतेर्मर्मज्ञाः पदवाक्य-प्रमाण-पारावारीणाः शिवस्वरूपा मे गुरुवर्या आचार्य्य-श्रीरामेश्वरझामहोदयाः कृतज्ञता-प्रकाशविषयाः। यैर्ग्रन्थरत्नस्यास्य स्वनाम्नि समर्पणमङ्गीकृतम्।

सर्वान्ते भारतशासनस्य शिक्षामन्त्रणालयविशिष्ट-संस्कृत-विभागाधिकारिभ्यो धन्यवादं वितीर्य कृत्यमिदमवसीयेत। येषां द्रव्यसाहाय्यप्रदानेनेदं ग्रन्थरत्नं सर्वसमक्ष समुपस्थितमित्यलम्।

डी० ५१।३१ सीगरा,
वाराणसी–२
सौ० १५ ज्येष्ठ २०२७ वै०।

श्री गोपालशास्त्री (दर्शनकेशरी)
श्री काशीपण्डितसभाध्यक्षः

शिक्षामन्त्रालय भारत सरकार की आर्थिक सहायता द्वारा प्रकाशित

वीराङ्गनावैभवम्

म. म. पण्डितराज श्रीगोपालशास्त्रि
दर्शनकेशरि-प्रणीतम्

मोतीलाल बनारसीदास
दिल्ली : वाराणसी : पटना

प्रकाशक :—
© मोतीलाल बनारसी दास
चौक, वाराणसी ।

प्रथम संस्करण—१९७०

मुद्रक :—
कौस्तुभानन्द पाण्डेय
पर्वतीय मुद्रणालय
पंचगंगा, वाराणसी-१

समर्पणम्

सिद्धिश्रीमदशेषशास्त्र-विदुषे विद्यार्णवालोडिने ।
द्वैताद्वैतविमर्श - विश्वगुरवे स्वात्मासिने सर्वदा ॥
शश्वच्छैवसुधाप्रवर्षणकृते वाराणसी - वासिने ।
श्रीरामेश्वरझाऽभिधान-विभृतेऽप्याचार्य्यवर्य्याय वै ॥ १ ॥
सिद्धां तां मिथिलां महीं स्वजनुषाऽलङ्कुर्वते योगिने ।
पूर्णा यं समुपेत्य साऽप्यभिनवा या प्रत्यभिज्ञौत्पली ॥
यस्माल्लब्धवरोऽस्मि पूर्णविभवो गोपालशास्त्री शिवः ।
पूजां स्वां कृतिमर्पये स्वगुरवे 'वीराङ्गनावैभवम्' ॥ २ ॥

तदीयस्यैव 'दर्शनकेशरिणः'
सौ० १५ ज्येष्ठे २०२७ वै

विषय-सूची

तृतीयः प्रबोधः

—:*:—

॥ श्रीकृष्णः शरणं मम ॥

[1] वीराङ्गनावैभवम्

प्रथमः प्रबोधः

मङ्गलाचरणम्

गिरिजनि गिरिशौ तौ स्वर्च्य[2] गोपालशास्त्री,
द्रुतमिह सुरभाषोन्नीति-कामः समन्तात् ।
उपहरति बटुभ्यः पुस्तकं पाठयोग्यम्,
प्रसरतु भुवि नित्यं श्रीमहेशप्रसादात् ॥ १ ॥

पुस्तकप्रणयन-निदानम्

न पुस्तकं किञ्चिदिहोपलभ्यते,
[3] स्वधीति-योग्यं [4] परिशीलनार्थिभिः ।
[5] विचित्य यत्नेन परिष्कृतं मया,
पठन्त्विदं [6] बालक-बालिका मुदा ॥ २ ॥

१—वीराश्च ता अङ्गना वीराङ्गनाः तासां वैभवम् इति। २—सु सम्यक् अर्चित्वा इति विग्रहे 'कुगतिप्रादयः २।२।१८' इति समासे 'समासेऽनञ्-पूर्वे क्त्वो ल्यप् ७।१।३७' इति ल्यपि अनुबन्धलोपे स्वर्च्य। ३—सु शोभना अधीतिः स्वधीतिः तस्या योग्यं स्वधीति-योग्यम्। ४—परितः शीलनं परिशीलनम् तस्य अर्थिन्यः, परिशीलनार्थिन्यश्च परिशीलनार्थिनश्चेति 'पुमान् स्त्रिया १।२।६७' इति पुँल्लिङ्गशेषे परिशीलनार्थिभिः अध्ययनशीलाभिः कन्याभिः अध्ययनशीलैश्छात्रैश्चेत्यर्थः। ५—यत्नेन विचित्य चिञ् चयने, क्त्वा, ल्यप्, तुकि विचित्य संगृह्य परिष्कृतम् संशोधितं सम्पादितम् इदं पुस्तकमित्यर्थः। ६—बालकाश्च बालिकाश्चेति 'चार्थे द्वन्द्वः २।२।२९' इति इतरेतर-द्वन्द्वः। 'पुमान् स्त्रिया १।२।६७' इत्येकशेषस्तु न कृतः स्पष्टार्थताविनाशभिया।

ग्रन्थकर्तुश्चिन्ता

नारीमहत्त्वमिह [१]भारतरत्नदुर्गे,
[२]सङ्गोपितं [३]प्रहरिभिर्मुनिभिः प्रयत्नात् ।
[४]पाश्चात्य-नीति-निहताः किल भारतीया,
हा साम्प्रतं [५]तदपवाहयितुं प्रवृत्ताः ॥ ३ ॥

वेदेषु शास्त्रेषु च यत्र तत्र,
नारी-महत्त्वं निहितं मुनीन्द्रैः ।
सर्वं तदाहृत्य मया प्रयत्ना-
न्निवेशितं वै प्रथमे प्रबोधे ॥ ४ ॥

१—भारतस्य रत्नानि, तेषां दुर्गं तस्मिन् । २—संगोपितम् = संरक्षितम् । ३—प्रहरिभिः रक्षकैः । ४—पाश्चात्यानां पाश्चात्य-देशस्थ-गोरण्डशासकानां मेकालेप्रभृतीनां या नीतिः = कूटनयः—"इमे भारतीया इंग्लिश-भाषामधीत्य-सदैवास्माकं दासा देहेन भारतीया विचारेण कर्मणा च गोरण्डीया भविष्यन्ति" इति, तया निहता विहताः । ५—तन्नारीमहत्त्वम् = आर्य्यमहिला-गौरवम् अपवाहयितुं = दूरीकर्तुं प्रवृत्ताः = प्रवर्तमानाः सन्ति । 'आदिकर्मणि-क्तः कर्त्तरि ३।४।७२' इति क्तः (भारतीयनारीणां सर्वथा भारतीय-मर्य्यादा-विलोपकात् अस्मात्, (नेत्रे निमील्य पाश्चात्यसंस्कृतेरन्धानुकरणात्,) कथं मुक्तिः स्यादिति चिन्ता ग्रन्थप्रणेतुरस्तीति हेतुरस्य ग्रन्थस्य निर्माणे । यद्यपि मेकाले-प्रभृतीनां भारते निजशासनस्य स्थिरतायै अपि इंग्लिशभाषायाः प्रयोग आसीत् । स प्रयोगस्तु विपरीतो भूत्वा तेषां शासनमुन्मूलयामास । यत्सम्बन्धे मयैवोक्तम् कांग्रेसान्दोलनकाले—

मेकालया वृटिशराज्य-दृढ़ीकृते या,
पाश्चात्य-शिक्षणसृतिर्निहिता छलेन ।
सैवाधुना तदपघातपरा प्रवृत्ता
हेतुः कुभावजनितोऽङ्गति वैपरीत्यम् ॥ इति ।

आर्य्यनारी-गुणाः

सम्मार्ज्य सद्म नियमात्प्रतिसंस्करोति,
संस्कृत्य पात्रमपि भोजयति प्रहर्षात् ।
गो-सेवया दधि-पयो-घृतममृतं या,
सर्वान् प्रपाययति [1]भारत आर्य्यनारी ॥ १ ॥

आय-व्ययं लिखति धर्म-कथां शृणोति,
संसेवया [2]श्वशुरयोः सुकृतं चिनोति ।
पत्युः [3]प्रसादमधिगत्य सुतान् प्रसूते,
योग्यान् विधापयति भारत आर्य्यनारी ॥ २ ॥

सांख्य[4]प्रकृत्यनुरता पुरुषाश्रयेण,
त्यागोपदेशजनिका जनशिक्षिका सा ।
संवर्द्धयत्यविरतं निजसंस्कृतिं या,
धन्या सदा जयति भारत आर्य्यनारी ॥ ३ ॥

१—भारते+आर्य्यनारी । 'अत्र एचोऽयवायावः ६।१।७८' इति अयादेशे 'लोपः शाकल्यस्य ८।३।१' इति त्रिपादी-सूत्रबलाद् यलोपासिद्धया गुणाप्रवृत्तौ भारत आर्य्यनारीति रूपम् । २—श्वशुरश्च श्वश्रूश्च श्वशुरौ तयोः, अत्र 'श्वशुरः श्वश्र्वा १।२।७२' इत्येकशेषे रूपम् । ३—प्रसादम्=प्रसन्नताम् । 'आनन्दाद्ध्येव खलु इमानि भूतानि जायन्ते०' इत्यादि (श्रुतिः) । अधिगत्य=प्राप्य गर्भाधानेन सुतान्=सुताश्च (पुत्र्यः) सुताश्च (पुत्राः) सुताः, तान् सुतान्=पुत्रीः पुत्रान् 'पुमान्स्त्रिया १।२।६७' इत्येक-शेषः । प्रसूते=जनयति । इति । तान् सुतान् योग्यान् विधापयति कारयति शिक्षाप्रदानेनेत्यर्थः । ४—सांख्यस्य सांख्य-शास्त्रस्य प्रकृतिः सत्वरजतस्तमसां साम्यावस्था तद्वत् अनुरता अनुरक्ता रागवती पुरुषस्य सांख्यशास्त्रोक्तस्य । पक्षे भर्तुराश्रयेण सेवया त्यागस्य दानादिना त्याग-भावस्य उपदेशः तस्य जनिका जनयित्री । यथा सांख्य-शास्त्रे प्रकृतिः विनैव स्वार्थं पुरुषस्य भोगापवर्गार्थं प्रवर्तते । तथैव आर्य्यनारी विनैव स्वार्थं स्वकर्तव्यबुद्ध्या गृहकर्मणि व्यापृता तिष्ठति । इत्थं जनशिक्षां ददाति । यत्

विश्वेश्वरी-स्तुतिः

देवि [१]प्रपन्नार्तिहरे ! प्रसीद,
प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि ! पाहि विश्वं,
त्वमीश्वरी देवि ! चराचरस्य ॥ १ ॥
आधारभूता जगतस्त्वमेका,
महीस्वरूपेण यतः स्थिताऽसि ।
अपां स्वरूपस्थितया त्वयैतद्,
आप्यायते कृत्स्नमलङ्घ्य[२]वीर्य्ये ! ॥ २ ॥
त्वं वैष्णवी शक्तिरनन्तवीर्य्या,
विश्वस्य बीजं परमाऽसि माया ।

सर्वैः स्वार्थं विहाय परोपकारः कार्य्यः । इति निज-संस्कृतिं भारतीयार्य्य-मर्य्यादाम् । अत्र हिन्दी-कवितापि समास्ति सर्वत्र प्रचलिता—

"झारि वो बुहारि नित्य घरको सजाती वही
पात्र माँजि कूटि पीसि भोजन जिमाती है ।
गाय भैंस सेवा करि दूध दही माखन काढि
बाल वो गोपालनको अमृत पिलाती है ।
आय-व्यय लेखा लिखि कथा वो पुराण सुनि,
शास-श्वसुर-सेवा करि धर्म सिखलाती है ।
करिके शृङ्गार पति-प्रेम-सङ्ग सन्तति पाय
वंश-वृद्धि करती उन्हें योग्यतम बनाती है ।
"केशरी" कहत सांख्य-प्रकृति सम त्याग-भरा
जीवन बिताती धन्य भारतकी नारी है ।"

१—प्रपन्नानां आर्तिः पीडा तस्या हरा (हरतीतिविग्रहे आर्षोऽयं प्रयोगः । अथवा 'ऋदोरप् ३।३।५७' इति बाहुलकात् कर्तरि अप् प्रत्ययः ततः टाप् ।) तत्सम्बुद्धौ प्रपन्नार्तिहरे ! २—अलङ्घ्यं वीर्य्यं=पराक्रमः यस्याः सा तत्सम्बुद्धौ अलङ्घ्यवीर्ये !

सम्मोहितं देवि ! समस्तमेतत्,
त्वं वै प्रसन्ना भुवि मुक्ति-हेतुः ॥ ३ ॥
विद्याः समस्तास्तव देवि ! भेदाः,
स्त्रियः समस्ताः सकला जगत्सु ।
त्वयैकया पूरितमम्बयैतत्,
का ते स्तुतिः [1]स्तव्य-पराऽपरोक्तिः ॥ ४ ॥

विश्वेश्वरि ! त्वं परिपासि विश्वं
विश्वात्मिका धारयसीति विश्वम् ।
विश्वेश-वन्द्या भवती, भवन्ति
विश्वाश्रया ये त्वयि भक्तिनम्राः ॥ ५ ॥

[2]मातृ-स्तुतिः

पितुरभ्यधिका माता गर्भ-[3]धारणपोषणात् ।
अतो हि त्रिषु लोकेषु नास्ति मातृ-समो गुरुः ॥ १ ॥
नास्ति गङ्गासमं तीर्थं नास्ति विष्णु-समः सुरः ।
नास्ति शम्भु-समः पूज्यो नास्ति मातृ-समो गुरुः ॥ २ ॥
नास्ति चैकादशी-तुल्यं व्रतं त्रैलोक्यविश्रुतम् ।
तपो नाऽनशनात्तुल्यं नास्ति मातृ-समो गुरुः ॥ ३ ॥
नास्ति भार्या-समं मित्रं नास्ति पुत्र-समः प्रियः ।
नास्ति स्वसृ-समा मान्या नास्ति मातृ-समो गुरुः ॥ ४ ॥
न जामातृ-समं पात्रं न दानं कन्यया समम् ।
न च भ्रातृ-समो बन्धुर्न च मातृ-समो गुरुः ॥ ५ ॥

१—स्तव्येषु स्तवनीयेषु परा श्रेष्ठा अपरा अन्या उक्तिः=कथनम् । २—गङ्गादीनां तीर्थव्रतदेवादीनां श्रेष्ठत्वविधानेन सह मातुर्महिमप्रख्यापनमस्याः स्तुतेः प्रयोजनम् । ३—धारणञ्च पोषणं च तयोः समाहारः= धारणपोषणम् । गर्भस्य धारणपोषणम्=गर्भधारणपोषणम् तस्मात् ।

देशो [1]गङ्गान्तिमः श्रेष्ठो दलेषु तुलसीदलम् ।
वर्णेषु ब्राह्मणः श्रेष्ठो गुरुर्माता गुरुष्वपि ॥ ६ ॥
मातरं पितरञ्चोभौ दृष्ट्वा पुत्रस्तु धर्मवित् ।
प्रणम्य मातरं पश्चात्प्रणमेत्पितरं गुरुम् ॥ ७ ॥
आराधनीया परमा दया शान्तिः क्षमा धृतिः ।
स्वाहा स्वधा च गौरी च पद्मा च विजया जया ॥ ८ ॥
दुःख-हन्त्री च नामानि श्रीमातुरेकविंशतिम् ।
शृणुयाच्छ्रावयेन्मर्त्यः सर्वदुःखैः प्रमुच्यते ॥ ९ ॥
दुःखैर्महद्भिर्दूनोऽपि दृष्ट्वा मातरमीश्वरीम् ।
यमानन्दं लभेन्मर्त्यः स किं वाचोपपाद्यते ॥ १० ॥
इति ते कथितं विप्र ! मातुः स्तोत्रं महागुणम् ।
निजपितृ-मुखात्पूर्वमश्रौषं मातृ-संस्तवम् ॥ ११ ॥
सेवित्वा पितरौ कश्चिद् व्याधः परमधार्मिकः ।
लेभे सर्वज्ञतां सा हि सेवनीया तपस्विभिः ॥ १२ ॥
तस्मात्सर्वप्रयत्नेन भक्तिः कार्य्या तु मातरि ।
पितर्य्यपि तु सोक्ता वै [2]पित्रा शक्तिसुतेन मे ॥ १३ ॥
(बृहद्धर्मपुराणे पूर्वखण्डे अ० २ श्लो० ३४—४७)

[3]सती-महिमा

अनु-व्रजन्ती भर्तारं सती [4]पितृ-वनं मुदा ।
पदे पदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयम् ॥ १ ॥

१—गङ्गाया अन्तिमः समीपस्थो गङ्गान्तिमः । २—शक्तिसुतेन=पराशरेण "व्यासं वशिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् । पराशरात्मजं वन्दे शुकतातं तपोनिधिम्" । इति व्यासदेवोऽस्याः स्तुतेः कर्तेति तस्यैव पिता शक्तिसुतः पराशरः । ३—सती-महिमानं वर्णयन् सती-कृतं पत्युद्धारं पत्ये स्वर्ग-सुखप्रदानं पितृ-मातृ-कुलोद्धारादिकं सर्वमाख्याति । ४—पितॄणां वनम्—पितृवनं श्मशानम् ।

व्यालग्राही यथा व्यालं बलादुद्धरते विलात् ।
एवं व्युत्क्रम्य[1] दूतेभ्यः पतिं स्वर्गं व्रजेत् सती ॥ २ ॥
कम्पन्ते सर्वतेजांसि दृष्ट्वा पातिव्रतं महः ।
यावत्स्वलोम-संख्यास्ति तावत्कोट्यगुतानि वै ॥ ३ ॥
भर्त्रा स्वर्ग-सुखं भुंक्ते रममाणा पतिव्रता ।
धन्या सा जननी लोके धन्योऽसौ जनकः पुनः ॥ ४ ॥
धन्यः स च पतिः श्रीमान् येषां गेहे पतिव्रता ।
पितृवंश्या मातृवंश्याः पतिवंश्यास्त्रयस्त्रयः ॥ ५ ॥
पतिव्रतायाः पुण्येन स्वर्ग-सौख्यानि भुञ्जते ।
पतिव्रतायाश्चरणो यत्र यत्र स्पृशेद् भुवम् ॥ ६ ॥
तां तीर्थभूमिं मन्येऽहं नास्ति [2]भारो भुवः क्वचित् ।
बिभ्यत्पतिव्रतास्पर्शं कुरुते भानुमानपि ॥ ७ ॥
आपः पतिव्रतास्पर्शमभिलष्यन्ति सर्वदा ।
गृहे गृहे न किन्नार्य्यो रूपलावण्यगर्विताः ॥ ८ ॥
परं विश्वेशभक्त्यैव लभ्यते स्त्री पतिव्रता ।
भार्य्या मूलं त्रिवर्गस्य भार्य्या मूलं सुखस्य च ॥ ९ ॥
[3]भार्य्या धर्मफलायैव भार्य्या सन्तानवृद्धये ।
गृहस्थः स हि विज्ञेयो गृहे यस्य पतिव्रता ॥ १० ॥
यथा गङ्गावगाहेन शरीरं पावनं भवेत् ।
तथा पतिव्रतां लब्ध्वा सदनं पावनं नृणाम् ॥ ११ ॥

सती-स्तुतिः

पुरुषाणां सहस्राणि सती स्त्री सा समुद्धरेत् ।
नास्ति तेषां कर्मभोगः सतीनां व्रततेजसा ॥ १ ॥

१—दूतेभ्यः यमदूतेभ्यः पतिं व्युत्क्रम्य आच्छिद्य तमादाय स्वर्गलोकं व्रजेत् गच्छेत् । २—पतिव्रता चरण-पातेनैव भुवः पृथिव्याः क्वचिद् कुत्रापि भारः अन्यजनचरणपातभारो नास्ति न भवतीत्यर्थः । ३—भार्य्या धर्म्म-फलाय एव भवति नतु कामभोगायेति भावः ।

पतिः पतिव्रतायाः संमुच्यते सर्वपातकात् ।
तया सार्द्धं स निष्कर्मा मोदते हरिमन्दिरे ॥ २ ॥

पृथिव्यां यानि तीर्थानि सतीपादेषु तानि वै ।
तेजश्च सर्व-देवानां मुनीनाञ्च सतीषु तत् ॥ ३ ॥

तपस्विनां तपः सर्वं व्रतिनां यत् फलं व्रते ।
दाने फलञ्च दातॄणां तत्सर्वं तासु [1]सन्ततम् ॥ ४ ॥

स्वयं नारायणः शम्भुर्विधाता जगतामपि ।
सुराः सर्वे च मुनयो भीतास्ताभ्यः सदैव हि ॥ ५ ॥

सतीनां पादरजसा सदा पूता वसुन्धरा ।
पतिव्रतां नमस्कृत्य मुच्यते पातकान्नरः ॥ ६ ॥

त्रैलोक्यं भस्मसात् कर्तुं क्षणेनैव पतिव्रता ।
स्वतेजसा समर्था सा महापुण्यवती सदा ॥ ७ ॥

सतीनाञ्च पतिः [2]साध्वी-पुत्रो [3]निःशङ्क एव च ।
न च तस्य भयं किञ्चिद्देवेभ्यश्च यमादपि ॥ ८ ॥

महिला-महिमा

श्रुतं दृष्टं स्पृष्टं स्मृतमपि नृणां ह्लादजनकम्,
न रत्नं लोकेऽस्मिन् क्वचिदपि कृतं लोक-पतिना ।
यदर्थं धर्मार्थौ [4]सुत-सदन-सौख्यानि च यतो,
गृहे लक्ष्म्यो मान्याः सततमबला मानविभवैः ॥ १ ॥

ये त्वङ्गनानां प्रवदन्ति दोषान्,
वैराग्यमार्गेण गुणान् विहाय ।

१—सन्ततम्=व्याप्तम् २—साध्व्याः पुत्रः सतीपुत्र इत्यर्थः । ३—निर्गता शङ्का यस्मात् स निःशङ्कः । 'अनेकमन्यपदार्थे २।२।२४' इति समासे प्रातिपदिकत्वात् सुपो लुकि 'गोस्त्रियोरुपसर्जनस्य १।२।४८' इति शङ्काऽऽकारस्य ह्रस्वे निःशङ्कः । ४—सुताश्च सदनानि च सौख्यानि चेति द्वन्द्वः ।

ते दुर्जना मे मनसो वितर्काः,
[१]सद्भाववाक्यानि न तानि तेषाम् ॥ २ ॥

ब्राह्मणाः पादतो मेध्या गावो मेध्यास्तु पृष्ठतः ।
अजाश्वा मुखतो मेध्याः स्त्रियो मेध्यास्तु सर्वतः ॥ ३ ॥

जाया वा स्याज्जनित्री वा [२]सम्भवः स्त्रीकृतो नृणाम् ।
हे कृतघ्नाः ! तयोर्निन्दां कुर्वतां वः कुतः शुभम् ॥ ४ ॥

पतिस्तवः

नमः कान्ताय भर्त्रे वै [३]शिवचन्द्र-स्वरूपिणे ।
नमः शान्ताय दान्ताय [४]सर्वदेवाश्रयाय च ॥ १ ॥
नमो ब्रह्म-स्वरूपाय सतीप्राणपराय च ।
[५]नमस्याय च पूज्याय हृदि धार्य्याय ते नमः ॥ २ ॥
[६]पञ्चप्राणाधिदैवाय चक्षुषो[७]स्तारकाय च ।
ज्ञानाधाराय पत्नीनां परमानन्ददायिने ॥ ३ ॥
पतिर्ब्रह्मा पतिर्विष्णुः पतिर्देवो महेश्वरः ।
पतिश्च निर्गुणं ब्रह्म तस्मै ते प्रभवे नमः ॥ ४ ॥
क्षमस्व भगवन् दोषं ज्ञानाज्ञानकृतं च यत् ।
पत्नीबन्धो ! दयासिन्धो ! दासीदोषं क्षमस्व मे ॥ ५ ॥

१—सतां भावः=सद्भावः तस्य वाक्यानि सद्भाववाक्यानि=सज्जनतासूचकवाक्यानि । २—सम्भवः=जन्म स्त्रीभिः कृतः स्त्रीकृतः । ३–पद्मप्रभृतिसर्वनारीभिः तद्रूपाय कृतः स्तवोऽयं संगृहीत आर्य्यमर्यादासूचकः । ४–सर्वदैव सदाकालेष्वेव आश्रयाय सेव्याय । ५–नमस्कर्तुं योग्याय अयं शब्दः 'नमोवरिवश्चित्रङः क्यच् ३।१।१९' इति नमस्शब्दात् क्यचि नमस्य धातोः 'अचो यत् ३।१।९७' इति यति 'अतो लोपः ६।४।४८' इति अकार-लोपे साधुः । ६—पञ्च च ते प्राणाः पञ्चप्राणा तेषाम् अधिदेवः तस्मै । ७—तारकाय=कनीनिकारूपाय यथा चक्षुष्कनीनिका सर्वैरपेक्ष्यते तथा रक्षणीयायेत्यर्थः ।

इदं स्तोत्रं महापुण्यं सृष्ट्यादौ ब्रह्मया कृतम् ।
सरस्वत्या च सत्या च धरया गङ्गया कृतम् ॥ ६ ॥
मुनीनां च सुराणां च पत्नीभिश्च पुरा कृतम् ।
पतिव्रतानां सर्वासां स्तोत्रमेतच्छुभावहम् ॥ ७ ॥
पतिस्तोत्रं समुच्चार्य्य सर्वतीर्थफलं लभेत् ।
कन्या नारी पुमान् वापि सर्वपापैः प्रमुच्यते ॥ ८ ॥

महिलामहिमोद्वलकोद्वाहमन्त्राः

"ॐ [१]सुमङ्गलीरियं वधूरिमां समेत पश्यत सौभाग्यमस्यै दत्त्वा [२]याथास्तं विपरेत न"।

विवाहे सिन्दूरदानमन्त्रोऽयम् । एतेनैव मन्त्रेण वरः कन्यादक्षिण-भागे भूत्वोत्थाय पूर्वाभिमुखीमुपविष्टां तां सीमन्तप्रदेशे सिन्दूरेण विभूषयति । पाणिग्रहणमन्त्रस्तु इतः पूर्वमेवायाति सोऽप्यत्र दीयते तथाहि—

"ॐ [३]गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या [४]जरदष्टिर्यथाऽस । भगोऽर्य्यमा सविता [५]पुरन्धिर्मह्यं [६]त्वाऽदुर्गार्हपत्याय देवाः ।" इति ।

विवाहे अनेनैव मन्त्रेण वरो लाजाहोमानन्तरं कन्याकरं दक्षिणं साङ्गुष्ठमुत्तानं गृह्णाति । इतः परम् अश्मारोहणमन्त्रः—

१—वरः सिन्दूर-दानावसरे—इयं वधूः सुमङ्गलीः । हे देवाः ! सम् सम्यक् एत आगच्छत इत्यादि वक्ति । अत्र सुमङ्गलीरिति विसर्गः छान्दसः । २—अस्तं गृहं याथ यात लोडर्थे लट् । न विपरेत विरुद्धा भूत्वा परावृत्ता न भवत । विपरेत्युपसर्ग-द्वय-युक्तस्येणो लोटि मध्यम-पुरुष-बहुवचन-रूपम् । ३—गृभ्णामि गृह्णामि । "हृग्रहोर्भः छन्दसि" इति भकारः । ४—जरन्ती अष्टिर्यस्याः सा जरदष्टिः जरच्छरीरा बहुवर्षाऽयुष्मती आस=भवसि इत्यर्थो निपातोऽयम् 'आस' इति । ५—पुरन्धिः=(गृहस्वामिनी रूपा) । ६—देवाः त्वाम् अदुः ददुः ।

"ॐ आरोहेममश्मानमश्मेव त्वं स्थिरा भव [1]अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायतः।"

अनेन मन्त्रेण वरो वध्वा दक्षिणं पादं स्वदक्षिणहस्तेन गृहीत्वा अग्नेरुत्तरतः स्थितेऽश्मनि निःसङ्कोचं स्थापयति। अथर्वणि मन्त्रोऽयमधस्तनोऽस्ति येन नारी-सम्मानं सूच्यते। तथाहि—

"[2]सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव। सम्राज्ञी अधिदेवृषु ननान्दरि सम्राज्ञी भव" इति।

दम्पत्योरभेदः

"[3]मम व्रते ते हृदयं दधामि मम चित्त[4]मनुचित्तं तेऽस्तु। मम [5]वाचमेकमना [6]जुषस्व [7]प्रजापतिष्ट्वा नियुनक्तु मह्यम्।"

वरो वध्वा दक्षिणांसस्योपरि स्वदक्षिणहस्तं नीत्वा तस्य हृदयम् आलभते—एतस्यैव तु मन्त्रस्याभिप्रायं मनुमहाराजोऽधो वक्ति—

अन्योऽन्यस्याव्यभीचारो भवेदामरणान्तिकः।
एष धर्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः॥ (मनु० ९।१०१)

१—पृतनाम्—संग्रामम् इच्छन्ति इति पृतन्यन्ति। इति क्यजन्तपृतन्यधातोः शतरि पृतन्यत् शब्दस्य शसि पृतन्यतः संग्रामेच्छून् अभितिष्ठ आक्रम पृतनाभिः यतन्ते योद्धुम् इति पृतनायन्तः तान् पृतनायतः पृतनाभिः योद्धुम यत्नपरान् अवबाधस्व भग्नोद्यमान् कुरु। इति इत्थं हि नारीणां सैन्य-शिक्षामपि सूचयति मन्त्रोऽयम्। तत्र क्षत्रियवर्ण-कन्याया एव कृते तज्ज्ञेयं नहि सर्वासां कृते इति विमर्शः। २—अथर्वमन्त्रस्तु श्वशुरादिष्वेव नारीणां साम्राज्यमिच्छति तदपि च बुद्धिबलेन सेवाबलेनैव नतु सैन्यबलेनेतिकन्याभिर्विमर्शनीयम। ३—व्रते नियमादौ। ४—योऽपि मे संकल्पः स्यात् स एव तवापि स्यादित्यर्थः। ५—एकं मनो यस्याः सा एकमनाः। ६—जुषस्व=सेवस्व। ७—प्रजापतिः त्वा त्वाम् मह्यं नियुनक्तु। मम सर्वथाऽभ्युदयार्थं नियुनक्तु। यदि अहं भ्रमाद् बुद्धि-लाघवाद्वाऽन्यथा कर्म कर्तुं प्रवृत्तः स्याम् तदा त्वं हितोपदेशं कृत्वा शुभमार्गं नियुंग्धि इत्याद्यर्थो ऊह्यः।

इत्थं हि भारतीयमर्य्यादा दम्पत्योरभेदं साधयति। इति विमर्शनीयं पाश्चात्य-नीतिमनुकुर्वन्तीभिः ।

शकुन्तलां प्रति कण्वोपदेशः

शुश्रूषस्व [1]गुरून् कुरु प्रिय-सखी-वृत्तिं [2]सपत्नीजने,
भर्तु[3]र्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने [4]भोगेष्वनुत्सेकिनी,
यान्त्येवं गृहिणी-पदं युवतयो वामाः कुलस्या[5]धयः ।। १ ।।

अपरञ्च—

भूत्वा चिराय [6]सदिगन्त-मही-सपत्नी,
दौष्यन्ति[7]मप्रतिरथं तनयं प्रसूय ।
[8]तत्सन्निवेशितधुरेण सहैव भर्त्रा,
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ।। २ ।।

कैकेयीविषयिणी कविदृष्टिः

[9]सत्य-प्रतिज्ञोऽभवदाजि-राजो रामोऽपि लोके पृथुकीर्तिरासीत् ।
[10]नीतिं च नेतॄन् समशिक्षयद् या कैकेय्युपज्ञं किल [11]वाल्मिकीयम् ।।१।।

१—गुरून् श्वश्रू-श्वशुरप्रभृतीन् गृहश्रेष्ठजनान् २—यातृवर्गे ३—विप्रकृता विरुद्धं व्यवहृता ४—उत्सेकः गर्द्धा सोऽस्ति अस्या इति उत्सेकिनी, न उत्सेकिनी अनुत्सेकिनी अगर्द्धाशालिनी स्याः। यदेव वस्त्रभूषणादिकं पतिः कामयेत् तव कृते तदेव त्वमपि रोचय। त्वं तत्र हठं न कुरु यद् नेदं मह्यं रोचते, अहन्तु अमुकमेव वस्त्रं परिधास्ये इत्येवमित्यर्थः। ५—आधयः मनोव्यथाः स्युः। ६—सदिगन्ता मही तस्याः सपत्नी। ७—नास्ति प्रतिरथो यस्य स अप्रतिरथः तम्। ८—तस्मिन् सन्निवेशिता धूः येन स तत्सन्निवेशितधुरः तेन। 'ऋक्पूरब्धूःपथामानक्षेः ५।४।७४' इत्यच्। ९—कैकयी-विवाहे तत्पुत्राय राज्यं दास्यामि इति दशरथो जनकं तदीयं प्रतिज्ञातवान्। १०—न्याय्ये मार्गे लोकनिन्दा न गण्या भवतीति नीतिः। ११—छन्दोऽनुरोधात् ह्रस्वेकारः। वाल्मिकीयम्।

सा कैकयी किल जनैरभिनन्दनीया,
यस्तां विनिन्दति नरः स हि निन्दनीयः ॥
प्राणप्रियं त्यजति या रघुनन्दनं तं,
नीतिज्ञतां वहति वेत्ति न [१]लोकनिन्दाम् ॥ २ ॥
रणे रणे या नृपमन्वगच्छत् साहाय्यमप्याचरति स्म यत्नात् ।
सारथ्यतो या वरयुग्ममाप कथन्न सा तत्फलभागिनी स्यात् ॥ ३ ॥
पुत्राय राज्यार्पणनिष्क्रयेण जग्राह राजा विधिना करं मे ।
कथं प्रतिज्ञां त्यजति स्वकीयां रामप्रवासे नय एष [२]तस्याः ॥ ४ ॥

नारीसम्मानार्थं मनोराज्ञा

प्रजनार्थं महाभागाः[३] पूजार्हा गृहदीप्तयः ।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ॥ १ ॥
पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा ।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ॥ २ ॥
यत्र नार्य्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥ ३ ॥
शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम् ।
न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्वदा ॥ ४ ॥
जामयो यानि गेहानि शपन्त्य[४]प्रतिपूजिताः ।
तानि [५]कृत्याहतानीव विनश्यन्ति समन्ततः ॥ ५ ॥

१—जना अद्यापि तां कैकयीं निन्दन्त्येव सा तु नैव गणयतिस्म । इति अधः पद्यद्वये सर्वं स्फुटीभवति । यतो हि रामस्तु कैकय्या भरतादपि अधिकः प्रियतरोऽभूत्तथापि सा राज्ञा विवाहकालकृतां प्रतिज्ञां विचिन्त्य सपत्नीसुखाधिक्याऽभावचिन्तया च स्वकर्तव्ये दाढर्यं कृतवती इत्यलम् । २—तस्याः कैकय्याः । ३—महान् भागो यासां ताः । पूजाया अर्हा योग्या गृहे दीप्तयः प्रकाशरूपा इत्यर्थः । स्त्री-श्री-मध्ये भेदो नास्तीति भावः । ४—अप्रतिपूजिता असत्कृताः ५—कृत्या-राक्षसी तया हतानि अर्थात् स्त्रीणां सत्कारेण देवाः पितरश्च प्रसन्ना

तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः ।
भूति-कामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥ ६ ॥
सन्तुष्टो भार्य्यया भर्ता भर्त्रा भार्य्या तथैव च ।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥ ७ ॥

नारीणामभ्यर्हितत्वे भारतीयं शास्त्रम्

भारतीये वाङ्मये सर्वत्रैव नारीणां मातृपदं प्रतिष्ठितमुद्घोषितं दृश्यते । तथा हि श्रुतिर्भगवती सर्वहितैषिणी "[१]मातृदेवो भव, पितृदेवो भव, आचार्य्यदेवो भव, अतिथिदेवो भव" इति क्रमं ब्रूते । तस्यैव क्रमस्यानुवादं मनुस्मृतौ—

[२]उपाध्यायान् दशाचार्य्य आचार्य्याणां शतं पिता ।
सहस्रन्तु पितॄन् माता गौरवेणातिरिच्यते ॥

तुलसीदासोऽपि एतदनुसरणं कुर्वन् कौशल्यामुखेन स्व-रामायणे वक्ति अयोध्याकाण्डे—

'जो केवल पितु आयसु ताता । तो जनि जाहु जानि बड़ि माता ।
जो पितु-मातु कहहिं बन जाना । तो कानन शत अवध समाना' ॥

भवन्ति यतस्तद्गृहवृद्धिर्जायते । तासामपमानेन तु देव-पितृ-शापेन गृहविनाशो जायते । स्त्री हि कल्पलता निगद्यते—यस्मिन् गृहे सा सत्कृता भवति तत्र तु लक्ष्मीरूपा भूत्वा सर्वथा तद्गृहाभ्युदयं करोति । यत्र सा अनादृता जायते तत्र लक्ष्म्या ज्येष्ठभगिनी दरिद्रा भूत्वा तद् गृहं सर्वथा विनाशयतीति विज्ञानमत्र । अतः स्त्री-समादर एव सर्वथा कार्य्यः—इति फलतीत्यलम् ।

१—माता देवो यस्य स मातृदेवः इत्यादि-विग्रहो ज्ञेयः । २—उपाध्यायः=अनुपनीतानां शिक्षकः उप-समीपं गत्वा अधीयते यस्मात् स उपाध्यायो वा आचार्य उपनीतानां शिक्षकः ।

आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि ।
स्वयमप्याचरेद् यस्तु स वै आचार्य्य उच्यते ॥

केवलव्यवहारशास्त्र-शिक्षको न तु ब्रह्मदोऽपि । स तु पितुरपि अधिकः कथ्यते । उत्पादक-ब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता, इत्यभियुक्तोक्तेः ।

वाल्मीकीयेऽपि—

यथैव ते पुत्र-पिता ततोऽहं गुरुः स्वधर्मेण सुहृत्तमश्च ।
न त्वानुजानामि न मां विहाय सुदुःखितामर्हसि पुत्र गन्तुम् ॥

पाणिनिनापि शब्दतः प्रत्यय-सर्जनेऽभ्यर्हितत्वादेव 'स्त्रियाम्-४।१।३' इति स्त्र्यधिकारं पूर्वं निवेश्य ततो हि 'तद्धिताः ४।१।७६' इति षट्-सप्ततितमसूत्रतस्तद्धिताधिकारं चालयति । तदनुगः कात्यायनोऽपि 'अभ्यर्हितं च' इति वार्तिकं सन्निवेश्य सीता च रामश्चेति सीतारामौ । लक्ष्मीश्च नारायणश्च लक्ष्मीनारायणौ । पार्वती च परमेश्वरश्च पार्वती-परमेश्वरौ इत्यादि-प्रयोगेषु अभ्यर्हितत्वात् स्त्रीलिङ्गप्रयोगाणां पूर्व-निपातमाचरतीति सर्वत्र पुराणादिषु च "पितुरभ्यधिका माता गर्भ-धारण-पोषणात्" इत्याद्युपनिबद्धं दृश्यते । रामायणं महाभारतमपि सूर्य्यचन्द्रवंशवर्णनात्मकं सूर्य्यचन्द्र-समं भारतीयेतिहासमहाकाव्यमपि तु सीताद्रौपदीति नारी-द्वयमधिकृत्यैव निबद्धमित्यहो भारतीय-वाङ्मयं नारी-सन्मान-निबद्धमेव दरीदृश्यत इत्यलम् ।

[1]गोरण्डशासन-शिक्षाविषम्

[2]दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ १ ॥

गोरण्ड-शासने ये हि भारतीयानां कृते इतिहासग्रन्था निर्मिताः सन्ति तत्र बहु वैपरीत्यमस्ति । तेषामन्धानुकरणं सम्प्रत्यपि

१—गोरण्डनां शासनम् तस्मिन् शिक्षा तस्याः विषम् । २—दैवी० पद्यस्यात्र लेखने तात्पर्य्यमिदमस्ति यद् गौरण्डैः कूटनीतिज्ञैस्तु मायया स्व-छद्मशिक्षा-मिषेण भारतीयानां हृदये विषं तु निषिक्तम् अस्ति । किन्तु साम्प्रत-मीश्वर-प्रभावात् स्वतन्त्रा भारतीया ईश्वरभक्तास्तेषां तां मायां स्वशिक्षया तरन्तु विनाशयन्तु एवं शिक्षामात्मीयां चालयन्तु यतः सर्वा अपि गोरण्डमाया विच्छिन्नाः स्युः । माया तु नारीरूपैवास्ति । कथं तासु कस्याप्यन्यस्य मायायाः प्रवेशः स्यात् ।

"विजृम्भितं यस्य किल ध्वनेरिदम् । विदग्धनारी वचनं तदाकरः ।" इति (नैषध काव्ये) विशेषतो नार्य्यः सर्वथा तन्मायाजाले न पतन्तु इतिभावः ।

भारतीयैः क्रियते। स्वतन्त्रेऽस्मिन् भारते ईदृशानां शिक्षाविषाणां झटिति दूरीकरणमपेक्ष्यते। क्रमेण तानि शिक्षाविषाणि-विव्रियन्ते। तथाहि—

१—संसारे विकाश-वादोऽस्ति। क्रमेण उत्तरोत्तरं सर्वेषामेव पदार्थानां विकाशो भवति। मानवा अपि वानरयोनितो मानवयोनाविहागता इति। २—भारतीयानां कोऽपि इतिहासग्रन्थो नास्ति। इतिहासलेखनं नेमे जानन्ति। अस्माभिः शिक्षिताः सम्प्रति इतिहास-ग्रन्थ लिखन्ति इति। ३—नेदमेतेषामार्य्याणां निवास-भूमिर्भारत-वर्षम्। इदं भारतवर्षम् हि आदि-द्राविडानाम् निवास-भूमिः। इमे आर्य्यास्तु यथा वयमिह व्यापारिणः समेतास्तथैवेमेऽपि स्वदेशादुपेता इति। ४—वर्णाश्रमादिव्यवस्थापि आर्य्यैः स्वयं कल्पिता ये हि वेदनियमा नेमे ईश्वरनिर्मिता नियमा इति। ५—पूर्वम् इमे भारतीया अनुन्नताः परस्परं कलहायमाना लुण्ठकाः चौरा वर्वरा आसन्। पश्यन्तु एतेषामेकत्र ग्रामे सङ्घनिवासप्रथाऽस्ति। यतः चौरा लुण्ठका न प्रविशेयुरिति। अद्यत्वे वयं गोरण्ड-महाप्रभव एषामिह समागत्य मार्ग-प्राशस्त्यं रेलयानं व्योमयानं स्फोनयानं टेली-विजन-विद्युद्रेडियोप्रभृति-विविध-विज्ञान-यन्त्राणि प्रदायेमान् असभ्यान् सभ्यान् कृतवन्त इति अस्माकं महान् उपकारभार एतेषु अस्ति। ६—भारोपीयभाषायाः पौत्रीयं संस्कृतभाषा कस्यांचन प्राक्तन्यां भाषायां विकारं प्राप्यैव-समुत्पन्ना प्राकृतप्राक्तनभाषातो निस्सृतेयमत एव संस्कृतभाषोच्यते। इति च। ७—वेदपुराणादीनि शास्त्राणि इतिहासयुगनिर्मितानि अर्वाचीनानि कविकल्पितानि मिथ्या-गाथा-रूपाणि। तत्र कोटि-लक्ष-सहस्रादि-वर्षातीतगौरवगानं सर्वं मिथ्या कपोल-कल्पितं कविकल्पना-मात्रम्। न तत्र किञ्चन तथ्यं वस्तु। तत्रैव नारीणां सतीत्व-कल्पनाऽपि मिथ्या। तासां विविधा कथापि, यथा सावित्र्या यमसँव्वादः, अनुसूया-प्रभृतीनां प्रभाव-वर्णनं पुरुषकल्पितम्। यतो नार्य्यः स्व-सतीत्व-रक्षणधिया पुरुषाधीना एव सर्वथा तिष्ठेयुरित्यादि सर्वमपि पुरुषैः

स्वार्थ-परायणैः स्त्रीणां वञ्चना कृताऽस्ति। अतोऽस्माभिः प्रवर्त्तिते विज्ञानयुगेऽस्मिन् नार्य्यः स्वतन्त्राः स्युर्न पुरुषाधीनत्वं तासामुचितम्। इत्येवं शिक्षाविषम् तैर्भारतीयमानवानां हृदये निषिक्तम्, इति संक्षेपः। (इतिपूर्वपक्षः)

वेदविज्ञानेन[१] गोरण्डविषनिरासः

गते गोरण्ड-शिक्षा-विष-निर्देश-शीर्षके ये ये शिक्षा-दोषा दर्शितास्ते सर्वे तु नितरां पृथक् पृथक् ग्रन्थ-लेखनेन विद्वद्भिरपोहनीयाः स्युः। अत्र संक्षेपतो नारीणां सतीत्व-विनाश-विषमेवापाक्रियते। तथाहि—वृहदारण्यकोपनिषदि श्रूयते "स वै नैव रेमे। तस्मादेकाकी न रमते। स द्वितीयमैच्छत्। स हैतावानास। यथा स्त्री-पुमांसौ संपरिष्वक्तौ। स इममेवात्मानं द्वेधाऽपातयत्, ततः पतिश्च पत्नी चाभवताम्। तस्मादिदमर्ध[२]बृगलमिव स्व इति ह स्माह याज्ञवल्क्यः। तस्मा-

१—वैदिकविज्ञानं हि स्त्रिया सह पत्युः अभेदं वक्ति—इत्येव दर्शयति बृहदारण्यकोपनिषन्निबद्धमिदं वाक्यम्। २—अर्धबृगलमिव स्व इति अर्थस्तु शाङ्करभाष्ये विवृतोऽस्ति। तथापि स्पष्टार्थमिहोच्यते—प्रजापतिः आत्मनो देहं द्विधा चकार इत्यस्याभिप्रायोऽयं यत् प्रजापतिस्तु स्वयं तथैव शिवशक्तिरूपात्मक आसीत्, तस्मात् स्त्रीधारा पुंधारा चेति द्वौ पदार्थौ अभूताम्। तत एव सृष्टि-चक्रं चलति इति। स्त्रीपुरुषौ यथा एकस्य चणकस्य द्वौ दलौ भवतः तथैव स्तः। नास्ति तयोः पार्थक्यमिति। अतश्च स्त्रियाः सतीत्वं पुरुषस्य एकपत्नीव्रतमिति स्वभाव-सिद्धो धर्मः। नात्र विचारणायाः प्रयोजनम् इत्यलम्। अस्या उपनिषदः पिण्डितार्थोऽयम्—परमात्मा यदा अविभक्त एकाकी शिवशक्त्यात्मकः तिष्ठति, स्त्रीपुरुषात्मना विभक्तो न भवति यावत् तावत्तु न रमते। यदा च स पतिश्च पत्नी चेति द्विधा भूत्वा सृष्टिचक्रं चालयति तदैव रमते। एतदेवोच्यते स्त्रीपुमांसौ संपरिष्वक्तौ स इममेवात्मानम् द्वेधाऽपातयदित्यादि। एतदाधारमेव भारतीयं विज्ञानं प्रचलति यत् स्त्रिया विरहितः पुमान् अपूर्णः पुंसा विरहिता स्त्री अपूर्णा इति। तथाहि—'अर्धो हि वा एष आत्मनो यज्जा-

दयमाकाशः स्त्रिया पूर्यंत एव तां समभवत् ततो मनुष्या अजायन्त ।" इति । (बृहदारण्यकोपनिषद् १।४।३) शाङ्कर-भाष्यम्—स प्रजापतिर्नैव रेमे रतिं नान्वभवत् । स तस्या अरतेः अपनोदाय द्वितीयम् अरत्यपघात-समर्थम् स्त्री-वस्तु ऐच्छत् । स प्रजापतिः एतावान् एतत्परिमाण आस बभूव । किंपरिमाण इत्याह–यथा यथा लोके स्त्रीपुमांसौ संपरिष्वक्तौ । स प्रजापतिः स्वयं पृथक् भूतः सन् इमम् आत्मानं पृथग्भूतं द्वेधा अपातयत् । तस्मात् पातनात् पतिश्च पत्नी च अभवताम् । तस्माद् इदं पृथग्भूतं शरीरं स्वः (स्वस्य षष्ठ्यर्थे प्रथमा) अर्धवृगलम् (अर्धं च तद् वृगलम् विदलम् अर्ध-वृगलम्) अर्ध-द्विदलमिवेत्यर्थः । एवं स्म आह (यज्ञस्य वल्कः वक्ता यज्ञवल्कस्तस्यापत्यं) याज्ञवल्क्यः दैवरातिः । ब्रह्मणो वा अपत्यम् इत्यर्थः ।

येति' (शतपथब्राह्मणे ५।२।३-१०) 'यावन्न विन्दते जायां तावदर्धो भवेत् पुमान्' (व्यास-संहिता २।१४) । शिवस्यार्धनारीश्वरं रूपमपि भावमिमं पोषयति । मनुनापि–द्विधा कृत्वाऽत्मनो देहमर्द्धेन पुरुषोऽभवत् । अर्द्धेन नारी तस्यां स विराजमसृजत्प्रभुः । इत्युक्तम् ! अन्यत्रापि तथैवोक्तम्—'शक्तिश्च शक्तिमाँश्चैव पदार्थद्वयमेव हि । शक्तेर्विलसितं सर्वं जगदित्यवगम्यताम् ।'

एतावानेव पुरुषो यज्जायात्मा प्रजेति च । विप्राः प्राहुस्तथा चैतद्यो भर्ता सा स्मृताङ्गना ।। (मनु० ९।४५) "अमोऽहमस्मि मा त्वं मा त्वमस्यमोऽहम् सामाहमस्मि ऋक् त्वम् द्यौरहं पृथिवी त्वम्" (ऋक् ८।३।२७) जयदेवोऽपि—

परस्पर-तपःसम्पत्फलायित-परस्परौ ।
प्रपञ्चमातापितरौ प्राञ्चौ जायपती स्तुमः ।।

इति शब्दार्थयोरभेदं व्यञ्जयन्नाह संसारचक्रं चालयितुं स्त्रीपुंसौ हि शकटधुर्यौ स्तः । वामभागे स्त्री दक्षिणभागे पुमान् नियुज्यते । योगं इति अप्राप्त प्रापणम् उपार्जनं पुमान् करोति । प्राप्तस्य रक्षणं क्षेम इति । स्त्री उपार्जितस्य रक्षणं क्षेमकृत्यं करोति । इत्यलम् । इत्थं हि सतीत्वं स्त्रीणां पुंसा सहाभेदस्थित्या स्वयं सिध्यति । किमन्यद्वक्तव्यम् । अतश्च गो रण्डशासन-शिक्षा-विषम् स्वतन्त्रेऽधुना भारते नारीभिः स्वयमुन्मूलनीयमिति संक्षेपः ।

वेदमन्त्रेषु नारी

"आब्रह्मन् ब्राह्मणो [1]ब्रह्मवर्चसी [2]जायतामाराष्ट्रे राजन्यः शूर इषव्योऽ[3]तिव्याधी महारथो जायतां दोग्ध्रीर्धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्ध्रिर्योषा जिष्णू रथेष्ठा सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम् योगक्षेमो नः कल्पताम्"। इति।

अत्र हि ब्राह्मणानां ब्रह्मवर्चस्कत्वं राजन्यानां च शूरत्वं योषाणां पुरन्ध्रित्वं विहितं दृश्यते। 'योषा नारी पुरन्ध्रिः गृहधारिणी भवेत्' इति। इत्थं हि श्रुति-विज्ञानं नारीणां पुरन्ध्रित्वपोषिकामेव शिक्षां समर्थयति नेतरामिति। पुरन्ध्रित्वं हि गृहविज्ञानं सन्तान-शिक्षण-रक्षण-पालन-पोषण-शिल्प-कला-सङ्गीताचारशास्त्र-मनोविज्ञानायव्ययादि-लेखा-चित्रकलादि-सर्वं क्षेमकल्पकं विज्ञानं विज्ञेयम्। सूत्र-रूपतो यद्युच्येत तर्हि गृहस्वामिनीत्वस्य मातृत्वस्योपोद्बलकं ज्ञानविज्ञानं नारीणां कृतेऽपेक्षितं तच्च सतीत्व-संरक्षणं विना न सम्भवति। सतीत्व-संरक्षणं च पतिपरायणतयैव स्यात्। पतिपरायणता च पुरुषान्तरसम्पर्कराहित्यार्थं यानि साधनानि अपेक्षितानि तानि सर्वाण्यपि नारीणां कृते समुपयुक्तान्येवेति काऽत्र विचारणा का च तद्विपरीतत्यागे चिन्ता, बाधा वेत्यादि सर्वं सुधीभिर्विवेचनीयमित्यलम्। भारतीयनारीणां कृते लज्जा-शस्त्रमपि सतीत्वसंरक्षणायैव प्रत्तं विद्यते।

'सलज्जा गणिका नष्टा निर्लज्जा च कुलाङ्गना'।
या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मानां, कृतधियां हृदयेषु बुद्धिः॥

१—ब्रह्मवर्चसी इति दीर्घः छान्दसः। २—जायताम् आजायताम् 'छन्दसि परेऽपि १।४।८०' 'व्यवहिताश्च १।४।८१' इति सूत्रबलात् आङो व्यवहितप्रयोगः। ३—अति-व्याधी इत्यत्रापि छान्दसो दीर्घः।

श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥

इत्यादीनि सर्वाण्यपि आर्य्यनारीणां सतीत्व-संरक्षणार्थमेव शस्त्राणि निर्मितानि। तत्र स्कूल-कालेज-प्रभृति-शिक्षा-संस्थासु नारीणां पुम्भिः सह शिक्षाऽपि नैकत्रोचिता। सापि पाश्चात्यशिक्षा-विषमेव। शीघ्रं-शिक्षा-संस्थानतो वयस्कनारी-नरयोः सहशिक्षणं गोरण्डशासकैः प्रचालितं दूरीकरणीयमेवेत्यलम्।

सांख्यशास्त्रीय-प्रकृतिर्हि नारी

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः।
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं[१] चरति ॥

सांख्यशास्त्रे सत्त्वरजस्तमसां साम्यावस्था हि प्रकृतिरुच्यते। निर्गुणः किन्तु चेतनः पुरुष उच्यते। तयोः प्रकृतिपुरुषयोः [२]अन्ध-पङ्गु-न्यायेन प्रवृत्तयोः अग्रे—

प्रकृतेर्महान् ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि ॥

इति क्रमेण सृष्टिचक्रं चलति। इति हि संक्षिप्तः सांख्यीयः सिद्धान्तः। तत्र गुणवती सत्वंरजस्तम इति गुणत्रयवती उपकारिणी प्रकृतिः नानाविधैः उपकारैः हेतुभिः अगुणस्य निर्गुणस्य अनुपकारिणः सतः तस्य पुंसः अर्थम्=कृते अपार्थकं स्वार्थं विहाय चरति। फलतः

१—अपार्थकम् अपगतः अर्थः प्रयोजनम् यस्मिन् कर्मणि तद् यथा तथा इति क्रियाविशेषणमेतद्। २—अन्ध-पङ्गुन्यायो यथा अन्धः पङ्गुश्च क्वापि पृथक् स्थितौ आस्ताम्। तत्र पङ्गुः अन्धम् प्रैरयद्, त्वम् अत्रैत्य मां स्वस्कन्धे स्थापय मत्प्रेरणया चल स्व-गन्तव्यमुभयेऽपि वयं प्राप्स्याम इति। तथैव पुरुष-संयोगात् क्रियाशालिनी प्रकृतिः संसारं निर्माति। पुरुषमपि अपवर्गयति संसार-भोगं कारयित्वेति संक्षेपः।

पुरुषः केवलं स्वसंयोगेन प्रकृतौ क्रिया-मात्रं जनयति। तत्रापि तस्याः क्रियाया जनकत्वं तस्मिन् पुरुषे नास्ति सैव प्रकृतिः पुरुषसंयोगात् क्रियावती जायते। यथा स्कन्धस्थितेन पङ्गुना दृष्टिमान् भूत्वा अन्धः स्वयं चलनक्रियो भवति। सैव दशाऽत्र संसारे स्त्रीपुंसयोर्मध्ये स्त्रियाः समुचिता। पुमान् कुर्य्याद्वा नापि कुर्य्यात् तस्याः कार्यम् इति चिन्ता तया न कार्य्येति रहस्यम्। पुरुषस्य कर्तव्यं तु अस्ति यत् तस्यां स्वभार्य्यायां यथा क्रिया-करण-सामर्थ्यमागच्छेत्तथा स कुर्य्यादिति परन्तु भार्य्या तु विनैव पुरुषकृतनिजोपकारचिन्तां तस्योपकारे प्रवृता तिष्ठेदिति रहस्यं सांख्यशास्त्रस्य। आगमे (तन्त्रे)ऽपि शक्तेरेव विलसितं जगदिति सिद्धम्।

यदा हि भारतीयनारीषु अस्य भावस्योदयः सर्वथा स्यात्, पुंस्सु अपि अयं भावस्तिष्ठेत् यद् इयं मद्भार्य्या मत्संयोगात् मम साहाय्येनैव सामर्थ्यशालिनी क्रियावती भवति। एतस्यां सामर्थ्योत्पादनं मे कर्तव्यम् तदैव भारताभ्युदय इति संक्षेपः।

स्त्रीपुंसयोः परस्परव्यवहारः

दम्पत्योर्व्यवहारस्तु प्रत्यक्षतः एवार्द्धनारीश्वरमूर्तौ सर्वैरपि भारतीयैः प्रत्यक्षीकार्य्यः। तथाहि—प्राचीनं पद्यम्—

"[1]आत्मीयं चरणं दधाति पुरतो निम्नोन्नतायां भुवि,
स्वीयेनैव करेण कर्षति तरोः पुष्पं श्रमाशङ्कया।
तल्पे किञ्च मृगत्वचाविरचिते निद्राति भागैर्निजैः,
सर्वं कर्म निजाङ्गतो वितनुते शम्भुः सती-गौरवात्॥ १॥

इत्थं हि परस्परं व्यवहरन्तौ स्त्रीपुंसौ स्वगृहं स्वर्गीकुरुतः। शङ्कराचार्य्योऽपि शक्ति-रूपया पार्वत्या इकारमात्रया युक्तस्यैव शिवस्य

१—अर्द्ध-नारीश्वरो भगवान् शिवः सत्या उपरि निजासाधारणप्रेमप्रभावात् सर्वमपि दैनन्दिनं व्यवहारं स्वगात्रैरेव करोति। न तु सत्या गात्रैरिति तात्पर्यमस्य पद्यस्य।

गतिमाख्याति। इकारमात्रात्मक-शक्तिरूपया पार्वत्या विहीनस्य तु शवतामेवाख्याति। तथाहि—

'शिवः [१]शक्त्या युक्तो यदि भवति शक्तः प्रभवितु,
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि।
अतस्त्वामाराध्यां हरि-हर-विरिञ्च्या-दिभिरहो,
प्रणन्तुं स्तोतुं वा कथमकृत-पुण्यः प्रभवति'॥ २॥

स हि अन्यत्रापि इत्थमेव भगवतीमादिशक्तिं स्तौति। तथाहि—

'[२]चिताभस्मालेपो गरलमशनं दिक्पटधरो,
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः।
कपाली भूतेशो भजति जगदीशैकपदवीम्,
भवानि त्वत्पाणि-ग्रहण-परिपाटी-फलमिदम्'॥ ३॥

इत्थं हि भवान्या महत्त्वं शङ्कराचार्येण सर्वत्रैव प्रशंसितं दरीदृश्यते। अत्र प्राचीनेयं दन्तकथा [३]सर्वत्रैव भारते प्रसिद्धास्ति। यद् आदिशङ्कराचार्य्यः शक्तिपदार्थं यदा खण्डयन् मिथिलादेशेऽभूत् तदैव केनापि रोगेणाक्रान्तो जातः। यत्र (अतिसाररोगे) दध्नः प्रयोगोऽपेक्षितोऽभूत्। तदानीमादिशक्तिर्भगवती दधिविक्रयिकां मूर्तिं धृत्वा दधिभाण्डञ्च

१—'शिव'—शब्दे इकारः शक्ति-बीजं स यावदस्ति तावदेव 'शिव'—शब्दः कल्याण-वाची अस्ति। यदि तत इकारो निर्गतः स्यात्। उच्चारणार्थम् अकारः सन्निवेशितः स्यात्तर्हि तु शव एव शब्दो भवति। अतश्च शक्ति-विशिष्ट एव शिवः शिवः। अन्यथा शव एवेति तात्पर्य्यमस्य पद्यस्य

२—इत्थमेवादिशक्तेः पाणिग्रहण-प्रभावेणैवाऽकिञ्चनः सर्वसाधनहीनोऽपि कपाली जगदीशः कथ्यते।

३—शक्ति-शक्तिमतोरभेद इति वादोऽपि प्रसिद्ध एवेति दन्तकथाया अस्याः सत्यत्वे न सन्देहः। मैथिलदेशे मण्डन-मिश्र-प्रभावाद् मीमांसाशास्त्रस्य प्रचार आसीदेव। तत्र गतः श्री-शङ्कराचार्य्यो मीमांसासिद्धान्तस्य कर्मप्रधानवादस्य खण्डनप्रसङ्गेन शक्तिपदार्थं खण्डयितुम् अर्हत्येवेति विश्वसनीयव भारतीय-दन्तकथेत्यलम्।

शिरसि धृत्वा यत्र शङ्कराचार्य्यः स्थित आसीत् तेनैव पथा गच्छन्ती 'दधि गृहाण, दधि गृहाण,' इत्येवमसकृद् ब्रुवाणा भूत्वा प्रयातिस्म। तदैकाकी शङ्कराचार्य्यो रोगेणोत्थातुमशक्तः सन्नभ्यधात्। अयि दधि-विक्रेत्रि! अत्रैत्य मह्यं दधि देहि। साऽवोचद् गृह्यतामत्र दधि। श्री शङ्करोऽवादीन्नाहं तत्रागन्तुं क्षमः शक्तेरभावादिति। तत आदि-शक्तिर्भगवती तमुत्तरयामास—कथं भगवन्! भवान् तु शक्ति-पदार्थं खण्डयति इदानीं किं वक्ति यन्मयि तत्रागन्तुं शक्तिर्नास्ति। 'त्वमत्रैवागत्य दधि देहि' इति कथं भवतोच्यते? भवन्मते तु शक्तिरस्त्येव नहि। तर्हि केयं शक्तिः? यस्या अभावं स्वस्मिन् वक्ति भवानिति। इत्थं विवदमानेव सा दधिविक्रेत्री स्वात्मानं दर्शयामास तस्मै। सा परात्परा-ऽऽदि-शक्तिरेवासीद् दधिविक्रेत्री। ततः प्रभृति रोगरहितः स शारदाया भगवत्याः पूजनं चकार। तत्सम्बन्धे च स्तोत्रग्रन्थं जग्रन्थेति प्रसिद्धिः। कवि-सम्राट् कालिदासोऽपि कुमार-सम्भवकाव्ये पार्वत्यास्तपः शिव-प्राप्तये वर्णयामास तथाहि—

'इयेष सा कर्तुमबन्ध्य-रूपतां, समाधिमास्थाय तपोभिरात्मनः।
अवाप्यते वा कथमन्यथा द्वयं [1]'तथाविधं प्रेम पतिश्च तादृशः' ॥ १ ॥

इति। तथैव स रघुवंशकाव्येऽपि सीतादेव्या लोकोत्तरमनुरागं प्रेमाणञ्च रामचन्द्र-सम्बन्धे वर्णयति। तथाहि—

'वाच्य[2]स्त्वया मद्वचनात्स राजा, वह्नौ विशुद्धामपि यत्समक्षम्।
मां लोकवादश्रवणादहासीच्छ्रुतस्य किं तत्सदृशं कुलस्य'॥ इति।

१—पार्वत्याः तपस्यायाः पतिप्रेम्णोः द्वयोरपि अलौकिकत्व-वर्णनेन समर्थयति कविः शिवशक्त्योरभेद इति तत्प्रत्यभिज्ञाशास्त्रमेव कुमारसम्भवरघुवंश-शाकुन्तलादीनि काव्यानीति सूचयति च। २—'वाच्यस्त्वया मे' इत्यादि सीतोक्तिः तस्या एव उदार-हृदयतामाख्याति। एवमेव द्वितीयपद्ये तथा वाल्मीकीय-पद्येष्वपि सीता-महत्त्वं स्फुटं परिलक्ष्यते यत् पत्या प्रत्यक्षमेव कृतं स्वनिर्वासनं सा स्वस्यैव पूर्वजन्मकृतपापं तर्कयति न तु स्वस्य पत्युः दोषम्। एवं सर्वसमक्षं

यदा लक्ष्मणो वाल्मीकेराश्रमे सीतां विहाय जिगमिषति तदैवेत्थं प्रतिपदव्यङ्गचमुक्त्वाऽग्रे यथार्थतो भारतीयार्य्यनारी-हृदयं प्रत्यक्षयति विशालहृदया भगवती सीता। यत्काव्यं भारतीयनारीभिः सर्वदा स्वहृत्पटले स्थापनीयम्। तथाहि—

'कल्याणबुद्धेरथवा तवायं, न [1]कामचारो मयि शङ्कनीयः।
ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः' ॥

इत्यहो नारीहृदयस्य विशालता। सर्वथा तस्या विनाशायोद्यतमपि स्वपतिं रामं सा तु सर्वथा निरपराधिनमेवोद्घोषयति। किमस्ति जगति क्वापि एतादृशस्य नारी-हृदयस्य विशालतायाः सादृश्यम्? नो दरीदृश्यते चेत्तर्हि वदन्तु विजयतां भारतीय-नारी-हृदयमिति।

इतोऽप्यग्रे तमादिकविं पश्यन्तु यस्य काव्ये युद्धावसाने संसदि समासीनां सीतां रामो दुर्वचसा वाग्वाणैः रावणगृहोषितां तां सन्तक्षति। तथापि सीता लोकोत्तरधैर्य्येणावर्णनीयेनाऽनुरागेण कीदृशं रामं लज्जयति। इति सचेतसः पश्यन्तु स्वयं चानुभवन्तु। तथाहि—

'त्वया तु नरशार्दूल क्रोधमेवानु[2]वर्तता।
लघुनेव मनुष्येण स्त्रीत्वमेव पुरस्कृतम्'॥
'न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः।
मम भक्तिश्च शीलञ्च सर्वं तु पृष्ठतः कृतम्'॥

अहो शीलं भगवत्याः सीताया अहो लोकोत्तरं धैर्य्यमहो अवर्णनीयोऽनुरागः? अनुपमेया नारीहृदय-विशालता विश्वं चमत्करोति।

रावण-गृहोषितत्वमात्रदोषेण निष्काशन-परं धैर्य्येणैवोत्तरयति। नहि तं भर्त्सयति क्रुध्यति वेति प्रशंसनीयं धैर्य्यं तस्याः। इत्यादि सर्वत्रैव स्त्रीणां धैर्यं प्रशस्यं दृश्यते। इत्यलम्।

१—कामचारः कामतः स्वेच्छातः चारः व्यवहारः = स्वेच्छयैव मां वने निष्कासितवान् इति शङ्का न कार्य्या। २—अनुवर्तता = अनुवर्तत् इति वृतु वर्तने इत्यस्य परस्मैपदीयं शब्दस्वरूपं शतरि निर्माय तृतीयान्तः प्रयोगः आत्मनेपदस्यानित्यत्वाज्ज्ञेयः।

आलङ्कारिक्यो नार्य्यः

उपमादयोऽलङ्कारा अपि नारीभिरेव निर्मीयन्ते। पश्यन्तु—१—तरवो लताभिरावेष्टिता नरा नारीभिरालिङ्गिता इव विराजन्ते (इत्युपमा[1]) २—तरुनरा लताऽङ्गनाभिरालिङ्गिता मोदन्ते (इति रूपकम्[2]) ३—तत्रैव विषयं निगीर्णं कृत्वा केवलं विषयिवर्णने नरा नारीभिरालिङ्गिताः शोभन्ते (इत्यतिशयोक्तिः[3]) ४—तत्रैव सम्भावनया तरवो लताभिरावेष्टिता इव (मन्ये नरा नारीभिरालिङ्गिताः)। (इत्युत्प्रेक्षा[4]) ५–नेमे तरवो लताभिरावेष्टिताः किन्तु नरा नारीभिरालिङ्गिता, (इत्यपह्नुतिः[5]) ६–लताभिरावेष्टितान् तरून् नारीभिरालिङ्गितान्नरान् संदेह्मि (इति संदेहः[6]) संस्मरामि (इति स्मृतिः) अनुमिनोमि (इत्यनुमितिः)

१—उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः। २—रूपकं रूपितारोपो विषये निरपह्नवे। ३—विषयं निगीर्य केवलं विषयिण उक्तिरतिशयोक्तिः यथा तत्रैव लतावेष्टितान् तरून् वीक्ष्य तान् निगीर्य केवलमुपमान-मात्रोक्तौ अतिशयोक्तिः। ४—मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः। उत्प्रेक्षाव्यञ्जकाः शब्दा इव शब्दोऽपि तादृशः। इत्यादि-शब्दैः सम्भावनया साध्यकीर्तनमेवोत्प्रेक्षालङ्कारः। 'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना' इति लक्षणम्। ५—प्रकृतं प्रतिषिध्यान्यत् कल्पनं स्यादपह्नुतिः। ६—सन्देह-स्मृत्यनुमित्यादि-पदप्रयोगे तन्नामानोऽलङ्काराः। अलङ्कारान् अर्हन्ति इति आलङ्कारिक्यः अर्हार्थे 'तदर्हति ५।२।६३' इतिठञि तस्येकादेशे आदिवृद्धौ ङीपि बहुत्वे आलङ्कारिक्यः। निष्कर्षस्तु यदि सूक्ष्म-दृष्ट्याविविच्यते। तदा सा स्त्रीरूपा एवोपमा कियता परिवर्तनेन अलङ्कारान्तरमासादयति। यथा—मुखं ते चन्द्र इव वर्तुलं शोभते। अत्र मुखम् उपमेयम् चन्द्र उपमानम् वर्तुलत्वं–समानो धर्मः। इवेति उपमाद्योतकं पदम्। इत्येवं सर्वस्यैवोपमा-साधक-पदार्थ-चतुष्टयस्य सत्त्वादुपमालङ्कारः। तत्रैव इव शब्दं निःसार्य्य उपमेयोपमानयोरेकीकरणे रूपकम् यथा—मुखचन्द्रः प्रकाशते। नेदं मुखं चन्द्रोऽयम् इत्यपह्नुतिः। मुखं ते चन्द्रं मन्ये इत्युत्प्रेक्षा। इत्येवम् उपमा-प्रस्तारेण सर्वेऽलङ्कारा निरूपणीया इत्यलम्।

किम्बहुना स्त्री हि उपमा नर्तकी तत्तद्भूमिकया सर्वानिवालङ्कारान् प्रायो नाटयति सादृश्यमूलान् इति विदाङ्कुर्वन्तु। (विषयं तु उपमेयम्। विषयि उपमानम्।)

भारतीयाः कवयो नरनारीव्यवहारं जडचेतनयोर्मध्ये सर्वत्रैव दर्शयन्ति। कवि-सम्राट् कालिदासस्तु शब्दत एव समुद्गिरति—

"शशिना सह याति कौमुदी, सह मेघेन तडित् प्रलीयते।
प्रमदा पति-वर्त्मगा इति, प्रतिपन्नं हि विचेतनैरपि॥"

इत्येवं भारतीयपरम्परायां नरनार्य्योरभेदं सर्वे समुद्गिरन्ति। तथापि पाश्चात्य-शिक्षाविषमूर्च्छिताः साम्प्रतिक्यो भारतीया महिला भवानी-पद्मा-ब्रह्माणी-सीतासावित्री-बहुला-पद्मिन्यादि-भारतीयादर्शनारीणां दिव्य-भावानुकृतिं हायं हायं पाश्चात्यानुकरण-तुष-कण्डने व्यासक्ता इति दर्शं दर्शं विषीदति चेतः।

अन्योक्तौ नारी

उद्यानपालेन मुधाभिमानिना, [1]क्वतर्कि मिथ्यैव सुधारमानिना।
लता तरोराश्रयतः सुपुष्पिता, प्रवर्द्धमाना जनताभिनन्दिता॥१॥

स्वातन्त्र्य-बुद्धया तु तरोरपा[2]कृता,
तस्यै स्वतन्त्रत्वमदायि [3]कल्पितम्।
सा वै विनष्टा जनपादमर्दिता-
ऽप्यभूद्वराकी [4]वनगर्त-गामिनी॥ २॥

अन्योक्तिरलङ्कारो यथा—एक उद्यानरक्षकः (माली)। कापि समीचीना पुष्पिता वृक्षाश्रिता प्रवर्द्धमाना उद्यानलता विद्यते यां जनाः

१—क्वतर्कि = कु इति अव्ययम् कुत्सितार्थे। कु = कुत्सितं अतर्कि तर्कः कृतः। कर्मणि लुङि रूपम् २—अपाकृता पृथक् कृता। ३—लतायै तादृशं स्वातन्त्र्यं कल्पितम् एव मिथ्या-विडम्बितमेव। यतो हि "निराश्रया न तिष्ठन्ति। पण्डिता वनिता लताः" इति हि वास्तविकं विज्ञानम्। ४—वन-गर्त-गामिनी वने गर्तम् तत्र गामिनी। पक्षे रहसि पुरुषान्तराश्रयेण अधोमार्ग-गामिनीति कु-मार्गाश्रयिणीति सर्वमूह्यं मर्मज्ञाभिरित्यलम्।

वर्णयन्ति अहो कीदृशीयं लताऽतिसुन्दरी वृक्षाश्रिता साधु दैनन्दिनं प्रवर्द्धमाना शोभते । इति तामेव लताम्—आः ? इयं स्वतंत्रा भवतु कथं वृक्षाश्रिता तिष्ठति । इति बुद्ध्या वृक्षादुत्तार्य्य भूमौ करोति । सा तु तत्रापि प्रवर्द्धते । परन्तु जनैः पथिकैः पादाक्रान्ताऽपि भवति । तत्र गर्तमस्ति चेत् तत्राऽप्यधो गच्छत्येव । इत्थं हि साम्प्रतिकाः सुधारकाः स्वातन्त्र्यप्रवर्तका भारतीय-नारीणां दशां विगुणयन्ति । यथा पाश्चात्यविद्याविष-मूर्च्छिता नार्य्योऽधुना स्वातन्त्र्य-प्रियाः स्वपुरुषाश्रयं विहाय प्रवर्द्धमाना अपि पुरुषान्तर-सम्पर्क-दूषिता गर्तगा अपि कुमार्गगा अपि भवन्ति । इति मर्मज्ञ-विदितो वृत्तान्तः । इत्यलम् ।

शब्दव्युत्पत्त्या नारीमहत्वम्

१—वैदिको नारीवाचको **मेना**शब्दः । तस्य व्युत्पत्तिः—जना मानयन्ति एनाम्[1] इति मेना, इत्यतः सूच्यते यत् जनैः समादरणीया नार्य्यः । २—**स्त्री**शब्दः । 'स्त्रियः स्त्यायतेः अपत्रपणकर्माणः' इति (निरुक्तम् ३।२१), दुर्गव्याख्या—लज्जार्थकस्य लज्जन्तेऽपि ताः—इति । पातञ्जलभाष्यम्—स्तन-केशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः । 'स्त्यायति अस्यां गर्भः । शुक्र-शोणितम् वा' इति स्त्री, उभयथापि गर्भ-पोषणं फलति । अन्यथापि पतञ्जलिना व्याख्यातम्—शब्द-स्पर्श-रूप-रस-गन्धानां स्त्यानं समुच्चयः स्त्री, इति । निरुक्तेऽपि—'स्त्रिय एव एताः शब्द-स्पर्श-रूप-रस-गन्ध-हारिण्यः ।' (निरुक्ते १४-२०) स्त्रीषु एतेषामुभयथापि वैशिष्ट्यं दृश्यते—एतत्प्रिया अपि ता भवन्ति । स्त्रीगता अपि एते विषया आकर्षन्ति पुंसः । इति । ३—**योषा**शब्दः—यौतेः मिश्रणार्थस्य । सा हि मिश्रयति आत्मानं पुरुषेण साकम् ।' इति (निरुक्तम् ३।१५।१) 'न वै योषा कंचन हिनस्ति' इति (शत० ब्राह्म० ३।६।१।४) अतस्ता अपि न कोऽपि हन्ति ।' इति सिद्धान्तः । 'जुषतेः कथन्न स्यात् जुषी प्रीति-

---

१—मनसः णयन्तस्य एनाशब्देन योगे मानि + एना इत्यत्र आनि इत्यस्य लोपे निपातिते मेना-शब्दः ।

सेवनयोः । जुषते प्रीणाति सेवते वा पुरुषान् इति योषा पचादित्वादचि टापि रूपम् । सेविका प्रीतिदा हि नारी सर्वात्मना दृश्यते जगतः । मातृ-भावेन पुत्रान् भार्य्या-भावेन भर्तारम् पुत्री-भावेन पितरौ आनन्दयति हि सा सेवतेऽपि च स्वभावादिति संवादः । ४—**नारी**शब्दः–'नुर्धर्म्या नारी नरस्य वा सेति' (महाभाष्यम् ४।४।६) इत्यर्थे नृ शब्दात् 'ऋतोञ् ४।४।४६' इति अञि 'अचोञ्णिति ७।२।११५' इति वृद्धौ नार-शब्द-सिद्धौ 'टिड्ढाणञ्० ४।१।१५' इति ङीपि नारी । अथवा 'नरस्य चेति वक्तव्यम् ४।४।४६' इति वार्तिकबलात् नरशब्दादञि 'तद्धितेष्वचामादेः ७।२।११७' इति आदिवृद्धौ 'यस्येति च ६।४।१४' इति अलोपे स्वरयोगे ङीपि पुनरलोपे नारी । अथवा नुः स्त्री नारी इति विग्रहे नृशब्दात् 'नृनरयोर्वृद्धिश्च ४।१।४८' इति वार्तिकबलात् ङीनि नृगतस्य ऋकारस्य वृद्धौ नारी । अथवा नरस्य स्त्री नारीति विगृह्य नरशब्दात् तेनैव वार्तिकेन ङीनि वृद्धौ च 'यस्येति च ६४।।१४८' इति अकारलोपे नारी-शब्दसिद्धिः । अथवा 'नरा नृत्यन्ति कर्मसु यासां कृते इति नारी' (निरुक्तम् ५।१।३) न अरिः यस्याः सा नारिः वीराणामुपकारित्वाद् इति ह्रस्वेकारान्तोऽपि नारि-शब्दः (सायणभाष्य तै० आ० ४।२।१) इत्येवं नारी-शब्दः सर्वथा नरैरेव सम्बध्नाति । इत्यभेदस्तयोः । ५—**वामा**-शब्दः—वयति सौन्दर्य्यमिति वामा स्त्री । अत्र वय् धातोः बाहुलकात् कर्तरि घञि उपधावृद्धौ यस्य मकारे निपातिते रूपम् । वाम-भाग-भागित्वादपि वामा । पुरुष-विलोम-कार्य्यकारित्वादपि वामा । पुरुषा गर्भधारणादिकार्य्यं कर्तुमसमर्थाः तत्तेषां प्रकृति-विलोमं कर्म स्त्रिय एव कर्तुं समर्थाः । पुरुषा दक्षिण-भागाधिकारिणः स्त्रियश्च वामभाग-प्रधाना इति कार्य्य-सूचकोऽयं शब्दः । ६—**सुन्दरी**शब्दः–सुष्ठु उन्दयति क्लेदयति पुरुषमनः इति सुन्दरी । सु पूर्वकात् उन्द धातोः उणादौ अरन् प्रत्ययेऽनुबन्धलोपे धातोः उकारलोपे निपातिते सुन्दर-शब्दाद्गौ-रादित्वात् ङीषि सुन्दरीति शब्दसिद्धिः । इत्येवं पुरुषोऽपि सुन्दरः स्त्री-मनःक्लेदको भवतीति परस्पर-मनो-विक्लेदकयोः तयोः सह-शिक्षा तु

प्रकृतिविरुद्धैवेति न भारतीयैरत्रविषये पाश्चात्यानुकृतिः कार्य्या। उक्तञ्च मनुना—

'घृत-कुम्भसमा नारी तप्ताङ्गारसमः पुमान् ।
तस्माद् घृतञ्च वह्निञ्च नैकत्र स्थापयेद् बुधः ॥ १ ॥

७—**अबला**-शब्दः । अल्पं बलं (शारीरं) यस्याः सा अबला इति तासां शारीरं बलन्तु अल्पं भवति अत्र अल्पार्थे नञ् । मानसं बौद्धं बलन्तु अत्यधिकं पुरुषापेक्षया समुदीरितम् । तथाहि—

'उशना वेद यच्छास्त्रं यच्च वेद वृहस्पतिः ।
स्वभावेनैव तच्छास्त्रं स्त्री-बुद्धौ सुप्रतिष्ठितम्' ॥ २ ॥

इति शारीरिक-बलाल्पत्वेऽपि बौद्धबलेनाभ्यर्हिता सुतराम् एवैताः पुरुषेभ्य इति सुनिर्णीतम् । ८—**प्रमदा**शब्दः–प्रकर्षेण मदयन्ति नरान् इति प्रमदाः । प्रपूर्वकात् मदिण्यन्तधातोः चुरादिस्थस्य मितः अचि णि-लोपे टापि प्रमदाः । प्रकृष्टो मदोऽस्ति अस्यामिति विग्रहे बहुव्रीहिणापि । 'प्रमदसम्मदौ हर्षे ३।३।६८' इति सूत्रसिद्धप्रमदशब्दात् 'अर्शादिभ्योऽच् ५।२।१२७' इत्यचि टापि कृतेऽपि प्रमदाशब्दः सिद्ध्यति । तेन स्वस्यां हर्षाधिक्यात् सा सर्वदा स्वयं हृष्टाऽन्यान् अपि हर्षयत्येवेति यथार्थनाम्नी सा कथ्यते । मयाऽप्युक्तम् तासां सर्वाभ्यर्हितत्वात्—

गृहिणी सचिवः सखी मिथः प्रिय-शिष्या ललिते कलाविधौ ।
अवदत् कवि-कालिदास आः गृहिणी-सूलमहं जगद्ब्रुवे ॥ इति ।

९—**महिला**शब्दः–मह्यते पूज्यते इति महिला । महधातोः इलचि प्रत्यये टापि महिलेतिशब्दः पूज्यधिया तासु प्रयुज्यते । तथाहि मनुः—

पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा ।
पूज्या भूषयितव्याश्च बहुकल्याण-काङ्क्षिभिः ॥ (३।५५)

१०—**दुहितृ**-शब्दः–दुहिता दुर्हिता दूरे हिता । दोग्धि पितरम् (पितुः सकाशात् धनादिकमिति) दुःखाय हि ता (निरुक्तम् ३।४।४) दुर्लभं दुःखेन सम्पाद्यं वाहितं यस्यै सा दुहिता । यतो हि पतिगृहे पूर्वं स्वभा-

चाऽपरिज्ञानात् श्वश्रूः वाञ्छन्ती अपि स्नुषा-हितं कर्तुं न पारयति। स्नुषाऽपि लज्जापरवशा स्वहितं कारयितुं कयापि स्त्रिया नार्हति। ननान्दा तु न नन्दयति भ्रातृजायाम् इति स्वशब्दार्थमेव समन्वयतीति कुतः सुखं परगृहं गताया दुहितुः। अग्रेऽपि मातृत्व-प्राप्तौ का को वा तद्धितं कुर्य्यात्। सैव सर्व-हितं साधयितुं रात्रिन्दिवं व्यग्रा तिष्ठति। उक्तञ्च मनुना—

'यं माता-पितरौ क्लेशं सहेते सम्भवे नृणाम्।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि॥'

इति सर्वथा प्रियतरः पुत्रोऽपि यदा मात्रे सुखं दातुमसमर्थ एव तर्हि कोऽन्यो भुवि तस्यै सुखं दद्यात्। एवं यावज्जीवं पितुर्दुहितुः सुखं दुर्लभमेवेति साधूक्तं दुहिता दुहिता। सम्प्रति दूरे हिता दुहिता, इति व्युत्पत्तेरर्थः सङ्गमनीयः। स चैवं सन्तान-स्वास्थ्य-सम्पत्त्यर्थं दृढ़तर-सन्तान-लाभाय च दूरस्थयोरेव वरकन्ययोर्देशेन गोत्रार्षाभ्यां च सम्बन्धः शुभदो भवति। इति विज्ञ-सम्मतः सिद्धान्तः। तथाहि मिथिला-साकेतस्थयोः सीता-रामयोः गान्धारेन्द्रप्रस्थयोश्च गान्धारी-धृतराष्ट्रयोः मद्र-हस्तिनापुरस्थयोश्च माद्री-पाण्ड्वोः पुरातनः सम्बन्धः संघटितो दृश्यते। 'दोग्धेर्वा' इति निरुक्त-निर्वचनात् दुग्धे सर्वान् पित्रोः कामान् इति विग्रहे दुहधातोः तृच् प्रत्यये इटि गुणाभावे च निपातनात् कृते दुहितृ-शब्द-सिद्धिः। दुर्गाचार्य्यस्तु स्वकालोचितं भावं वक्ति यत् दुग्धे स्वपितुः सकाशाद् द्रव्यम्। अतो दुहितेति। तत्र मे वक्तव्यं विद्यते किं सैव पितुः सकाशात् द्रव्यं दोग्धि। पुत्रो न दुग्धे किमु? सा तु वराकी यावत् पितुः गृहे तिष्ठति तावदेव यदि किञ्चिद् द्रव्यं स्व-वस्त्राभरणादि-निर्माणोपयोगि दुग्धे चेद् वक्तुं शक्यते दुहिता द्रव्यं दोग्धि पितरम्। परन्तु पुत्रस्तु यावज्जीवं पितृद्रव्यं दोग्धि तर्हि स कथन्न दोग्धा कथ्यते। अतो हि दुर्गाचार्य्योक्तिर्न मां साधु प्रतिभाति। अहन्तु एतदेव कथयिष्यामि यापि मात्रे पित्रे च सर्वान् कामान् दोग्धि सा हि दुहिता। पश्यन्तु शास्त्रे कन्यादानफलं 'सर्वकामदोग्धृ कन्यारत्नम्' इत्युद्घोषितं

विद्यते। अतश्च प्रत्यक्षमेव माता-पित्रोः सर्व-काम-दोग्ध्री सिध्यति दुहिता। अन्यच्च यदा सा स्वगुणैः पतिगृहे माता-पित्रोः स्व-मातृ-कुलस्य च प्रशंसां कारयति। यदियं वधूः साध्वी गुणवती लक्ष्मी-स्वरूपैव मद्गृहे समागता। इत्यादि श्वश्रूः तां प्रशंसति। तर्हि सा 'कृपणं दुहिता ज्योतिः पुत्रः' इति कथनस्य पात्रम् अस्ति किम्। अहन्तु कथयिष्यामि यथा पुनातीति पुत्रः तथैव पुनाति प्रीणाति चेति पुत्री इतिवत् दुहितृ शब्दोऽपि 'दुग्धे सर्वान् कामान् माता-पित्रोः कृते' इति दुहिता। 'कृपणं दुहिता ज्योतिष्पुत्रः' (दुहिता दुःखदा पुत्रः सुखदः) इत्यादि जगति विलोमभावस्तु जनार्दन-शिव-शब्दवदेव विगुणितो जातः। नहि तत्र सार्थक्यं किञ्चित्। पश्यन्तु श्री-हर्ष-वाक्यम्—

'धियात्मनस्तावदचारु नाचरं जनस्तु यद्वेद स तद्वदिष्यति।
जनावनायोद्यमिनं जनार्दनं क्षये जगज्जीवपिबं शिवं वदन्'॥
(नै० ६।१२४)

इत्थं हि या दुहिता स्वकृते दुर्लभहिता जन्मान्तं स्वकृते हिताहितं[1] पुम्भिःकृतमलभमाना स्वयं सर्वथाऽन्यहितमेव करोति सा हि जनैः 'कृपणं दुहिता ज्योतिः पुत्रः' इत्युपह्लियते। इत्यहो विपरीतं जगत्।
११—**जाया**शब्दः—यस्यां जायते सा जायेति विग्रहे जन्धातोः अधिकरणे औणादिके डाय-प्रत्यये डित्वादभस्यापि टेर्लोपे जायेत्यतः टापि जाया-शब्द-सिद्धिः। शास्त्रेऽपि इयं व्युत्पत्तिः 'पतिर्जायां प्रविशति गर्भो भूत्वेह-मातरम्। तस्यां पुर्नवो भूत्वा दशमे मासि जायते।' 'तज्जाया जाया भवति यदस्यां जायते पुनः' (बह्वृच् ब्राह्मणे) मनुरप्येतां व्युत्पत्तिं समर्थयति—

'पतिर्जायां सम्प्रविश्य गर्भो भूत्वेह जायते।
जायायास्तद्धि जायात्वं यदस्यां जायते पुनः॥' (६।८)

इत्थं हि जाया शब्दो बहु-गौरवं ददाति स्त्री-वर्गाय। पुत्रोत्पत्य-

---

१ हितम् च आहितम् च इति हिताहितम्।

नन्तरं पत्नी पत्युर्हृदयाधिष्ठात्री देवी गण्यते। पुत्रस्य मातोच्यते। पितुः ऋणविमोचिका कथ्यते। राष्ट्राय रत्नदाभिधीयते। इत्येवं सर्वमान्या नारी कथमात्मानं न वेत्तीति आश्चर्य्यम्। १२—**मातृ**-शब्दः—नरैर्मान्यते या सा माता इति विग्रहे मन् धातोः कर्मणि तृच् न-कारस्याकारे दीर्घे च औणादिको मातृशब्दः। मातृ पदं हि नारीणां बहुप्रतिष्ठास्पदं विद्यते। को हि मातृपदं निर्वक्तुमर्हति ? यत्र हि मान्यत्वं पूज्यत्वं समाराध्यत्वं देवीत्वं स्नेह-मयीत्वं जननीत्वम्। किं किं वच्मि सर्वं हि गौरवपदमस्मिन् मातृपदे निविष्टं विद्यते।

एतस्यैव मातृपदस्य प्रभावान्नारी सर्वमपि जगद्दुःखं तृणवद् गणयति। अतो हि नारीभिरेतत्प्रतिष्ठापदं प्रयत्नेन रक्षणीयम्। मातृ-पादयोरन्तिके समुपेत्य पुत्रस्य सर्वे भावा विलीयन्ते। नार्हति पुत्रः किञ्चिदपि तत्र वक्तुम्। अतो हि साधुगीतं केनचन—

'सदैव रक्ष्यं महतः प्रयत्नान्नारीव्रजैर्मातृ-पदं वरिष्ठम्।
पुंसां बहिः सर्व-विचेष्टितं तत्समाप्यते मातृपदे समेत्य'॥ १॥

मार्कण्डेयेनापि मुनिना—

'या देवी सर्वभूतेषु मातृरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः'॥ २॥

इत्यहो जगति सर्वाभ्यर्हितं मातृत्वम्—

'रामकृष्णादिभिर्देवैर्मातृत्वं वन्दितं सदा।
सृष्टिमूलं हि मातृत्वं लोके केनोपमीयते'॥ ३॥

तथा हि—

नारीमहत्वं विविदन्ति ते बुधा
ये भारतीयाः कुलजाः [1]सु-संस्कृताः।
नीचा नरा आसुरवृत्तयश्च ये
कथं विदुस्ते महिलार्य्यगौरवम्॥ ४॥

---

१. सुशिक्षिता।

का नारी-देश-सेवा[1] स्यात्

साम्प्रतिकाः पाश्चात्य-शिक्षा-दीक्षा-दीक्षिताः पुमांसो नारीणामपि तामेव देशसेवां प्रशस्तां मन्यन्ते, यस्यां पुंसानुकरणं स्यात्। संक्षेपेण यत्र यत्र कर्मणि देशसेवा-समाजसेवा-शिक्षाप्रभृतिदैशिके कार्य्ये पुरुषा व्यापृतास्तथैव स्त्रियोऽपि व्यापृताः स्युः। तदैव तु ता अर्द्धाङ्गिन्यः स्युः पुरुषाणामर्द्धभारहारिण्य इति। तदैव हि देशस्यान्तिमोऽभ्युदयो गण्यते। इति पूर्वपक्षः सुधारकाणाम्। तत्रोत्तरपक्षस्तु नेयं सेवा नारीणां देश-सेवा, इदं तु नारीणामप्राकृतं कर्म। पुरुष-स्पर्द्धया तदनुकरणमात्रं-स्वधर्मविरुद्धं मातृत्वापमानकरमात्मवञ्चनामात्रम्। ईदृश्या सेवया तु नारी स्वात्म-विनाशेन सह देशविनाशमपि करिष्यति, दूरं गमिष्यति देशसेवा। शृण्वन्तु विस्तरेण नार्य्यः—

एक-रथस्य चक्र-द्वयवद् इह सृष्टिरथस्य दम्पती (स्त्रीपुंसौ) चक्रद्वयम् स्तः। तत्र स्त्री वामभागे नियुज्यते। पुरुषो दक्षिणभागे। वामचक्रं नारी दक्षिणचक्रं नरः। योगप्रापकः पुमान् क्षेमनिपुणा नारी। अर्जकः पुमान् रक्षिका नारी। इमौ हि पृथक्कर्माणौ नैककर्माणौ। विकर्षकः पुमान् आकर्षिका नारी। ब्रह्मदेवसृष्टौ या नारी यथासमयं पुंसंयोगमा-साद्य गर्भधारण-पोषणादिना महता प्रयत्नेन सन्तानमुत्पाद्य तं च दृढ़गात्रं साधुचरित्रं सुयोग्यं लोकव्यवहारक्षमं विधाय देशाय समर्पयति चेत् कृता तया समीचीना देशसेवा। देशाय सुयोग्य-सन्तान-समर्पण-मेव नारीणां देशसेवेति सिद्धान्तः।

सन्ताने योग्यता नैभिः सुधारकोक्तैः पूर्वोक्तकर्मभिरायाति। तत्र तु तपसोऽपेक्षाऽस्ति। तपश्च तत्र स्वात्मसंयमः। ऋतुकालादारभ्यैव संयमशिक्षा मन्वादिभिराचार्य्यैरभिहिता। तथा हि—

१—नारीणां देशसेवा नारी-देशसेवा। नारी-कर्तृका देश-सेवा। अत्र कर्तरि षष्ठी। देशस्य सेवा देशसेवा अत्र कर्मणि षष्ठी। सर्व सरलं वाक्यम्। लोकेषु व्यवहारः लोकव्यवहारः, तत्र क्षमः लोकव्यवहारक्षमः तम्।

'न प्राणिहिंसनं कुर्यान्नापशब्दं क्वचिद्वदेत् ।
नापि क्रुद्धा शपेत् कश्चित्सर्वथा संयता व्रजेत् ।'

इत्यादि श्रेष्ठसन्तानोत्पादनोपायप्रकरणोक्तं सर्वं द्रष्टव्यम् । सन्ताने च गर्भस्थे [1]'स्वाभीष्ट-गुणासञ्जनाय तद्योग्यसाहित्य-पाठकरणं हरिवंश-कथादि-श्रवण-कर्माद्यनुष्ठेयं स्यात् । जाते च सन्ताने वर्षत्रयावधि तद्रक्षण-पोषण-शिक्षणादि-व्यापारे निमग्नाया मातुः कथं पुरुषानुकरणावसर इति विमर्शनीयं मनीषिणीभिः मनीषिभिश्च । अतश्च—

'स्वीयं समग्रं करणीयमुत्तमं
सन्तान-शिक्षादिकमीश्वरार्पितम् ।
नारी विधत्ते यदि शिक्षिता हृदा
सा देशसेवा महिलागणोचिता[2] ।।

या हि गार्गीवत् ब्रह्मचारिणी सा तु पुरुषतोऽप्यधिककृत्यकारिणी स्यान्नाम । नास्ति तत्र निषेधस्तथा जातसन्ताना गृहधर्मत उपरतापि सर्वं कर्तुमर्हति । इत्यलम् ।

१—स्वस्या अभीष्टाः स्वाभीष्टाः स्वाभीष्टाश्च ते गुणाः स्वाभीष्टगुणाः तेषां आसञ्जनम् स्वाभीष्टगुणासञ्जनम् तस्मै । तस्य स्वाभीष्ट-गुणासञ्जनस्य योग्यः साहित्यपाठः तस्य करणं हरिवंशस्य तन्नामक-पुस्तकस्य पाठः तस्य करणम् । कथा आदिर्यासां ता हरिवंशकथादयः भागवत-दुर्गासप्तशती-मार्कण्डेयपुराणादि-कथाः तासां श्रवणं तस्य कर्म आदि यस्य तत् श्रवण-चिन्तनपरिशीलनमनुष्ठेयं सम्पाद्यं स्यात् । २—महिलानां गणः महिला-गणः तस्य उचिता योग्या । यदि ईश्वरेण अर्पितं नारीणां कृते कर्तव्यत्वेन विहितम् सन्तान-शिक्षादिकं स्वं स्वीयं नैजं स्त्रीजनोचितं करणीयं कर्तव्यं च शिक्षिता नारी विधत्ते तर्हि सैव देशसेवा तदयोग्येति पिण्डितार्थः । ब्रह्मचारिणीनां निवृत्तगार्हस्थ्यकृत्यानां तु यथेच्छम् ।

श्रेष्ठ-सन्तानोत्पादनोपायाः[१]

या पूर्वप्रकरणे निर्दिष्टा ऋतुकालादारभ्यैव संयमशिक्षा मन्वादिभिराचार्य्यैरभिहिता सेह तच्छ्लोकैरेवावशिष्टा निर्दिश्यते—

न मिथ्याभाषणं कुर्याद्वञ्चनां न क्वचिच्चरेत् ।
न हि लोमनखे छिन्द्यान्नापवित्रा क्वचिद्व्रजेत् ॥
निमज्योन्मज्य न स्नायान्न दुष्टैः सह सँल्लपेत् ।
अधौतवस्त्रं माल्यञ्च निर्माल्यञ्चापि नो हरेत् ॥
नोच्छिष्टं शूद्र-पानीयं न पर्युषित-नीरसम् ।
रजस्वलाभिदृष्टं वा नाद्याद्भोज्यन्तु गर्भिणी ॥
नाञ्जयेन्नयने नोच्चैः शृणुयात्क्रूरभाषितम् ।
दक्षिणा भृतसम्भारा सदा हि प्रियभाषिणी ।
सुसन्ताना भवेन्नारी नापि प्रसवदुःखिनी ॥
पतिं विप्रं च लक्ष्मीं च गां देवांश्च समर्चयेत् ॥
सदाचारवती नारी श्वश्रू-श्वशुरसेविका ।
स्वाध्याय-निरता गेहावश्यकर्मरता तथा ॥
न भाषमाणा नावस्त्रा नार्द्रपादा शयीत सा ।
नोदक्-प्रत्यक्छिराश्चैव नोत्कटा नापवित्रिणी ॥
प्रातः स्नाता धौतवस्त्रा मङ्गलाचार-संयुता ।
भुक्त्वोच्छिष्टमुखी केशान्नासंयम्य क्वचिद्भ्रमेत् ॥

१—इमे सर्वेऽप्युपाया वैज्ञानिकाः सन्ति । यदा नारी ऋतुमती जायते । तत्कालत एवमे पालनीया भवन्ति । यदि दैववशादिमे पालिता न भवन्ति तदा विगुणितः सन्तानो जायते । यथा यदि ऋतुमती प्राणिहिंसनं करोति चेत् सन्तानो मृत उत्पद्यते । भाग्यवशान्न मृतश्चेदल्पायुर्भवति । अपशब्दं कुवाक्प्रयोगं न कुर्य्यात् । यदि करोति चेत्तदा सन्तानो गद्गदायते (तोतलायते हकलायते वा) क्रोधं कृत्वापि कंचन न शपेत् कुवाक्यं न प्रयुञ्जीत । तत्करणेऽपि सन्तानः चिड़चिड़ा-प्रकृतिको जायते । मिथ्या-भाषणात्

नारीणां स्वास्थ्यरक्षा

या नार्य्यो विमला विशुद्धमतयः शश्वत्परिश्रामिकाः ।[१]
रागालापपरायणाः प्रहसनप्राहासनादि-प्रिया ।।
श्लोकानां पठनेऽनुरक्तरसनाः पाकप्रियाः प्रोन्नता—
स्ताः स्वस्थाः शिशु-सम्भृताः सुमनसो मान्याः सदा श्रीसमाः ।१।

तत्र प्लेटो मतम्—

स्व-सन्तानकृते धनदानापेक्षया सच्चरित्रता-प्रदानं मातापित्रोः परमं कर्तव्यम् । तच्च पितुरपेक्षयाऽनायासतो माता ददाति-इति मातृपदं प्रोन्नतं सन्तानशिक्षणे । **प्लाट**मतम्—स्त्रीकृते यौतुकदानमावश्यकं तत्र श्वश्रूगृहं गच्छन्त्यै कन्यायै मातृगृहात्सच्चारित्यं स्वास्थ्यसौन्दर्यं समुपलब्धश्चेत्सर्वं यौतुकं समुपलब्धमिति में मतिः (यौतुकं=दहेज इति)

सन्तानोऽपि तादृगेव भवति । वञ्चनाकरणेन वञ्चको जायते । नखलोमच्छेदेन कुनखी कुलोमी । क्रूर-शब्द-श्रवणेन बधिरः नेत्राञ्जनेनान्धो जायते । उद्वर्तनेन तैलमर्दनेन स्वित्ररोगवान् (चरकरोगी) एवमेव सर्वस्यापि निषेध्यस्य सूक्ष्मा प्रतिक्रिया भवति सन्तानोपरि कस्यापि, गर्भिण्युपरि कस्यापि । इति निर्णयः । एवं स्थितौ स्त्री कथं पुरुषानुकारपरा स्यात् सा तु सन्तानप्रधाना सन्तानोत्पादन-यन्त्रिकैवास्ति । कथं गृहादितस्ततश्चलिष्यति । इति विमृशन्तु सुधियः । साम्प्रतिक्यो नार्य्योऽत्रावधानं ददति न हि । अत एवेदानीं सन्तानास्तासां भ्रष्टचरित्रा जायन्ते । सतीनामेव सन्ताना दीर्घजीविनः शिष्टाश्च भवन्ति । नासाध्वीनामित्यपि विज्ञानम् ।

१—शश्वत् सर्वदा परिश्राम्यन्ति परिश्रामिका । श्रम धातोः 'ण्वुल्तृचौ ३।१।१३२' इति ण्वुल्प्रत्ययेऽनुबन्धलोपे 'युवोरनाकौ ७।१।१।' इति अकादेशे उपधावृद्धौ 'अजाद्यतष्टाप् ४।१।४' इति टापि पूर्वाकारस्य इत्वे रूपम् । प्रहसनम् प्राहसनं प्रियं यासां ताः । अनुरक्ता रसना यासां ताः । प्रकर्षेण उन्नताः प्रोन्नताः । श्रीभिः समाः । अग्रे स्पष्टम् ।

स्टीलमतम्—स्त्रीषु शीलाभावः सर्वं सौन्दर्य्यापहारकः। तत्र शीलं नास्ति चेत् सौन्दर्यमकिञ्चित्करम्, चातुर्य्यं घृणास्पदम्।

नारीस्वास्थ्यनाशे हेतवः

परिश्रमाभावो यावद्दिनं [1]व्यर्थोपवेशनशयने। शृङ्गारं कृत्वा गृहाभ्यन्तरे निर्व्यापारं व्यर्थदिनयापनम्। यथासमयं कृत्याकरणम् असमयभोजनम् भूयो भूयः कुपथ्य-सेवनम्। अधिक-विषय-सेवनेन [2]प्रदरादिव्याधिपारवश्यम्। असूया-मात्सर्य्य क्रोध-कुभावादि-पारवश्यम्। या स्त्री सम्भृत-परिवारा पर्य्याप्तभोगापि पेषणमार्जन-लेपन-गृह-सज्जीकरणादि-व्यापारवर्जिता सैव रोगिणीति संक्षेपः।

सांप्रतिकडाक्टरवैद्यमतम्

या स्त्री[3] पेषण-यन्त्र-कण्डनी-तर्कुचालनादि-कार्य्य-जातमनुतिष्ठति। सा सर्वदैव सुदृढकाया सुवदना सुन्दरमुखी प्रफुल्लनयना सुखप्रसवा सुसन्ताना प्रसन्नमनाः तिष्ठति। नाभिभवन्ति तां रोगाः। पति-पुत्र-पौत्र-भृत्यैः सह बहिर्वायु-सेवन-परा स्वगृह-हर्म्योपरि वा प्रातर्भ्रमणकरी न व्यथते कदापि। नदी-स्नानपरा मसृणकाया सुस्तनी नीरोगा दीप्त-मुखी भवति। संयत[4]विषया अनत्य[5]धिकभूषणा[6]शृङ्गाराव्यसना [7]परिश्रमप्रिया नारी सुखिनी सन्तानवती स्यादेव। पूजापरा भक्तिमती श्वश्रू-सेवारता पतिपरायणा परिजनदक्षिणा स्वाध्यायाध्ययनशीला शुद्धाचारा स्वच्छवस्त्रा स्नानवती नारी पर्य्याप्तानन्दा स्यात्—

१—उपवेशनं च शयनं च उपवेशनशयने व्यर्थे च ते उपवेशनशयने।
२—प्रदरादयश्च ते व्याधयः प्रदरादिव्याधयः तेषां पारवश्यम् अधीनतेति।
३—पेषणयन्त्रं च कण्डनी च तर्कुचालनं च तानि पेषणयन्त्रकण्डनी-तर्कुचालनानि आदिर्येषां तानि पेषणयन्त्र-कण्डनी-चर्कुचालनादीनि कार्याणि तेषां जातम् समूहम्। ४—संयतः नियमबद्धो विषयो यस्याः सा। ५—न अत्यधिकम्। अनत्यधिकं भूषणं यस्याः सा अनत्यधिकभूषणा। ७—शृङ्गारः अव्यसनं यस्याः सा शृङ्गाराव्यसना। ७—परिश्रमः प्रियो यस्याः सा परिश्रमप्रिया।

आ[1]हार्य्य-शोभा-रहिताप्य[2]मायाः, न चोन्न[3]तोपानदुपावृताङ्घ्री ।
प्रसिद्धनारी-चरितानुरक्ता स्वस्थार्य्यनारी गृहकार्य्यसक्ता ॥

स्त्रीणामाह्निका व्यायामाः

ऋजुदण्डायमानस्थिता श्वासं नियम्य वक्षःस्थले वायुं नासिकाभ्यां प्रपूर्य्य पुनस्तं तथैव नासिकाभ्यां निःसारयेद् दशकृत्वः करणे व्यायामपूर्तिः । दण्डायमाना प्रोन्नता संसक्ताग्रपादा गुल्फे उन्नते कृत्वा द्विः चलनं व्यायामः । तथैव दण्डायमाना ग्रीवां शनैः शनैः चालयेत्तद्ग्रीवाचालनं द्विस्त्रिः कुर्य्यात् । कण्डनी-पेषणी-तर्कु-चक्रचालन-मार्जनादि-गृह-कृत्यं नारीणां प्रथमं प्रधानं व्यायामकर्म इति संक्षेपः । एवं सर्वर्तुव्यापारा सन्तानपोषणपरा पतिपरायणा श्वश्रूप्रसादिका ननान्द्रदेवरमान्या नारी स्वस्था प्रसन्ना नीरोगा समयर्तुमती शुद्धार्तवा शुद्धरक्तसञ्चारा सुस्तनी सर्वकल्याणदा सदा स्यात् ।

[4]विपरीत लक्षणानि

[5]अभद्रा अभद्रज्ञाना अभद्रगाना अभद्रव्यवहारा अभद्रस्थानगा नित्यं विषयोन्मुखी अकृतव्यायामा अक्रियमाणकर्मा अनियत-भोजना अमिताहारा सदा चर्वणव्यापृतमुखी चञ्चला चपला क्रूरमुखी व्यापारपराङ्मुखी कलहप्रिया पतिद्वेषिणी श्वश्रूनिन्दिका अलसा अपटुः अमृजा मूर्खा अशिक्षिता अज्ञातपाका पाकोद्विग्ना शिशुपरिचर्य्यापराङ्मुखी निरानन्दा दरिद्रा दरिद्रवसना सर्वविद्वेषिणी ननान्द्रद्विष्टा अप्रमृष्टवाक्या अपर्य्याप्तभोगा अपक्वभोजिनी बहुभाषिणी वाचाला रोगिणी वन्ध्या पत्युरप्रिया ।

१—आहार्या चासौ शोभेति कर्म-धारयानन्तरं तृतीया-तत्पुरुषः । २—अविद्यमाना माया यस्या सा अमाया 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः' इतिवार्तिकबलाद् 'अनेकमन्यपदार्थे २।२।२४' इति समासे टापि रूपम् ३—उन्नते च ते उपानहौ ताभ्यामुपावृते अङ्घ्र पादौ यस्याः सेति बहुव्रीहि । ४—स्त्रीणामुन्नति-विनाशकानि दरिद्रा-स्त्रीलक्षणानि यानि तान्येव सती-स्त्रीविपरीत-लक्षणानि गृह-कुलध्वंसकराणि कथ्यन्ते । ५—भद्रा कल्याणकारिणी

'वर्ज्या [१]कुलक्षणा नारी बहुदोषा मृषा हि सा।
दारिद्र्यवर्द्धिनी ज्ञेया दरिद्रा-रूपिणी हि सा'॥ १॥

स्त्रियो हि [२]सृष्टौ प्रथमा प्रकीर्तिताः।
शिशु[३]-प्रकर्षस्तत एव जायते।
न कुर्वते स्वीय-सुरक्षणं स्वयं
ह्यतः सुरक्ष्या जनकादिभिर्हि ताः[४]॥ १॥

[५]निसर्ग आसां पति-पुत्र-सेवने निजानवेक्षं प्रथितो धरा-तले।
नाद्यावधि प्रादुरभून्नरो भुवि स्त्रीणामपाकर्तुमृणं क्षमो हि यः॥ २॥

भारतीय नारी-सम्बन्धे

विदेशि-विदुषां हार्दोऽभिप्रायः

[६]विदेशिविद्वद्भिरुदीरिता गिरः सदावधार्या भरतावनी-स्त्रियः।
सुवर्णवर्णाङ्कित-पेटिका-स्थिताः सुरक्षणीया निज-सन्तति-प्रियाः।

१—जर्मन यात्रिण आष्टिजरस्य एका सूक्तिः—

दाम्पत्यादर्शं पूर्णतया पालयितुं क्षमा देव्यो भारतादन्यत्र दुर्लभाः।

न भद्रा अभद्रा अकल्याण-कारिणीत्यर्थः। अभद्रं ज्ञानं यस्याः सा। एवमेवाग्रेऽपि बहुव्रीहिर्ज्ञेयः।

१—कुत्सितं लक्षणं यस्याः सा। बहवो दोषा यस्यां सा हि यतः सा स्त्री मृषा मिथ्या स्त्रीगुणाभावात् सा स्त्री नैवोच्यते। किन्तु दारिद्र्यवर्धिनीत्वादि-गुणयुक्ता त्याज्यैवेति तात्पर्यम्। २—सृष्टौ प्रथमा-'स एकाकी न रमते स द्वितीय-मैच्छत्। ततोऽर्धेन नारी अर्धेन पुमान् अजायत' इत्यादि-श्रुत्या प्रथमोत्पन्ना इत्यर्थः। अथवा प्रथमा श्रेष्ठेत्यर्थः ३—शिशूनां प्रकर्षः उन्नतिः। ४—ताः स्त्रियः स्वयम् आत्मना स्वीयञ्च तत् सुरक्षणं स्वीय-सुरक्षणम् इति कर्मधारयः। ५—निसर्गः स्वभावः निजस्य स्वात्मनः अनवेक्षा यस्मिन् कर्मणि तद्यथा तथेति क्रियाविशेषणम्। अद्य अवधिः यस्मिन् कर्मणि तद्यथा तथेत्यपि क्रिया-विशेषणम्। ६—वैदेशिकानां विदुषां शब्दास्तु तेषां मातृभाषायां सन्ति। संस्कृतभाषाग्रन्थोऽयमिति ते संस्कृत-भाषायामनूदिताः सन्ति।

२—सर एफ्टीवोट: सूक्तिः—भारतीया एव नार्य्यः सवभ्यर्हितस्य स्वगौरवस्य गर्वं समुद्वोढुं क्षमाः।

३—सर फ्रीस्काइनः सूक्तिः—सौन्दर्य्यक्षेत्रे भारतीयमहिलानां प्रतियोगितायां प्रत्यवस्थातुं कस्यापि देशस्य महिला नार्हा। इति मे निश्चिता मतिः।

४—जी एचाफमैनः सूक्तिः—भारतीया देव्यः पुरुषेभ्योऽधिकाः शुद्धिभाजः कार्यकुशला धर्मनिष्ठा भवन्तीति मे सुदृढा मतिः।

५—मिस मेरी स्काटः सूक्तिः—सीता, स्त्रीत्वस्याद्भुतादर्शरूपा नारी न मयाऽधुनाऽपि परिशीलिता मनोयोगेनेति विषादो मे।

६—अनाम्नां सर्वेषां वैदेशिकानां सूक्तिसंग्रहः—कस्या अपि जातेरितिहासे स्वभर्तृषु नारीणामीदृशोऽद्भुतोऽनुरागो देशभक्तेश्चापूर्व आदर्शो नोपलभ्यते यथा राजपुत्रनारीणामुपलभ्यते। (इति कम्पनी शासकानामुक्तिः)।

(७) भारतीय-नारीणां वैभवमितिहासे एव नास्ति निहितं किन्तु किरणमयी-देव्याः कृपाणे, तारादेव्याः खड्गे, करमादेव्या बल-पौरुषे, दुर्गादेव्यास्त्यागे, पद्मिनीप्रभृतीनामग्निज्वालासु (जौहर[१] व्रते) रत्नाधात्र्या लोमहर्षण-पुत्रवलिदाने लक्ष्मीवाय्या वीरतायाम् अहिल्यावाईप्रभृतिनारीणां प्रजापालन-व्रते विद्यते जागरूकम् वैभवं तासाम्[२]।

(८) भारतीय-बालका यूरोपीय-बालकेभ्योऽधिककर्मठास्तेजस्विनश्च भवन्ति। तत्र तेषां मातृतेजांसि एव कारणानि नान्यत् किञ्चिदन्यदिति मे सुदृढो वितर्कः (कस्यचन)।

---

(१) जौहरव्रतं तत्कथ्यते यत्र वीररमण्यो युद्धे निजपतीनां विनाशं श्रुत्वा स्वयं वृहतीं चितां विरचय्य तत्राग्निं प्रज्वाल्य प्रदीप्तेऽग्नौ सामूहिकरूपेण क्रमशः पतित्वा स्वप्राणाहुतिं ददति स्म। यत् यवनानां विजेतॄणां हस्तगा न स्यु रिति। तस्यैव कृत्यस्य नाम जौहरव्रतम् इति। २—सप्तमाङ्के निर्दिष्टा वीररमण्यो हि तृतीयप्रबोधे चित्रिताः सन्ति। तत्रैव तासां चरितानि पाठ्यानि।

(६) यावद्धरातले सूर्य्यचन्द्रदीप्तिः । यावच्च भुवि मानवस्थितिस्ताव-द्भारतीय-नारीणां सतीत्वाऽख्यानं तासां गौरवगाथा च स्थास्यतः इति (बहूनां पाश्चात्यानाम् मतम्) ।

इत्थं हि भारतीय-नारीणां पाश्चात्यैःसंस्तुते सतीत्व-गौरवगाने, ते उभे अपि भारतीय-मानवानां शिरांसि प्रोन्नमयिष्यतः । तेषां बल-वीर्य्य तेजोऽभिवृद्धिञ्चातनिष्यतः । इति मदुक्तोऽवधार्य्यो भारतीयनारीभिः ।

शिखरिणी–"स्तुतायाः पाश्चात्यैर्विमलधिषणैरार्य्य-महिला,
इहत्याभिः सर्वा मनसि मननीया युवतिभिः ।
सतीत्वं सौन्दर्य्यं किमिह चरितं तैर्न हि नुतं,
स्वभावाद्याः सर्वे निरुपधि महत्त्वं प्रगमिताः ॥ १ ॥

दम्पत्योः सम्बन्धे दार्शनिकी दृष्टिः

नरो वा नारी वेति भेद-कल्पना सांसारिकी । दर्शन-शास्त्र-दृष्ट्या तु आरम्भवादे[१] वा परिणाम-वादे[२] वा संघातवादे वा विवर्तवादे (आभासवादे) वा सर्वत्रैव जीवत्वेन तु जीवावेवेमौ द्वौ । तत्र तु केवलं जड़-चेतन-भेद एव गण्यते । यथा जड़पदार्थो हि प्रकृतिः चेतनपदार्थः पुरुषः इति । परिणामवादे (सांख्यसिद्धान्ते) आरम्भवादेऽपि क्षित्यादि-द्रव्यत आरभ्य सप्तापि पदार्था जडा एव गण्यन्ते । द्रव्येषु केवलमात्म-

१—न्याय-वैशेषिकयोरारम्भवादः । २—सांख्ययोगयोः परिणामवादः । बौद्धानां सङ्घातवादः । वेदान्तस्य बादरायणमतस्य विवर्तवाद इति वाद-चतुष्टयम् । अन्येषां वेदान्तिनान्तु परिणामादिवाद एव । जैमिनेरपि नैयायिकव-देवात्मादि-तत्त्वं ज्ञेयम् ।

"आरम्भावादः कणभक्षपक्षः स कापिलः स्यात्परिणामवादः ।
सङ्घातवादस्तु भदन्तपक्षो वेदान्तपक्षस्तु विवर्तवादः ॥"
(संक्षिप्तशारीरकम्) ।

तत्वमेव चेतनम्। एवं हि संघातवादे विवर्तवादे[१] वा जीवत्वेनैव गणिता-विमौ दम्पती किम्बहुना अध्यात्मदृष्टयात्मानौ द्वौ स्त्रीपुंसौ न तत्र कोऽपि जीवः स्त्री वा पुमान् वा गण्यते। उपनिषदि श्रूयते 'त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी' इति। सत्यामस्यां स्थितौ स्त्री पुमान् भ्राता भगिनीत्यादि सर्वेऽपि भेदाः संसारचक्रचालनायेश्वर-कल्पिता मूले नास्ति कोऽपि भेद इति। तथाहि जीवलक्षणम् पञ्चदश्याम्—चैतन्यं यदधिष्ठानं लिङ्गदेहश्च यः पुनः।

चिच्छाया लिङ्गदेहस्था तत्सङ्घो जीव उच्यते।

(पञ्चदशी ४।११)

संसारचक्रचालनार्थमेव स्त्रीनियमाः पृथक्, पुरुषनियमाश्च पृथक्। अध्यात्म-दृष्टया नास्ति तयोर्भेदः। या हि स्त्री स एव पुमान्। यो हि पुमान् सैषा स्त्रीति। उपनिषदि श्रूयते 'गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच' इत्यादि प्रश्नपरम्परा तयोश्चलति। न तत्र प्रश्न उत्तिष्ठति कथमियं गार्गी स्त्री भूत्वा वेदमन्त्रान् उच्चारयति। स्त्रीयं न ज्ञानाधिकारिणीति। अध्यात्मदृष्टौ स्त्रीपुम्भेदाभावात् तत्र नास्य भेदस्य चर्चा। अन्यत्रापि तत्रोपनिषदि श्रूयते—"सा होवाच मैत्रेयी अत्रैव मा भवान् मोहान्तमपि आपिपः वा अहमिमं जानामीति। स होवाच न वा अरे अहं मोहं ब्रवीमि। अविनाशी वा अरे अयमात्मा अनुच्छित्ति-धर्मा" इत्यादि स्त्रीपुंसौ त्यक्तभेदावध्यात्मदृष्टया परस्पर-मालपन्तौ वेदमन्त्रानुच्चारयत इति।

१—वेदान्तपक्षेऽद्वैतसिद्धान्तेऽपि विवर्तवाद आभासवादः, प्रतिबिम्बवादः, विच्छिन्नवादः, भेदवादः, अभेदवादः, भेदाभेदवाद इत्यादयो बहवो भेदा अग्रेतनैः प्रवर्तिताः सन्ति। इति तत एव ज्ञेयाः। आगमिकानां शक्तिवादोऽपि परमाद्वैतवाद एव। परिणामविवर्तभेदश्चेत्थं ज्ञेयः—

सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः।
अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः।

निष्कर्षोऽयमत्र यदयं संसारो हि वासनामयः। वासना-वर्द्धनं संसारः। वासना-संक्षयः संसाराभावः। संसारः कस्मादिति प्रश्ने यास्काचार्य्यो ब्रूते संसरन्ति विषयेषु परिभ्रमन्ति जीवा यत्र स संसारः। एवं हि स्त्री-पुंसयोरनादिवासनाक्षयनिमित्तमेव विवाह-बन्धनं च क्रियते। स्त्री पतिव्रतं समाचरेत् पतिश्च पत्नीव्रतं कुर्य्यात्।

संसार-सञ्चालने नारी मुख्यस्थानं बिभर्तीति बहुशोऽभिहितं मया। तथाहि—पुरुष-सम्पर्कमासाद्य सांख्यप्रकृतिः—जगन्निर्माति 'पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्धवदुभयोरपि सं-सर्गस्तत्कृतः सर्गः।'

इति हि यथा अन्धस्थानीया प्रकृतिः पङ्गुस्थानीयं पुरुषं स्कन्धे वहन्ती सर्वं जगद्व्यवहारं चालयति। तद्वदिहापि सर्वंजगद्व्यवहारं स्त्री-निदानमीश्वरश्चालितवान्। तत्र तस्या एव प्राधान्यम्।

विवर्तवादे वेदान्तेऽपि अघटनघटनापटीयस्या मायाया एव प्रभावोऽयं यद्वशात्संसारो ब्रह्मणो विवर्ततामासादयति। इत्थं हि प्रकृतिपरिणामो वा 'इन्द्रो मायाभिः पुरुरूप ईयते' इति माया-विलासो वा भवतु। सर्वथा स्त्रिया एव प्राधान्यमुभयत्र। आगमे (परमाद्वैते) तु सर्वं शक्तिविलसितमेव जगदुच्यते।

अस्तु, आर्य्याणां विवाह-प्रथापि वासनाक्षयार्थं प्रवृत्ता इत्येव स्मरणीयं सर्वैः। अभिभावका हि वरकन्ययोः परस्परं कुलजाति-शील-रूप-गुणादिविवेकेन विवाह-सम्बन्धं द्रढयन्ति। न तु वरकन्ये परस्परं सम्बन्धयत आत्मानम्। तत्रेदमेव कारणं वरकन्ययोः परस्परमेलनन्तु रागमूलकं स्यात्तर्हि तु वासनावृद्धिरेव स्यान्नतु वासनाक्षयः। इत्यतः एवार्य्याणां विवाह-संस्कारस्य अष्टौ प्रकारा अभिहिताः।

[1]"ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽसुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥" इत्यादि!

१—ब्राह्मः दैवः आर्षः प्राजापत्यः आसुरः गान्धर्वः, राक्षसः, पैशाचः इत्यष्टौ विवाहभेदाः। तत्र पूर्वे चत्वारः शिष्टसम्मता ग्राह्या उत्तरे चत्वारो जघन्यास्त्याज्या अनार्य्यजुष्टत्वादिति।

तत्र परस्परानुरागविहितस्य गान्धर्वस्य तदग्रेननानां च त्रयाणां निषेध एव कृतोऽस्ति ।

"ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः ।
ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसम्मताः ॥ १ ॥
रूप-सत्त्वगुणोपेता धनवन्तो यशस्विनः (बहुश्रुताः),
पर्य्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः ॥" २ ॥

इत्येवं विवाहसम्बन्धविज्ञानतस्तथा दम्पत्योः स्त्रियाः पत्यौ परमेश्वररूपत्व-भावनया पत्युश्च कुमारी-पूजन-सौभाग्यवती-पूजन-मातृ-पूजनादि-विधया देवीत्व-भावनया परस्परोच्चतमत्व-भावना-वर्द्धनेन वासनाक्षये तात्पर्य्यमिति न विस्मरणीयं सुधीभिरित्यलम् (अभिज्ञान-शाकुन्तल-नाटके रहःसङ्गमकुपरिणामं विवृण्वता महाकविनापि निन्दितो गान्धर्वः । इत्यलम् ।)

महाशक्ति दर्शनम्[1]

सर्वस्याद्या महालक्ष्मी स्त्रिगुणा परमेश्वरी ।
लक्ष्यालक्ष्य-स्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता ॥
शून्यं तदखिलं लोकं विलोक्य परमेश्वरी ।
बभार रूपमपरं तमसा केवलेन तु ॥
सत्त्वाख्येनातिशुद्धेन द्विनीयमपि सात्विकम् ।
अथोवाच महालक्ष्मीर्महाकालीं महागिराम् ॥
युवां जनयतां देव्यौ मिथुने स्वानुरूपतः ।

१—अत्र तु महाशक्तितः महालक्ष्मीतः सर्वेषां ब्रह्मादिदेवानां सृष्टिरभिहितेतिज्ञेयम् । तत्र सरलान्येव वाक्यानीति नास्ति प्रयोजनं स्पष्टार्थतायाः । तमसा तामसं महाकाली-स्वरूपम् । सत्वाख्येन अतिशुद्धेन द्वितीतं सात्विकं महासरस्वती-स्वरूपम् । अथ तमःसत्वाभ्यां स्वरूपद्वयं अवशिष्टेन रजसा तु सहितं महालक्ष्मी स्वरूपमेव पूर्वतः त्रिगुणात्मकम् नित्यम् आसीत्—इति स्वरूपत्रितयाऽविर्भावानन्तरं सैव महालक्ष्मीः ते देव्यौ कर्मणी उवाचेत्यन्वयः ।

इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम् ॥
हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ ।
जनयामास पुरुषं महाकाली सितां स्त्रियम् ॥
महासरस्वती गौरीं स्त्रियं कृष्णञ्च पूरुषम् ।
एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे ॥
चक्षुष्मन्तोऽनु पश्यन्ति नेतरेऽतद्विदो जनाः ।
ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीः सरस्वतीम् ॥
रुद्राय गौरीं परमा वासुदेवाय च श्रियम् ।
स्वरया सह सम्भूय विरिञ्चोण्डमजीजनत् ॥
बिभेद भगवान् रुद्रस्तद्गौर्या सह वीर्य्यवान् ।
पुपोष पालयामास तल्लक्ष्म्या सह केशवः ॥
सञ्जहार जगत्सर्वं सह गौर्य्या महेश्वरः ।
महालक्ष्मीः सर्वश्रेष्ठा सर्वाधारा महेश्वरी ॥
निराकारा च साकारा सैव नानाऽभिधानभृत् ।
स्त्री-प्रधानं जगत्तस्मान्मान्याः सर्वाः स्त्रियो नृभिः ॥
स्वतन्त्रे भारते भूयान्नारी-सम्मान आदरात् ॥

अस्मिन्न[1]द्भुते शक्तिदर्शने महालक्ष्मीत एव सृष्टेरुद्भवो दर्शितोऽस्ति । आदौ महा-लक्ष्मीः महाकाली-महासरस्वती-रूपे धृत्वा त्रिधा आत्मानं विधाय स्वयं तु ब्रह्माणं लक्ष्मीञ्च सृजति । द्वौ-इमौ रक्तवर्णौ । महाकालीरूपेण महेश्वरं सरस्वतीं च सृजति । इमौ द्वौ शुक्लवर्णौ । सरस्वतीरूपेण गौरी-कृष्णौ सृजति । इमौ द्वौ कृष्णवर्णौ अत्र गौरीति नामास्ति वर्णस्तु तस्याः कृष्ण एवेति ज्ञेयम् । इत्थं स्त्री-पुरुषयुग्मं जनयित्वा परस्परं सम्बन्धं कारयति सरस्वतीं शुक्लां रक्ताय ब्रह्मणे, लक्ष्मीं रक्तां कृष्णाय केशवाय, गौरीं कृष्णां सिताय

१—दुर्गासप्तशती-पाठे प्राधानिके रहस्ये निबद्धपाठस्य संक्षिप्तोऽशः । इह शक्तिदर्शननाम्ना निबद्धः ।

रुद्राय दत्त्वा सर्जनपालनध्वंसात्मकं कार्य्यत्रयं कारयतीति महालक्ष्मीः सृष्टिचक्रचालिका दृश्यते। इत्येवाद्भुतं स्त्रीप्रधानदर्शनम्। अतश्च स्वतन्त्रेऽस्मिन् भारते स्त्रीसमादरो भारतीयं रत्नं पुनरपि प्रचलेदिति संक्षेपः।

मया भारतीयार्य्य-नारीमहत्वं,
प्रदिष्टं प्रयत्नादिहाद्येप्रबोधे।
प्रशिल्यं मुदा कन्यकाभिश्च बालैः,
निजां संस्कृतिं संस्कृतं वेदितुं तैः॥

इति म० म० पण्डितराज—श्रीगोपालशास्त्रि-
दर्शनकेशरिविरचिते वीराङ्गना-वैभवे
प्रथमः प्रबोधः समाप्तः।

—:*:—

द्वितीयः प्रबोधः

आद्या महाशक्तिरिह[१] प्रपञ्चिता, सत्यादि-देवी चरितं ततः परम्।
प्रसङ्गतः पञ्चवराङ्गना मया कन्यात्व-युक्ताः क्रमशोऽत्र सूचिताः।
एवं सती स्त्रीचरितं महार्हं न्यस्तं द्वितीये रुचिरे प्रबोधे।
जानन्तु नार्य्योऽपि नराः सुविज्ञा वीराङ्गना-वैभव-पुस्तकेऽस्मिन्।

महाशक्ति चरितानि[२]

महामाया चरितम्

महामाया चरित्रं तत्प्रथमं परिकीर्त्यते।
मया मङ्गल-कामेन महाकाल्यादिनामभिः॥

अत्र गते प्रथमे प्रबोधे महाशक्ति-दर्शननाम्ना यन्महामाया-चरितमेव 'सर्वस्याद्या महाशक्तिः' इत्यादिनोपक्षिप्तम् तस्येह क्रमेण प्रकाशः क्रियते—

१—इह अस्मिन् द्वितीये प्रबोधे आद्या प्रथमा सर्वेषां देवानां जननी महामाया आदिमहाशक्ति भगवती प्रपञ्चिता विस्तरेण वर्णिता विद्यते। ततः परं सतीप्रभृतिदेवीनां चरितं प्रपञ्चितं त्रिरूपेण। अत्रैव प्रबोधे प्रसङ्गतः। "अहल्या द्रौपदी तारा कुन्ती मन्दोदरी तथा। पञ्चकन्याः स्मरेन्नित्यं महापातकनाशनम्। (पञ्चकं ना इति पृथक् पाठः) इति पञ्चानां नारीणां यत्र चरित्रं वर्णितं तत्रैव तासाम् कन्यात्वकारणमपि विवृतम्। ज्ञानिनीत्वं प्रभावाधिक्यमित्यादि। वराः श्रेष्ठाश्च ता अङ्गना इति वराङ्गनाः श्रेष्ठनार्य्यः।

कन्यात्वं तासां नहि व्यपगतम्। एताः पञ्च ईदृश्यः सुन्दर्य्य आसन् यत्तासां कन्यात्वे यत्सौन्दर्य्यं शरीरलावण्यं तदेव वार्द्धक्येऽप्यभूत्। यतोहि ता अयोनिजा देवतात्वेन सौन्दर्य्यमक्षुण्णं भवति। तत्सौन्दर्य्यन्नहि व्यपगतमित्यपि तात्पर्य्यम्। अन्यत्तु तत्र तत्र दर्शितमिति तत एव द्रष्टव्यम्। एवमीदृगस्मिन् रुचिरे द्वितीयप्रबोधे महार्हं बहुमूल्यं सतीनां स्त्रीणां चरितं न्यस्तम् विन्यस्तं सुविज्ञाः सुधियो नार्य्यो नराश्च जानन्तु।

या हि सर्वस्याद्या शक्तिर्महामाया महालक्ष्मीरूपेण तिष्ठति। सा हि तमसा महाकाली, सत्त्वेन महासरस्वती च भवतीति तान्त्रिकः सिद्धान्तः। तथा हि सर्गादौ सर्ववर्णाऽपि महामाया-स्वरूपा रक्तवर्णा महालक्ष्मीः लक्ष्मीं ब्रह्माणञ्च पद्मासनौ रक्तवर्णौ सृजति। तदाज्ञया महाकाली स्वयं कृष्णवर्णापि शुक्लवर्णौ सरस्वतीं शङ्करं च हंस-(मयूर) वृष-वाहनौ सृजति। महासरस्वती स्वयं शुक्लवर्णापि कृष्ण-वर्णं केशवं गौरीं कृष्णवर्णां च गरुडव्याघ्र (सिंह) वाहने सृजति। एवमिमास्तिस्रो महादेव्यस्त्रिपुरुषत्वमुपेतास्तिस्रः स्त्रियोऽपि भिन्ना-भिन्नाः प्रजायन्ते। ततो महालक्ष्मीः ब्रह्मणे सरस्वतीं, शङ्कराय गौरीं, केशवाय लक्ष्मीं, दत्त्वा जगतः सर्ग-तद्रक्षा-संहारमुपदिशति। तथाहि ब्रह्मा सरस्वत्या सम्भूय महाण्डं सृजति। शङ्करश्च काल्या (गौर्य्या) सम्भूय तन्महाण्डं भिनत्ति। भिन्नात् महाण्डात् प्रधानादिक्रमेण सर्वं जगज्जायते। ततः केशवो लक्ष्म्या सम्भूय जगद्रक्षति। महेशश्च काल्या सम्भूय तत्संहरति। इत्येवं जगतः सृष्टिरक्षासंहारचक्रं क्रमशः परिवर्तते। इत्युक्तं प्राक्। तदत्र महाकाल्यादिचरितं मार्कण्डेय-पुराणोक्तं संक्षिप्य समग्रं प्रदर्श्यते।

तत्र स्वारोचिषे मन्वन्तरे सुरथो नाम राजा बभूव। स च शत्रुभिः पराजितो हयमारुह्य वनं प्रतस्थे। तत्र सुमेधसो मुनेराश्रमे भ्रमन् वैश्यमेकं दृष्ट्वा तं पप्रच्छ। को भवान् कथमेकाकी भ्रमति वनेऽस्मिन्। राज्ञा पृष्टो वैश्य उवाच। समाधिर्नामा वैश्योऽहं पुत्रदारादिभि-र्निरस्तोऽपि तेषां कृते रात्रिन्दिवं चिन्तया बाध्ये। मिथः परिचयानन्तरं राजा तं वैश्यमात्मानञ्च तादृशमेव स्वराज्यापहरणचिन्तामग्नं विविच्य सुमेधसो मुनेरन्तिकमाजगाम। तमुपेत्य स्वस्य तस्य च मनो-व्यथां मुनये निवेदयामास। मुनिश्च ज्ञाततदुभयवृत्तान्तो महामाया प्रभावोऽयं येन सर्वेऽपि प्राणिनः समाक्रान्ता इति महामायाचरित-भूमिकामुवाच।

महाकाली-चरितम्

महा-प्रलये विष्णुर्यदा योग-निद्रामुवाह तदा तत्कर्णमलोद्भूतौ मधुकैटभनामानौ द्वौ दैत्यौ विष्णुनाभिकमलस्थं ब्रह्माणमेवात्तुं (खादितुं) हन्तुं वा प्रवृत्तौ। तदा विष्णुं निद्रालीढं दृष्ट्वा विष्णुहृदयस्थां महामायां स्तोतुं ब्रह्मा समुपचक्रमे। स्तुतिप्रभाव-सन्तुष्टा सा महाकाली-रूपतो विष्णुं विहाय ब्रह्मणोऽग्रे तस्थौ। विनिद्रो विष्णुस्ताभ्यां दैत्याभ्यां सह पञ्चवर्षसहस्रपरिमितं युयुधे। युध्यमानौ तौ महामाया-विमोहितौ वराय (वरं ग्रहीतुं) प्रचोदितवन्तौ विष्णुमिति। विष्णुस्तु युवां मे वध्यौ भवेतमिति तावुवाच। यत्र हि जल-प्लाविता भूर्न स्यात्तत्रैव नौ छिन्धि। इत्युक्तो विष्णुस्तयोः शिरसी स्वजघने कृत्वा चकर्तेति महाकाल्या ब्रह्माग्रे प्रादुर्भावः।

महालक्ष्मी-चरितम्

कदाचिद्देवासुर-सङ्गरे पराजिता देवाः पद्मयोनिं पुरस्कृत्य वृषकेतुगरुडध्वजौ निवेदयामासुः। ते सर्वेऽपि महामायां तुष्टुवुः। तदैव तेषां शरीरजं तेजः सम्भूय महातेजःपुंजमभूत्। महालक्ष्मीरूपेण महामाया तत्र प्रादुर्बभूव। तेषामेव सर्वेषां देवानामायुधैर्भूषणैश्च विभूषिता महालक्ष्मीर्महिषासुरेण युयुधे। युद्धे च देव्या वाहनसिंहेन विनाशितिसैन्यः स्वयं स देव्या सह युध्यमानो देव्यसिना छिन्नशिरा भूमौ निपपात। हते तस्मिन् प्रसन्ना देवाः पुनः स्वाराज्यं प्राप्य प्रसन्ना देवीं तुष्टुवुः।

महासरस्वती-चरितम्

पुरा युगे शुम्भनिशुम्भनामानावसुरौ देवाँस्तिरस्कृत्य त्रिविष्टपसाम्राज्यं चक्रतुः। ततस्ताभ्यां पराजिता देवा हिमवन्तं नगं समाश्रित्य तामेव महामायां तुष्टुवुः। सा महामाया पार्वतीरूपेण तेनैव पथा जाह्नवीतोयं स्नातुं चचाल। मध्ये मार्गं स्तुवतो देवान् पप्रच्छ। भवन्तोऽत्र कां स्तुवन्ति। पार्वतीशरीरकोशान्निर्गताऽम्बिकोवाच शुम्भादिदैत्यनिर्जिता इमे मामेव स्तुवन्ति। इति पार्वतीशरीरकोशान्नि-

र्गता सा कौशिकीति कथ्यते । तस्यां विनिर्गतायां पार्वती कृष्णाऽभूत् । ततोऽम्बिकां हिमवत्पृष्ठस्थितां रूपातिशयां शुम्भनिशुम्भदूतावलोकितां तन्मुखात्तस्या लोकोत्तररूप-लावण्यमाकर्ण्य तां स्ववशगां चिकीर्षितुं प्रवृत्तयोस्तयोस्तया सह युद्धं बभूव । क्रमशः सर्वसैन्यविनाशानन्तरं स्वयमपि ससैन्यौ देवी-हस्तेनोभौ विनष्टौ । ततः प्राप्तराज्यास्ते देवा देवीं तुष्टुवुः । सैव स्तुतिः सप्तशतीस्तवे एकादशाध्याये निबद्धाऽस्ति । इत्थं हि सुमेधा मुनिस्तं राजानं वैश्यञ्च क्रमशो महाकाली-महालक्ष्मी-महासरस्वतीचरितं श्रावयित्वोपरराम ।

सैव महामाया नानारूपैर्जगतः सृष्टि-रक्षा-संहारं कुर्वती क्रीडति । इति मुनिना बोधितौ तौ तां महामायामाराध्य स्वाभीष्टं प्राप्तवन्तौ । इति त्रिरूपतो महामायाचरितसंक्षेपः । अग्रे यत्र तत्र पृथग्रूपेण समागतानामासां चरितन्तु सविशेष-रूपतया वैयक्तिकं तत् ।

सत्यादिदेवी चरितानि

सतीदेवी-चरितम्

या हि पितृकृतां वीक्ष्य भर्तुर्यज्ञेऽव-माननाम् ।
देहं निजं जुहावाग्नौ तां सतीं शाश्वतीं स्तुमः ॥

दक्ष-प्रजापतेर्दुहिता सती देवी सर्वाभ्यर्हिता 'सती' इति नाम्नैव लोके ख्यातिमागता । 'सती' इति साध्वीनां स्त्रीणां ख्यातिरपि सती-देवी चरितानुकरणादेव लोके प्रचलिता प्रथिता चाऽभूत् । सती-देव्या यथा पत्या सह व्यवहार आसीत्तथैव यस्याः स्त्रियाः पत्या सह व्यवहारो भवति । सा हि लोके 'सती' इति नाम्ना प्रसिद्धा भवति । तां सर्वेऽपि जनाः 'सतीं' कथयन्ति ।

अस्तु सती-देव्याः संक्षेपतश्चरितमिदमस्ति । यदियं शङ्करदेवेन परिणीता तस्य धर्मपत्नी बभूव । कस्मिंश्चित्कल्पे शिवेन भर्त्रा सहारण्ये परिभ्रमन्ती सीता-वियोगे विलपन्तं रामचन्द्रं वीक्ष्य जात-कुतूहला 'सीतारूपं' धृत्वा तदन्तिके परिबभ्राम । रामचन्द्रस्तु तां (दक्ष-सुतां वीक्ष्य) अवलोक्य प्रणनाम । उदाजहार च शिवे ! शिवदेवः क्वास्ते

यदेकाकिनीं भवतीमिहाहं पश्यामीति। ततो जगन्नियन्ता रामस्तस्यै समन्ततः रामलक्ष्मण-सीता दर्शयामास। तदनन्तरं दक्षसुताऽमुं रामं देवाधिदेवं मन्यमाना लज्जिता सती सीतारूपं विहाय निजरूपं धृत्वा शिव-समीपमाजगाम। ज्ञात-तत्त्वसारः शिवदेवस्तु—'दक्षसुतेयं' मदाराध्यदेव्याः सीताया रूपं धृतवती। इति कथमनया सह मे सम्पर्क इति जोषमास्थाय ब्रह्मचर्य्य-व्रतं धृत्वा तपश्चर्य्यापरो बभूव। सतीदेव्यपि पतिमनोऽनुकूलमाचरन्ती ब्रह्मचारिणी-व्रते दीक्षिता जाता।

अस्मिन्नेवावसरे जातु तस्याः पिता दक्षप्रजापतिर्यज्ञमारब्धवान्। तत्र मखे स, शिवां शिवञ्च न निमन्त्रयामास। अनाहूतापि शिवा शिवनिरोधमप्यनादृत्याऽदृष्टवशगा सती पितुर्यज्ञेऽनिमन्त्रितैव प्रचचाल। तत्र च पितृकृतां शिवाऽवमाननां वीक्ष्य तस्य यज्ञाग्नौ स्वदेहं जुहावेति सर्वजनविदिता वार्ता। ततश्च जन्मान्तरे हिमवद्गृहे मेनका-मातुः सकाशात् जन्मान्तरं जग्राह। तत्रापि जन्मनि शिवो मे पतिर्भूयादिति कठिनं तपश्चचार। यस्य वर्णनं कालिदासो हि कुमार-सम्भव-काव्येऽति विस्तरेण कृतवानस्ति। तत्रैव द्रष्टव्यम्।

तत्र हिमवत्पृष्ठे तपस्यन्तीं तां शिवो ब्रह्मचारिवेशं धृत्वा परीक्षाञ्चक्रे। तदनन्तरं सप्तर्षि-मध्यस्थतया तयोः परिणय-संस्कारः सुसङ्घटितोऽभूत्। इयं हि पार्वती पूर्वजन्मनि सती-रूपा अस्मिञ्जन्मनि तद्रूपा अर्द्ध-नारीश्वररूपे शिवे वामार्द्ध-भागिनी भूत्वा तिष्ठति। इत्यहो! सती-शिवयोरवर्णनीयोऽनुरागोऽतुलनीयोऽप्रतिमः प्रेमा। अस्या एवाराधनया लोके कन्याभिरक्षय्य-सौभाग्यं लभ्यते। प्रतिवर्षं हरितालिका व्रतं भाद्र-शुक्ल-तृतीयायां सर्वा अपि सधवाः स्त्रियः समाचरन्ति सौभाग्याभिवृद्धये। अनयोरेव शिव-पार्वत्यो र्विवाह-रात्रि-प्रतीकं शिवरात्रिव्रतं लोके प्रचलितमस्ति। इमावेव दम्पत्योरादर्शौ गीयेते। साधूक्तं कविना—

परस्परतपःसम्पत्फलायितपरस्परौ,
प्रपञ्च-मातापितरौ प्राञ्चौ जायापती स्तुमः।

इयमेव काली स्वरूपादिशक्तिः संहारिका जगतो गीयते । ऐँ वीजमस्याः तन्त्रे ।

लक्ष्मी-चरितम्

लक्ष्मीर्देवी सदावन्द्या सर्व-सम्पत्-प्रदायिनी,
सोद्योगैः प्राप्यते पुम्भिर्नीत्यैव व्यवहर्तृभिः ।

महा-माया आदि-शक्तिर्महालक्ष्मीरेव रजसा लक्ष्मी-रूपेण विष्णुदेवमाश्रयति अस्या एव—

"श्रीश्च ते लक्ष्मीश्च पत्न्यौ"

इति श्रुति-मन्त्रे रूपद्वयमुल्लिखितं दृश्यते । इयमेव तमसा गौरी भवति । सत्त्वेन सरस्वती जायते । इयमेव संसारे सम्पत्तिदात्रीत्युच्यते । धनाधिष्ठात्री देवीयमेव । भारतीया वैश्या वणिज अस्या एव कार्तिक्याममायां दीपावली-रात्रौ महतोत्सवेन पूजनं विदधति । यदा हि नारायणः—

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥"

इति प्रतिज्ञावचनेनावतरति तदेयमेव तत्र तत्र सीतारूपेण रुक्मिणी-रूपेण तेन सहैवावतरति ।

इयमेव क्वापि कल्पे भृगोः कन्या भूत्वा समुद्रसमीपे तपश्चकार । यत्र प्रसन्नो नारायणस्तस्यै वरं ददौ । पत्नीत्वेन च तां स्वीकृत्यार्द्धाङ्गिनीश्चकार । तत एवास्या भार्गवीति नाम जातम् । कल्पान्तरे इयमेव क्षीरोद-तनयापि कथ्यते । यदा दुर्वाससः शापेन शक्रलक्ष्मीः तिरोहिता तदा देवा दैत्यैः पराजिता अभूवन् । तदानीं नारायणोद्योगेन क्षीरनिधि-मन्थनादियं पद्मपाणिराविर्बभूव । तदैव शक्रस्तुत्या प्रसन्नेयं तस्मै वरं दत्वा पुनरपि लक्ष्मी-सम्पन्नं चकार । तदाऽनया सह यानि चतुर्दश रत्नानि समुद्भूतानि । तेषां नामानि—

"काम-धेनुः कल्प-वृक्षो वारुण्यप्सरसः शशी ।
विषमैरावतो लक्ष्मीर्दरिद्रापि श्रियः स्वसा ॥
उच्चैः श्रवा हयो देवोऽमृतपाणिर्हरिः स्वयम् ।
धन्वन्तरिः समाख्यातो भिषजामादिमो गुरुः ॥
रत्नानि विविधान्यासन् प्रधानानीतराण्यपि ।"

इयमेव लक्ष्मीर्देवी उद्योगेन प्रसन्ना यदा विधीयते तदैव नरा धनिनो भवन्ति । अस्या एवानुग्रहेण पत्यादि-गुरुजन-शुश्रूषणपरा गृह-भाण्डाद्युरकरण-मृजावती स्त्री गृह-लक्ष्मीरभिधीयते । अनयैव सम्भूय जनार्दनो जगद्रक्षां करोति । अस्या ह्रीं बीजं तन्त्रे ।

केनापि कविना अब्धिजाया लक्ष्म्या नारायणवरण-सम्बन्धे श्लेष-मयी कविता निबद्धेह लिख्यते—

वत्से ! मा गा विषादं श्वसनमुरुजवं सन्त्यजोर्ध्वप्रवृत्तं
कम्पः कोऽसौ गुरुस्ते किमिह बलभिदाजृम्भितेनात्र याहि ।
प्रत्याख्यानं सुराणामिति भयशमनच्छद्मना कारयित्वा
यस्मै लक्ष्मीमदाद्वः स दहतु दुरितं मन्थमुग्धः पयोधिः ॥

के लक्ष्मी-पात्रतां भजन्ते

उत्साह-सम्पन्नमदीर्घसूत्रं, क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढ-सौहृदञ्च लक्ष्मीः स्वयं याति निवास-हेतोः ॥

जहाति कान् लक्ष्मीः

कुचैलिनं दन्तमलोपधारिणम् , बह्वाशिनं निष्ठुर-भाषिणञ्च,
सूर्योदये चास्तमिते शयानम् , जहाति लक्ष्मीरपि चक्रपाणिम् ॥
इत्थं व्यवहरन्तं स्वपतिं विष्णुमपि यदि लक्ष्मीर्विमुञ्चति तर्हि का कथाऽन्यस्य वराकस्य अकिञ्चित्करस्य नरस्य ।

सरस्वती-चरितम्

देवी सरस्वती सिद्धा द्विजानां सिद्धि-दायिनी ।
सत्त्वाख्या ब्रह्मणः पत्नी कल्पभेदेन विष्णुगा ॥

सरस्वती देवी तु महालक्ष्म्याः सत्त्वांशतो विनिर्गता वागधिष्ठात्री देवी ब्रह्माणमाश्रिता अतश्चेयं ब्राह्मीत्युच्यते। इयमेव शुम्भ-निशुम्भ-मर्दिनी सप्तशती-स्तोत्रे उत्तम-चरितस्य देवी कथ्यते। यस्या वर्णनं पञ्चमाध्यायतः त्रयोदशान्तं चलति। सरस्वती, सावित्री, गायत्रीत्यादि नामभिर्गीयते लोके।

कल्पभेदेन इयं बहुधा पुराणेषु प्रख्याता—पुरा नारायणस्य तिस्रो भार्य्या बभूवुः। लक्ष्मीः गङ्गा सरस्वती चेति। एकदा अन्तः पुरे समागतं तं गङ्गा स्ववशगं चकार। तदा सरस्वती रुष्टा सती तां नदीत्वं प्राप्तुं शशाप। गङ्गाऽपि तां तथैव शशाप। ततश्च नारायणेन ते उभे अपि प्रसादिते, यद् युवां नदीत्वं गते अपि अंशतो मां सेविष्यथः। तत एव कालाद् गङ्गा सरस्वती इति नदीद्वयं भूत्वा नदी-रूपेण देवी-रूपेण च भगवन्तं सेवेते।

कस्मिश्चिन् कल्पे सरस्वती ब्रह्मणः कन्यारूपेण प्रादुर्भूता आजन्म ब्रह्मचारिणी कुमारी-व्रत-दीक्षां जग्राह। क्वापि कल्पे ब्रह्माज्ञया सरस्वती वाल्मीकिमुनेः कण्ठस्थिता कवित्वशक्ति-स्वरूपा वागीश्वरीति स्तूयते।

कुत्रापि कल्पे सूर्य्य-कन्या-रूपेण स्थिता ब्रह्मणा परिणीता तत्पत्नी-त्वेन वर्णिताऽस्ति। कुह-चन कल्पे सावित्री-गायत्रीति देवी-द्वयं दृश्यते। तयोः कथा विशद-रूपेण पद्मपुराणे सृष्टि-खण्डे दरीदृश्यते। तयोः पृथक् प्रतिकृतिः पुष्करक्षेत्रेऽद्यापि प्रतिष्ठिता विद्यते।

उपनिषदि तु अभिन्नैव निर्दिष्टाऽस्ति। "गायत्रीमेव सावित्रीमनु ब्रूयाद्" गायत्री विज्ञानभूमिर्गीयते। तस्या एव नामान्तरं सावित्री। इयमेव द्विजानामाराध्य-देवी प्रातर्गौरी कुमारी हंसारूढा सूर्य्य-मण्डलगा द्विभुजा अक्षसूत्रकमण्डलुभृत् स्तूयते। मध्याह्ने रक्तवर्णा युवतिरूपा चतुर्भुजा त्रिनेत्रा शङ्ख-चक्र-गदा-पद्म-भृद् गरुडवाहना गीयते। सायं वृद्धा वृषारूढा शुक्लवर्णा चतुर्भुजा त्रिशूल-डमरु मृगपानपात्रभृद्वर्णि-ताऽस्ति। इत्येवं ब्राह्मी वैष्णवी रौद्रीति त्रिरूपा सरस्वती सर्वाराध्या वीणावादिनी सङ्गीतप्रिया विद्याधिष्ठात्री वागीश्वरीति विख्याता।

अस्याः प्रसादादेव विद्याधिगमः। कवित्वशक्तिश्च जायते। क्लीं बीजमस्याः तन्त्रे।

[१]सामादिवेदवचसा भुवनप्रसिद्धा,
या शब्द-वर्ण-पदवाक्य-भिदामुपैति।
सा कच्छपी-मधुरनाद-निमग्न-चित्ता।
वागीश्वरी मम करोतु मुखे निवासम्॥

इति वागीश्वरीस्तवः साधुः कृतः केनापि। इत्यलम्।

शचीदेवी-चरितम्

शक्रप्रिया शचीदेवी दैत्य-वंशसमुद्भवा।
स्वयंवराधिदेवी सा विवशा नहुषार्दिनी॥

शची देवी देवराजस्य इन्द्रस्य पत्नी। स्वयंवर-महोत्सवस्य अधिष्ठात्री देवी। एतस्या आवाहन-पूजा-स्तवादिना स्वयंवरोत्सवे विघ्नबाधादिकं न भवति। इति स्वयंवर-प्रथा-प्रधाने भारते प्रसिद्धिरासीत्। साम्प्रतन्तु स्वयंवरप्रथाशून्ये भारते नास्त्यस्याः प्रयोजनम्। तथापि कन्यावाग्दानावसरे सर्वप्रथमं शच्येव पूज्यते। तथाहि—अस्या ऋक्—"ॐ अदित्यै रास्नासीन्द्राण्या उष्णीषः पूषासि धर्माय दीष्व"

अस्या जन्म पुलोम्नो दानवस्य कुले जातम्। तथापि सा निजसात्विकगुणैः तपसा च शङ्करं प्रसाद्य स्वर्गसम्राजो देवराजस्य महिषी बभूव। यथाहि मानवा विपत्तिपरीताः स्वादम्योद्योगैस्तन्मुक्ता जायन्ते। तथैव देवानामपि द्वन्द्वचक्रमिदं न विजहाति। साधूक्तं पुरातनैः—

---

१. साम आदिर्येषां ते सामादयः। सामादयश्च ते वेदाः सामादिवेदाः तेषां वचसा शब्देन नाम्नेति यावत्। साम, ऋग्यजुरथर्वेति नाम्ना प्रसिद्धा शब्दश्च वर्णश्च पदञ्च वाक्यञ्चेतिशब्दवर्णपदवाक्यानि तेषां भिदा ताम् उपैति प्राप्नोति। कच्छप्या नादः कच्छपी-नादः तस्मिन् निमग्नं चित्तं यस्याः सा कच्छपी-नाद-निमग्न-चित्ता। इति। सरस्वती-वीणाया नाम कच्छपीति तथा हि—विश्वावसोस्तु 'बृहती' तुम्बुरोस्तु 'कलावती'। 'महती' नारदस्य स्यात् सरस्वत्यास्तु 'कच्छपी'। इति।

"कस्यैकान्तं सुखमुपनतं दुःखमेकान्ततो वा।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥"

इति कदाचित् स्वशत्रुं त्वाष्ट्रपुत्रं वृत्रं हत्वा ब्रह्महत्याभिभूतः शक्रो मानससरसि ममज्ज। तत्रैव बहुवर्षावधि आत्मानं तज्जलेऽज्ञातवासं जुगूह। स्वर्गे च शक्रविरहात् समन्ततो हाहाकारो बभूव। अराजकताभयाद् देवा स्तदानीम् अतुलप्रताप-प्रभावात्प्रख्याततमम् दीप्तकीर्तिं भारतसम्राजं नहुषं स्वर्गेऽभिषिच्य स्वर्गसम्राजं विधायेन्द्रासने समुपावेशयन्।

तत्रेन्द्र-सिंहासने समुपविष्टो नहुषः महादृप्तः शच्याः सतीत्व-विनाशे प्रवृत्तोऽभवत्। शची देवी बृहस्पतिं शरणं जगाम। देवगुरुस्तां सन्तोष्य इन्द्रान्वेषण-व्यापृतो नारायणस्योपदेशेन मानस-सरसि शक्रमप्युपलब्धवान्।

अत्र शची देवी इन्द्राण्यपि महा-माया-प्रसाद-प्राप्त-बुद्धि-सारा स्वसतीत्वविनाशोद्यतं नहुषं व्यजिज्ञपद्। यदि भवान् सप्तर्षिवाहितां शिविकामारुह्य द्रुतं दशैकादशैरेव क्षणैर्मत्सकाशमागच्छेत्तदाऽहं भवता सह रहः सङ्गतं कुर्यामिति। बृहस्पतिना दैवैश्च सर्वैर्बोधितोऽपि नहुषो यदा मदद्दृप्तः सप्तर्षि-वाहितां शिविकामारुह्य त्वरया शचीमभिससार। तदा शिविकावाहने शिथिलान् तान् सर्पत सर्पत इत्यसकृदुवाच। प्रतोदेन च तान् नुनोद। तत्र तदीयदौरात्म्यप्रकोपितोऽगस्त्यः तं द्रुत महासर्पो भवेति शशाप। स च शापभीतोऽभय-याचनयाऽगस्त्यं प्रसाद्य युधिष्ठिरदर्शनावधि शापभोगमधिगत्य द्वैत-वने महाजगरो भुजङ्गो भूत्वा पपात।

ततः शची देवी देवगुरूपदेशेन भगवत्या आदिशक्तेराराधनया च मानससरोवराद् इन्द्रं देवैः समानीय सुराचार्य्योपदेशेनैवाश्वमेधयज्ञेन कारयामास। ततो यज्ञप्रभावात् आदिशक्तेः समर्चनया च ब्रह्महत्याविमुक्तः पुनरिन्द्रः स्वपदप्रतिष्ठितो बभूव।

इन्द्रोद्धारकर्त्री पतिव्रता शचीदेवी महामाया-समाराधनया प्राप्तबुद्धिसारा नहुषं निपातयामासेति द्रष्टव्यः सती-प्रभावः सर्वं मानवैरित्यलम् ।

कयाधू-चरितम्

माता मता शश्वदपत्य-शिक्षिका,
यथाभिलाषं शुचि-गर्भ-पोषिणी ।
कयाधुदेवो मुनिनारदाज्ञया,
प्रासोष्ट पुत्रं भगवत्प्रियं सती ॥

हिरण्याक्षवधे वृत्ते शिवमाराधयितुं तपोऽभिमुखे हिरण्यकशिपौ तद्भर्तरि कयाधूः शक्रोद्वेजिता रथेन नीयमाना नारदेन देवर्षिणा दृष्टा। किमिन्द्र ! कथमिमां कदर्थयसि ? अस्या गर्भे हिरण्यकश्यपुतेजो दुर्विषह्यं वर्तते । यावद्गर्भ-स्थितिं स्वपुर्यामिमां संस्थाप्य प्रसूतापत्यां त्यक्ष्यामि । गर्भबालमस्या वधिष्यामीति नारदमिन्द्रः प्रत्युवाच । कस्त्वमस्या गर्भबालं विनाशयिता । स हि चिरजीवी, तव शक्तिबाह्यमिदं कर्म, त्यजेमां मदाश्रमे कयाधूः स्थास्यतीति नारदवाक्याद्विहाय कयाधूं तत्रेन्द्रो द्रुतं स्वजंगाम ।

नारदाज्ञया कयाधूस्तदाश्रमे जगाम । तावन्नारदाय दक्षप्रजापति शापो नासीत्सहि आश्रमवासं वसतिस्म । तदाश्रमे स्थिता कयाधू नारदोपदेशं सांख्यवेदान्तोपनिषदादिकान् धर्मग्रन्थांश्च शुश्राव । संसारासारतोपदेशेन भगवद्भक्तिसारं जग्राह । दैत्यस्त्रियः स्वेच्छाप्रसवा भवन्तीति कयाधूर्देवेन्द्रभयाद् यावद्धिरण्यकश्यपु-वरोपलब्धि न गर्भं मुमोच । वरं लब्ध्वा समागते हिरण्यकशिपौ नारदः सुरक्षितां कयाधूं तद्राजधानीं प्रजिघाय । ततो नारदप्रभावात् परम-तपस्विनी कयाधूर्हरिभक्तं प्रह्लादं पुत्रं प्रासोष्ट । यस्त्रिलोके प्रसिद्धो देवपक्षपोषको बभूव । इत्यहो मातृशिक्षयैवापत्यशिक्षेति कायाधवः प्रह्लादो दैत्यपुत्रो निदर्शनम् ।

शतरूपा-चरितम्

शतरूपा महाराज्ञी मनोस्तु महिषी मता,
तपसा नैमिषारण्ये लेभे नारायणं सुतम् ।

सती शतरूपा मनोर्महिषी ब्रह्मणः कायात् वामभागाज्जनुर्लेभे । मनुरपि तस्य दक्षिण'भागतः स्वयं जज्ञे । इयं यथार्थनामा शतानि विविधानि रूपाणि यस्याः सा शतरूपा इति विविधासु योनिषु यानि यानि रूपाणि दधार । मनुरपि तस्यां तस्यां योनौ तं तं पुरुषरूपं धृत्वा तत्तद्योनिगं सन्तानं ससर्ज । इत्थं जगति चतुरशीति-लक्ष-योनिग-जीव-सृष्टिराभ्यां समुद्भाविता ।

मानवयोनौ च आभ्याम् उत्तानपादः प्रियव्रतश्चेति सुतद्वयम् आहूतिः, प्रसूतिः, देवहूतिः, इति तिस्रः कन्याश्च उदपादिषत । उत्तानपादस्य ध्रुवः पुत्रो बभूव । प्रियव्रतस्य सप्तद्वीपा वसुमती वशे समजनीति प्रसिद्धिः शाश्वतिकी । आकूतिः रुचये प्रजापतये दत्ता । प्रसूतिः दक्षप्रजापतयेऽदीयत । देवहूतिर्महर्षये कर्दमाय प्रदत्ताऽभूत । या हि सांख्यशास्त्रप्रवक्तारं कपिलं सुतं लेभे । इयं हि शतरूपा-सन्तान-वृद्धिर्ज्ञेया ।

ब्रह्मावर्तप्रान्ते बर्हिष्मती नाम नगरी शतरूपापतेर्मनो राजधानी बभूव । यत्र बराहावतारस्य विष्णो रोमत इमे कुशाः समुत्पन्ना अत एवेमे वर्हिषः कथ्यन्ते । ते च तत्र प्रदेशे बाहुल्येनोपलभ्यन्ते । बर्हिष्मती नगरी तन्मूलैव प्रख्याता । इत्यत एव यज्ञे वर्हिषां प्रयोगेणासुरा अपि विनष्टा भवन्ति भगवतो रोमरूपत्वात् तेषाम् ।

मानवधर्म-प्रवक्त्रा मनुना महाराजेन सह बहूनि वर्षाणि गार्हस्थ्ये आश्रमे निवसन्ती शतरूपा देवी चरमे वयसि नैमिषारण्ये पत्या सह तपश्चरन्ती नारायणं देवं प्रसादयामास । प्रसन्नो भगवान् शङ्खचक्रगदापद्मभृत्साक्षाद्दर्शनं गत उवाच । भवतोः कौशल्या-दशरथ-रूपतो भुवि जन्मभृतोः अहं चतुर्धा आत्मानं विभज्य रामलक्ष्मण-भरत-शत्रुघ्न-संज्ञया भवत्-पुत्रत्वं प्राप्स्यामि । इति शतरूपां देवीं मनुं च सन्तोष्या-

दर्शनं गतः । सेयं शतरूपा देवी जगत्सृष्टिचक्रं प्रथमं चालितवती तपसा च भगवन्तं प्रसाद्य रामावतारनिमित्ततां जगामेति तच्चरित-संक्षेपः ।

देवहूति-चरितम्

देवहूतिर्मनोः पुत्री कर्दमेन महर्षिणा ।
परिणीता सुतं लेभे कपिलं सांख्यकृद्धरिम् ॥

देवहूतिर्मनु-महाराजस्य पुत्री प्रियव्रतोत्तानपादयोर्भगिनी ब्रह्मावर्ते बर्हिष्मत्यां नगर्यां जन्म गृहीत्वा कर्दमेन महर्षिणा विवाहिता तं स्व-सेवया भृशं समतोषयत् ।

प्रसन्नो महर्षिस्तस्यै दिव्यदृष्टिं ददौ । तया दिव्य-दृष्ट्या सा सर्वमपि विश्ववैभवं साक्षात्कुर्वती महर्षिणा सह दिव्यविमानमारूढा त्रिलोकीं बभ्राम । ततश्च नव कन्या एकं च कपिलं सुतं जनयामास । तत्र कन्यासु कला मरीचिना, अनसूया अत्रिणा, श्रद्धा अङ्गिरसा, हविर्भूः पुलस्त्येन, गतिः पुलहेन, क्रिया क्रतुना, ख्यातिर्भृगुणा, अरुन्धती वशिष्ठेन विवाहिता सृष्टिचक्रं चालयाम्बभूवुः । कपिलश्च भगवान् नारायणः स्वाभीष्टं सांख्यशास्त्रं मातरं देवहूतिं पुरस्कृत्य जगति प्रवर्तयामास । यच्च सांख्य-शास्त्रं परिशीलयन्ती तद्बलेन च ज्ञातचतुर्विंशतित्त्वसारा देवहूतिः स्वयं कैवल्यं प्राप । इति ।

अरुन्धती-चरितम्

दिव्या साऽरुन्धती देवी सप्तकल्पान्तसंस्थिता ।
सौभाग्यदाऽथ नारीभ्यस्ताराारूपा दिवि स्थिता ॥ १ ॥

कल्पभेदेन कर्दम-पुत्री अरुन्धती कल्पान्तरे मेधातिथेर्महर्षेः पुत्री बभूव । या हि पुरा ब्रह्मणः सृष्टि-संकल्पे तस्य मानस-पुत्री सन्ध्यारूपा दिव्यं वर्षसहस्रं तपस्यन्ती नारायणं तुतोष । तेन च बहुभिर्वरैः संतो-षिता अग्निदेवस्य पुत्रीत्वं जगाम । सैव सन्ध्या ब्रह्मचारिणी जन्मान्तरे मेधातिथेररुन्धती पुत्रीति ज्ञेयम् । उभयत्रापि कर्दमसुतावस्थायाञ्च

वशिष्ठेनैव सङ्गता समजनि। सप्तर्षिमण्डलेऽपि तारारूपतोऽवस्थिता विवाहविधौ वरवधूभ्यां निरीक्षिता वध्वै साऽक्षय्य-सौभाग्यं ददाति।

इयं जात्वपि धर्मरोधन्नाकरोत्। अतो हि (धर्मं) न रुणद्धि इति अरुन्धती, नकारलोपेन रुध्धातोः शतृप्रत्यये ङीपि अरुन्धतीति संज्ञा-सिद्धिः।

अस्या बाल्यकाले ब्रह्मा स्वयं मेधातिथेराश्रमे समेत्य तमूचे—स्त्रीणां शिक्षा स्त्रीभिरेव दापयितव्येति स्वां दुहितरं बहुलासावित्र्योः पार्श्वं प्रापय। ते एवैनां शिक्षयिष्यतः। मेधातिथिश्च ब्रह्मण आदेशं पालयद् मानसपर्वते समासीनां बहुलां तत्रैव सम्मिलितां सावित्रीञ्च नत्वा तत्सकाशेऽरुन्धतीं संस्थापयामास। तत्र सप्त-वर्षावधि सा स्त्री-धर्मशिक्षां सम्प्राप्य ताभ्यामपि श्रेष्ठा समजनि।

ततः कदाचिद् ब्रह्मा विष्णु-शङ्कराभ्यां सह केनापि प्रसङ्गेन वशिष्ठाश्रमं प्रतस्थे देवर्षिर्नारदश्च ज्ञात-ब्रह्मदेवाभिप्रायो मेधातिथिं प्रबोध्य तत्रैवाश्रमेऽरुन्धतीमानाययामास। इत्थं तत्र मानसपर्वते सर्वदेव-समक्षे समाधिसमुत्थितो वसिष्ठो मेधातिथिप्रदत्तामरुन्धतीं पाणिग्रहण-संस्कारविधिना परिणिनाय। तत्र हि—

पाणिग्रहणसंस्कारे सङ्कल्प-सलिल-सेकाद् गोमती-सरयू-क्षिप्रा-महानदी-प्रभृतयः सप्त समुद्रगा नद्यः प्रादुर्बभूवुः। देवानामाशीर्वाद-मासाद्यारुन्धती-सहितो वसिष्ठो ब्रह्मदेवदत्त-विमानमारुह्य देव-भूमिषु बहुवर्षाणि विजहार।

पश्चाच्च हिमालयोपत्यकायामाश्रमं निर्माय तत्रोषित्वा बहुवर्षाणि गार्हस्थ्याश्रममनुतिष्ठन् अतितपश्चकार (चचार वा।) तत्रैवाश्रमे समुपागतो राजा दिलीपोऽपि सुदक्षिणाया महिष्या सह कामधेनु-सुताया नन्दिन्याः सेवया तनय-रत्नं रघुं प्राप।

कदाचिदग्नि-पत्नी स्वाहा अरुन्धती-रूपं ग्रहीतुकामा भग्नमनोरथा सती अरुन्धतीमुपेत्य तां प्रशंसन्ती वरं ददौ। यौ दम्पती विवाहविधौ

त्वां स्मरिष्यतस्ते ताराश्च द्रक्ष्यतस्तौ सर्वदा सुखसम्पत्तिशालिनौ सन्तौ सन्तान-सुखमनुभविष्यतः। नारी चाक्षतसौभाग्या स्यादिति।

भारते बहुत्रस्थलेऽरुन्धती-वसिष्ठाश्रमे विद्यमानेऽपि साकेतस्थानेऽयोध्यापुर्यां प्रधानमाश्रमस्थलं तयोः। पातिव्रत्य-प्रख्यापकमरुन्धती-तारा-निरीक्षणमधुना जीवन-सूचकमपि सूच्यते।

दीपनिर्वाण-गन्धश्च सुहृद्वाक्यमरुन्धतीम्।
न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः॥ इति।

वाचक्नवी-गार्गी-चरितम्

[1]गार्गीप्रभावेण सभा समेधिता,
जनाः कृतार्थाः सुधियोऽपि तोपिताः।
गावः सहस्रं [2]यमियाज्ञवल्क्यगा,
[3]ब्रह्मिष्ठतावृद्धिधिया मयार्पिताः॥

उपनिषदि वाचक्नव्या गार्ग्या महिमा बहुधा स्तुतोऽस्ति। अस्याः पितुर्नाम वचक्नुरासीत्। इयमामृत्युकालं ब्रह्मचारिणी पितुर्गृहमेवाधितष्ठौ इत्यतो वाचक्नवीत्युच्यते। गर्ग-गोत्रीयं बभूवेति गार्गी कथ्यते।

विदेहराजस्य सभायां यदा कुरुपाञ्चाला विद्वांसः समवेतास्तत्रेयं तत्प्रातिनिध्यं जुषमाणा याज्ञवल्क्यं परीक्षांचक्रे। तत्रैव विदेह-राजोक्तमुपरितनं पद्यम् ज्ञेयम्। तच्चरितं यथा—जनको विदेह-राजो विद्याव्यसनी सहस्रं घटोघ्नीर्गास्ताम्रखुरा रजतपृष्ठाः प्रतिशृङ्गं दश दश पादान् सुवर्णस्य बध्वा सभाद्वारि संस्थाप्य विदुषो ब्राह्मणानुवाच। भवत्सु कोऽपि ब्रह्मिष्ठः स्यात्स सर्वा गृह्णीयाद् गा इत्युक्तवति विदेहे सर्वेऽपि परस्परं मुख-दर्शिनो बभूवुः। ततः क्षणानन्तरं याज्ञवल्क्यो

१—राज्ञो विदेहस्य उक्तिरियम्—गार्ग्याः प्रभावेण=गार्गी प्रभावेण। यमी चासौ याज्ञवल्क्यः यमियाज्ञवल्क्यः तं गच्छन्तीति यमि-याज्ञवल्क्यगाः।

२—ब्रह्मिष्ठतायाः वृद्धिः ब्रह्मिष्ठता-वृद्धि तस्याः धीः तया इत्यर्थः।

महर्षिः शिष्यं सामश्रवसमुवाच। उदजेमा गा आश्रमं प्रापय छात्र-ब्रह्मचारिणां दुग्ध-पानार्थं स्युरिति। तदा तत्रत्या विद्वांसोऽहमहमिकया याज्ञवल्क्येन सह शास्त्रार्थं कर्तुं प्रवृत्ताः। तत्रोपविष्टा शान्त-गम्भीरा वाचक्नवी गार्गी शनैरुत्थाय तान् विदुषो व्यजिज्ञपत्।

इमं याज्ञवल्क्यमहं प्रश्नद्वयं पृच्छामि। यद्ययं तदुत्तरं वक्ति तर्हि यूयं शान्ता भवतेति। इति ब्रुवत्यां तस्यां सर्वेऽपि शान्ता अभूवन्। तैरभिनन्दितया गार्ग्या पृष्टो याज्ञवल्क्यः सम्यक् प्रश्नोत्तरं प्रदाय गा अनैषीदिति वृहदारण्यकोपनिषत्कथा तत्रैव दृश्येत्यलम्।

मैत्रेयी-चरितम्

मैत्रेयी याज्ञवल्क्यस्य[१] ज्येष्ठा स्त्री ब्रह्मवादिनी,
गृहाद्विव्राजिषोस्तस्य तया शास्त्रार्थ उच्यते॥

याज्ञवल्क्यस्य द्वे भार्य्ये बभूवतुः। मैत्रेयी कात्यायनी चेति। तत्र मैत्रेयी ज्येष्ठा ब्रह्मवादिनी बभूव। कत्यायनी स्त्री-बुद्धिः कनिष्ठा चासीत्। संन्यासाश्रमं जिघृक्षुर्याज्ञवल्क्यस्ते समाहूयोवाच। अहं प्रविव्रजिषुरुभयोर्वां धनं वितरितुमिच्छामीति। तत्र कात्यायनी तु जोषमास। मैत्रेयी बहून् प्रश्नानध्यात्मविषयान् पप्रच्छ। तेषामुत्तर-प्रत्युत्तर-विधीन् वृहदारण्यके विमृशन्तु।

तत्र हि मैत्रेय्याः प्रश्नेन प्रसन्नो याज्ञवल्क्यो विविधया विधयाऽत्मतत्त्वं विबोधयामास[१]। तथाहि—"आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो

१—यत्र श्रुतौ याज्ञवल्क्यो ज्ञानी विद्वान् स्वयं मैत्रेयीं श्रुतिं श्रावयति। तत्र को वक्ति यत् स्त्रियः श्रुतिन्न पठेयुः। ईषद्ध्यानेन नारीजागरण-नाटकस्यान्तिमं दृश्यमस्मिन् विषये परिशीलनीयम्। 'आत्मा वा रे' इत्यस्य पदच्छेदः 'आत्मा वै अरे' इत्यत्र 'एचोऽयवायावः ६।१।७८' ऐकारस्यायि कृते लोपः शाकल्यस्येति यलोपे पूर्वत्रासिद्धम् इत्यस्य छान्दसत्वात् अप्रवृतौ दीर्घे "वारे" अथवा—वा + अरे इति दीर्घसन्धिनापि 'वारे' इतिरूपम् निर्गलितार्थस्तु अरे मैत्रेयि! आत्मा वै इति निश्चयेन द्रष्टव्यः। कथमिति प्रश्ने प्रकारमाह—

निदिध्यासितव्यो मैत्रेयि आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञातेन इदं सर्वं विदितं स्यादिति। तत्रैव द्वितीयाऽध्याये चतुर्थ-ब्राह्मणे विस्तरेण दृश्यम्। तत्रैव मैत्रेयीं सम्बोध्य याज्ञवल्क्योक्तिः "एवं वा अरे अस्य महतो भूतस्य निःश्वसितं यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राणि अनुव्याख्यानानि व्याख्यानि। अस्यैव एतानि सर्वाणि निःश्वसितानि' इति। स्त्री-वेद्यं सर्वमपि श्रुत्यन्तं संस्कृत-वाङ्मयमिति विदाङ्कुर्वन्तु मर्मज्ञा उपनिषदाऽनया। स्त्री-शूद्रौ नाधीयातामिति अकिञ्चित्करं वाक्यमेतदग्रे। सूतसंहिता-वाक्यमपि स्पष्टयतीममर्थम्—

'द्विज-स्त्रीणामथ श्रौत-ज्ञानाभ्यासेऽधिकारिता।
अस्ति शूद्रस्य शुश्रूषोः पुराणैरेव वेदनम्॥' इति।

(इह मैत्रेयी-चित्रण-प्रसङ्गेन स्त्रीणां वेदाध्ययनेऽधिकारोऽपि ज्ञेयः) इत्यलम्।

सुलभा-चरितम्

ब्रह्मज्ञानवती दिव्या सदा वै ब्रह्मचारिणी।
जनकं बोधयामास सुलभा स्वप्रभावतः॥

महाभारते शान्ति-पर्वणि सुलभाजनक-संवादः श्रूयते। सुलभा-नाम्नी बालब्रह्मचारिणी ब्रह्मज्ञानिनी नववयाः अति-सुन्दरी क्षत्रिया संन्यासिनीवेशे जनकोपरि कृपां कृत्वा तद्द्वारि समुपस्थिता जनकेन च पाद्यार्घाचमनीयादिभिः सत्कृता कृतासनपरिग्रहा पृष्टापि न किञ्चिद्

प्रथमं श्रोतव्यः ततो निदिध्यासितव्यः' इत्येवं स द्रष्टव्यः। यथोक्तम्—

श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः,
भविष्यतीत्येव मनः कृत्वा सततमव्यथैः।

इति। इह मैत्रेयी-याज्ञवल्क्य-संवादतः इदं स्फुटं प्रतीयते पद्युह श्मशानं यच्छूद्रस्तस्मात्तत्समीपे नाध्येयम्। इति शूद्राध्ययननिषेधस्तु कथञ्चित्स्यान्नाम परन्तु द्विजस्त्री-निषेधस्तु निर्मूल एव इति दिक्।

बभाषे (जगाद)। तदा जनको वैदेहः स्वयं स्वात्मानं प्रशंसन्नुवाच मां पञ्चशिख-शिष्यं जानातु भवती। स हि मां सांख्य-योगशास्त्र-मध्याप्य निष्कामकर्मयोगं शिक्षितवान्। ज्ञानान्मोक्षो जायते। योगेन च ज्ञानोपलब्धिः प्रजायते। सांसारिक-भोगवासनायां न म आसक्तिः। ज्ञानाग्निना मे कर्मबीजानि दग्धानि। मृत्सुवर्णयोर्भिदा मे विनष्टेति। भवत्याः सौन्दर्य्यं वयश्च वीक्ष्य म आश्चर्य्यं बोभूयते। अज्ञायं कालो भवत्या योगाभ्यासस्येति। कथयतु किं मां परीक्षितुमत्र भवती समुपेतेति! ततः स्मितपूर्वा सुलभा अभाषत—अयि विदेह! यन्मया श्रुतं तदिदानीमक्षिप्रत्यक्षीकृतम। भवान् सत्यं सर्वं जानाति। सर्वज्ञोऽप्यस्तीनि प्रत्येम्यहमपि समर्थये च। परन्तु स्वयं स्वात्म-प्रशसनं दोषमुद्गिरन्ति सुधिय इत्यपि श्रुतमेव स्याद् भवता।

मद्विषयकोऽपि प्रश्नो न घटते। गमनागमौ शारीरं कर्म शरीरं हि प्रकृति-विकृतिः। चेतनोऽन्यस्तत्र किं वयः सौन्दर्य्यमित्यादि-चर्चेत्यपि जानात्येव भवानिति।

अस्तु अहं भवतः कीर्तिं श्रुत्वा योग्यतरं विधातुकामेह समागता। भवान् हि स्वपक्ष-समर्थने परपक्ष-खण्डने व्यापृतस्तिष्ठति। एतेन सूच्यते भवतः स्वात्मनि समादरः समाग्रहश्च। 'एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन' इति श्रुतिसिद्धे ब्रह्मणि कुतः स्व-पर-भेद-पक्ष-परिग्रहः। अतश्च भवान् तत्र स्वयं ब्रह्मणि स्थिरो भवन् अस्मादाग्रहाद्विमुक्तस्तिष्ठतु। इत्येव मे विबोधयितव्यम्। नाहमन्यत्र जिगमिषुः। इत्यादि जनकं विदेहं विबोध्य दिनमेकं तत्रोषित्वा सा सुलभा द्वितीयदिने ततः स्वावासमाससादेति सुलभा-जनक-संवादपर्य्यवसानम्। इति सुलभाचरितम्।

प्रमद्वरा-चरितम्

रुरुः प्रमद्वरा चेति दम्पती अद्भुतौ भुवि।
रुरोरर्द्धायुरासाद्य जीविताऽभूत्प्रमद्वरा॥

महा-भारते प्रमद्वरा नामा गन्धर्व-सुता स्थूल-केशेन मुनिना पालिता रुरुणा विवाहयितुं कृतनिश्चया सर्पदष्टा पञ्चत्वमाप।

पाणिग्रहणार्थमुपस्थितो रुरुस्तदैव सर्पदंशनोपरतां प्रमद्वरां श्रुत्वा सहसा मूर्छितो भूमौ निपपात। मुनिभिरुपचरितो यदा व्यपेतमूर्च्छोऽजनि तदैवं विललाप—

मम प्रमद्वरा पत्नी जीवेन्मेऽर्द्धायुषा शुभा।
देवा मामनुगृह्णीयुरायुषोर्द्धं हरन्तु मे॥
विलपन्तं रुरुं वीक्ष्य स्ववैद्यावश्विनावुभौ।
प्रसेदतू रुरोः श्रुत्वा करुणं रुदितं मुहुः॥
जीविताञ्चक्रतुस्तस्यायुषोऽर्द्धात्तां प्रमद्वराम्।

इत्थमर्द्धयुषा रुरोर्जीवितां प्रमद्वरां वीक्ष्य सर्वेऽपि मुनयो यथागतं गताः परमप्रसन्नो रुरुर्गृहस्थाश्रम-सुखं साधु समाससाद।

उपरतापि सुरलोकादुपागता प्रमद्वरा पत्युः प्रेम बिभ्रती एतादृश मुपचचार येन तत्पातिव्रत्येन परम-तुष्टा देवास्तत्पत्युरर्द्धं ह्रसितमायुः पुनः पूर्णञ्चक्रुः। इत्यहो प्रमद्वरा-पातिव्रत्य-प्रभावो येन देवा अपि प्रभाविता। किम्बहुना—

अद्यापि गीयते यस्याः पातिव्रत्यं धरातले,
रुरोरर्द्धायुषा प्राणीत्सुन्दरी सा प्रमद्वरा।
पातिव्रत्य-प्रभावेण देवान् प्रासाद्य यत्नतः,
पूर्णमायुः पुनः पत्ये देवैः प्रादापयत्सती।

आत्रेयी-चरितम्

आत्रेयी विश्ववन्द्या स्त्री सर्व-शास्त्रार्थ-वेदिनी।
वंशब्राह्मणविख्याता वाल्मीक्याश्रम-वासिनी॥

इयमात्रेयी कुत्रत्येति पुराणेषु मृग्या बृहदारण्यकोपनिषदि षष्ठाध्याये पञ्चमवंशब्राह्मणे आत्रेयीपुत्रादात्रेयीपुत्र इत्युपलभ्यते। उत्तर रामचरितेऽपि भवभूतिना इयं महाविदुषीत्वेनोल्लिखिता दृश्यते। तथाहि आत्रेयी वक्ति—

अस्मिन्नगस्त्य-प्रमुखा प्रदेशे भूयांस उद्गीथविदो वसन्ति ।
तेभ्योऽधिगन्तुं निगमान्त-विद्यां वाल्मीकिपार्श्वादिह पर्यटामि ।।

एतेनास्या महात्रैदुष्यन्तु स्फुटं प्रतीयते । मयापि स्वनारीजागरण-नाटके इयं वैदिक-विज्ञानवेदिनीत्वेनोद्दिष्टा । तत्रेदमेव मेऽधिकरणं यदियमुपनिषदि वंश-ब्राह्मणे कीर्तितेति प्रति-भाति । अत्रेः अपत्यं स्त्रीति विगृह्य 'इतश्चानिञः ४।१।१२२' इति पाणिनि-सूत्रात्सिद्धे आत्रेय-शब्दे ङीपि सति आत्रेयी शब्दसिद्धिर्ज्ञेया । अनसूया परमसती यस्या माता सा कथं न महा-सती स्यादिति दिक् ।

लोपामुद्रा-चरितम्

लोपामुद्रा विदेहस्य तनयाऽगस्त्य-गेहिनी ।
यस्याः सतीत्वं संदृश्य गीष्पतिर्विस्मयं गतः ।।

इयं हि विदेहराजस्य दुहिता लोपामुद्रा यदा परिणययोग्या जाता तदा स्वयं पित्रोरनिच्छतोरपि स्वेच्छया अगस्त्यं मुनिं पतित्वेन वव्रे । जनकौ तदनुरोधेन सर्वविध-यौतुकादि-सम्भृतं महर्षिमगस्त्यं स्वसदृशं विधाय तस्मै तां विवाहविधिना ददतुः । लोपामुद्रा पतिं परिचरन्ती तां सिद्धिं प्राप यया चमत्कृतो गीष्पतिः सुराचार्य्योऽपि तुष्टाव । तथाहि—एकदा अगस्त्याश्रमे स्वयं समुपेतो बृहष्पतिस्तं प्रशंसन्नुवाच—

महर्षे त्वं महाभाग्य ! तव पत्नी पतिव्रता ।
लोपामुद्रा सती नारी किमहं वच्मि तत्तपः ।।
सा त्वां छायेव पर्य्येति तच्चिन्ता पुण्यदा मता ।
अरुन्धत्यादि-नारीणां सतीनामग्रणीः स्मृता ।।
भुक्ते त्वयि स्वयं भुंक्ते सुप्ते स्वपिति सर्वदा ।
साध्वी भर्तुश्च भावज्ञा पति-प्रियहिते रता ।।
न द्वारि स्थितिमाधत्ते सदैव त्वां प्रतीक्षते ।
विना त्वदाज्ञया किञ्चिद् व्रतमुत्सवमेव वा ।।
न करोति न वा ब्रूते यत्ते नास्ति प्रियं वचः ।
धन्या माता पिता धन्यो धन्यश्चासौ सहोदरः ।।

श्वशुरौ च पतिर्धन्यो यत्र नारी पतिव्रता ।
अगस्त्यमित्थमभ्यर्च्य लोपामुद्रां स्तुवन् गुरुः ।।
यथागतः स्वकं धाम जगाम दिवमुत्तमम् ।।

ईदृग् हि लोपामुद्राया महिमा यं स्तुवन् सुराचार्य्योऽपि स्वात्मानं कृतगङ्गास्नानं मनुते स्म । सा सर्वासां पतिव्रतानामग्रणीर्भूत्वा पतिसम्बन्धे यां गाथां जगाद सा नारीभिः सदा स्वहृत्पटलेऽङ्कनीया । तथा हि—

न कामये भर्तृ-विना-कृता[1] सुखं, न कामये भर्तृ-विना-कृता दिवम् ।
न कामये भर्तृ-विना-कृता श्रियम्, न भर्तृहीना व्यवसामि जीवितुम् ।।

लोपामुद्रानु-महाकीर्तिरद्यापि दिवि विस्तृता ।
अमरैरपि नुता पूर्वं किं वाच्यं पूर्वमानवैः ।।

इति स्कन्दपुराणे काशीखण्डे पूर्वाऽर्द्धे चतुर्थेऽध्याये लोपामुद्राचरितम् ।

अनसूया-चरितम्

अनसूयाऽत्रि-पत्नी सा कर्दमस्य सुता सती ।
सीतया सङ्गतिर्यस्यास्त्रिदेवाः स्तनपायिनः ।।

कर्दमस्य महर्षेः सुता देवहूतिगर्भजा अनसूया अत्रिणा परिणीता महासती प्रसिद्धाऽस्ति । अस्याः सतीत्वमहिमा जगति ईदृशो विश्रुतोऽभूत् यत्तिस्रो देव्यो ब्रह्माणी लक्ष्मीः पार्वती च ईर्ष्याकलुषिता अभूवन् ताभिश्च रहसि परामर्शं परस्परं विधाय त्रयोऽपि देवास्तस्याः सतीत्वं दूषयितुमभ्यर्थिताः । तेऽपि निज-धर्मपत्नी-मान-रक्षकाः तपस्वि-वेशं विधायाऽनसूयाऽऽश्रमं प्राप्ताः । तदानीमत्रि-महर्षिर्बहिर्गतोऽभूत् । इति सैव तेषामातिथ्यञ्चकार । कृतातिथ्यास्तेऽवोचन् विवस्त्रा भूत्वाऽस्मानतिथीनुस्तन–दानेन समर्चयेति । अनसूयोवाच-साधु तदपि करोमि क्षणं प्रतिपालयतेति । ततः सा जलमादाय सङ्कल्पं चकार यदि मया कर्मणा

१ — भर्तृ-विनाकृता भर्त्रा विना कृता पति-विरहिता इत्यर्थः ।

मनसा वाचा स्वभर्तुरन्यः पुमान् स्वप्नेऽपि न चिन्तितश्चेदिमे त्रयोऽपि तपस्विनः शिशवो भवन्त्वचिरादिति प्रोक्तवत्यां तस्यां ते त्रयस्तत्र शिशवो भूत्वा क्रीडापरा अभूवन्। अनसूया च तान् दोलायामारोप्य लालयन्ती विवस्त्रा स्तनपानमप्यकारयत्।

इत्थं ते त्रयोऽपि देवास्तत्राऽनसूयाऽतिथ्य-परवशाः शिशवो भूत्वा विस्मृतदेवभावा दोलारोहणं कुर्वन्ति स्म। इतो देवर्षिः सर्वमितिवृत्तं तेषां धर्मपत्नीभ्यो जगाद।

ताश्च श्रुत्वा विस्मिता विपन्नाः पुनस्त्यक्तकालुष्याः शरणाऽगतभावापन्ना अनसूयाशरणं जग्मुः। तत्र तां प्रसाद्य स्व-स्वभर्तॄंस्तद्बन्धनान्मोचयित्वा स्व-स्व-स्थानं परावृत्ताः। अनसूया सतीत्वञ्च विनाशयितुकामानामादिदेवानामपि आदान-स्थाने प्रदानकृत्यं यदि गले पतितं चेत्का कथा पामराणां मानवानाम्। अस्या एवान्तिके रामः सीतां प्रजिबायारण्यगः। इत्यलम्।

इत्यतश्चरितात् शिक्षेयमुद्भवति यद्भगवतोऽचिन्त्यचरितस्य स्त्रीसतीत्वं परमप्रियं यत्कृते स सर्वामपि अघटनघटनां घटयति। पटुमपि अपटयति। इत्यहोऽद्भुतः सतीमहिमविलासः। अस्य विस्तरस्तु पुराणादिष्ववगन्तव्यः—

अहो सतीप्रभावोऽयं येन देवास्त्रयोऽप्यमी।
अनसूयाञ्चले सुप्ताः शिशुभावं समाश्रिताः॥ १॥
पुनस्ते निजभार्य्याभिः स्त्रीभिरेव समुद्धृताः।
शरणागतकामाभिरनसूयाश्रितात्मभिः ॥ २॥
नहि शङ्का प्रयोक्तव्या चरितेऽत्रेश्वरेच्छया।
सर्वं सम्भाव्यते तस्मिन्नचिन्त्यचरिते विभौ॥ ३॥
आदिदेवाः कथं जाता मानुष्य-वशवर्तिनः।
विस्मृतज्ञान-विज्ञानाः सतीत्वं तत्र कारणम्॥ ४॥
सर्वं सतीत्वतो ज्ञेयं कृत्यमत्राद्भुतं भुवि।
अनसूया-प्रभावेण कादयः शिशवोऽभवन्॥ ५॥

शाण्डिली-चरितम्

यस्या नामाऽपरं शैव्या शाण्डिली सा पतिव्रता ।
भर्तारं कुष्ठतां प्राप्तं नीरुजं तरुणं व्यधात् ॥

प्रतिष्ठानपुरे सत्ययुगे काले कौशिको नामैको ब्राह्मणः पूर्वपापकर्मविपाकात् तारुण्ये कुष्ठतामाप । तस्य भार्य्या परमसती कुष्ठरोगाक्रान्तमपि तं पूर्ववदुपचचार । कदाचित्कामपि तन्नगरगां वेश्यां परमप्रसिद्धां तद्गृहमार्गतो यान्तीं स गवाक्षतो ददर्श । तामुद्वीक्ष्य समुद्रिक्तकामवासनः पत्नीमुवाच । मामेतस्या गृहं प्रापय । पतिव्रता सा पत्युरिच्छामन्यथा कथं कुर्य्यादिति तं गृहीत्वा प्रचुरं द्रव्यमादाय तद्गृहं प्रतस्थे ।

रात्रिरन्धकार-बहुला कृष्णपक्षीयेति मार्गावलोकनं दुस्सहं बभूव । मध्येमार्गं क्वापि माण्डव्यो मुनिः शूलीमारूढोऽर्द्धप्रविष्ट-शूलतया कष्टां दशामापन्नोऽभूत् । मार्गे गच्छतोस्तयोः पुरुषाङ्गस्पर्शेन माण्डव्यो भृशं व्यथितोऽभवत् । ततश्च परमक्रुद्धस्तं शशाप—येन ममेयं व्यथा वर्द्धिता स सूर्य्योदये पञ्चत्वमेष्यतीति । शाण्डिली द्रुतमुत्तरयामास सूर्य्योदयो नैव भविष्यतीति । ततश्चोभौ दम्पती-शोकार्तौ मध्यमार्गतो गृहे परावृत्तौ । परतः सूर्य्योदयावरोधात् सर्वे प्राणिनो भृशं समुद्विग्ना देवाश्च ब्रह्माणं शरणं ययुः । स हि तान् अनसूयामाराधयितुमादिष्टवान् । देवाश्च तामेत्य प्रार्थयाञ्चक्रुः शाण्डिल्याः शापेन सूर्य्यो नोदेतीति । द्रुतं सूर्य्योदयमादिश अनसूया च ज्ञातसारा देवैः सहैव शाण्डिलीगृहमुपेता तां व्यजिज्ञपत् । देवि ! सूर्योदयावरोधात् सर्वे प्राणिनस्त्रस्ताः किञ्चिकीर्षसि लोकसंक्षयम् ? ततः शाण्डिलीतो माण्डव्यशापं विज्ञाय अनसूया शाण्डिली-स्वीकृतिमधिगत्य हस्ते जलमादायोवाच—

उदेत्विनो यथापूर्वं जीवेच्चास्याः पतिः पुनः ।
यद्यहं कर्मणा वाचा मनसा स्यां पतिव्रता ॥ १ ॥

इत्थमनसूयायामुक्तवत्यां पूर्वस्यां दिशि भगवानंशुमाली समुदियाय द्रुतम् । सर्वतोऽनसूयाशाण्डिल्ययोर्जयध्वनिः शुश्रुवे । देवा गन्ध-

र्वाश्च दुन्दुभिं वादयन्तः पुष्पवृष्टिमवाकिरन् । शाण्डिल्यः पतिश्च पूर्वं मृतः पश्चाच्च विमलकायो युवा सुन्दरवदनश्चोत्थायोपस्थितामनसूयामन्यांश्च देवान् प्रणमन् तुष्टाव स्त्रीपातिव्रत्यम्—

अहो प्रभावः प्रथितः पृथिव्यां, पतिव्रतायाः प्रियवल्लभायाः ।
देवादिभिः सार्द्धमुपागतेयं, माताऽनसूया मम जन्मदाऽभूत् ॥
पतिव्रता मे गृहिणी प्रशस्या, यस्याः प्रभावादहमुद्धृतोऽस्मि ।
वन्देऽनसूया-सहितानिदानीं, सर्वान् सुरान्मद्भवनाभिपन्नान् ॥

मदालसा-चरितम्

मदालसा महाराज्ञी गन्धर्वाऽथ पतिप्रिया ।
या युयोज निजं पुत्रमलर्कं शुभशिक्षया ॥ १ ॥

शुभसुन्दरी मदालसा पूर्वजन्मनि विश्वावसोर्गन्धर्वस्य पुत्री बभूव । अपरस्मिन् जन्मनि नागराजस्याश्वतरस्य कन्या-रूपेण सैव शिवप्रसादात्प्रादुर्बभूव । उभयस्मिन्नपि जन्मनि शत्रुजिन्नाम्नो राज्ञः पुत्रो राजा ऋतध्वज एव तत्पतिरजनि । यस्याद्भुतं चरित्रमधो मदालसाप्राप्त्या सहैवोच्यते--

गालवो महर्षिरेकदा विश्वजिन्नाम्नो राज्ञः पार्श्वमुपेत्योवाच राजन् ! ममाश्रमे पातालकेतुर्दैत्यो घोरमुपद्रवं करोति । येन त्रस्तोऽहमादिशक्तिं स्तुतिभिः प्रसादितवान् । सा च प्रसन्ना कुवलयाख्यमेकमश्वं मत्पुरतः संस्थाप्योवाच—वत्स गालव ! अश्वमिमम् ऋतध्वजाय राज्ञे देहि । स हि अस्योपरि समारूढो दैत्यं पातालकेतुं हन्तेति । तमश्वमहं समानीतवान्-इहेति ।

शत्रुजिदाज्ञया ऋतध्वजो राजा तमश्वमारुह्याशु गालवाश्रमं जगाम । तत्र गत्वा यज्ञारम्भं विधाय दीक्षितं गालवं ररक्ष । ततश्च यज्ञविघाताय प्रवृत्तः पातालकेतुः शूकररूपमाधाय धूत्कारं समाचरन् यज्ञमण्डपमुपविशति यदा तदैव धनुष्पाणिः ऋतध्वजो राजा कुवलयाश्वमारुह्य तमनुससार । शूकरस्तु बाणविद्धोऽपि पातालं प्रविष्टः ।

कुवलयाश्वमारूढो राजापि तमनुसरन् पातालं प्रविष्टः। तत्र कुवलयाश्वमारूढो राजा तं हत्वा तदीयराज्यं तत्रत्यस्याश्वतरनागस्य पुत्राभ्यां तत्र स्थित्या जातपरिचयाभ्यां दत्त्वा पातालकेतुनापवाहितां गन्धर्वराजपुत्रीं मदालसां च परिणीय पुनस्तेनैव मार्गेण यथागतम् निजदेशमाजगाम।

इह मदालसोपलब्ध्या कृतगार्हस्थ्याश्रममृतध्वजं यौवराज्येऽभिषिच्य शत्रुजिद्राज्यकार्याद्विराममाशिश्राय। ऋतध्वजो राज्यं कुर्वन् मदालसया महिष्या धर्मानुष्ठानमाततान।

कदाचित्पातालकेतु-भ्राता तालकेतुः छद्मना ब्राह्मणवेशं धृत्वा यमुनातटे धर्मानुष्ठानपरमृतध्वजं तदीयस्वर्णहारं ययाचे। राजा ब्राह्मणकाम्या नावहेल्येति तस्मै सङ्कल्पविधिना हारं ददौ।

एवं कृतछद्मवेशः सफलः स पुनरपि क्वापि काले तस्मिन्नेव ब्राह्मणमुनिवेशे समेत्य राजानमुवाच। ममाश्रमे राक्षसोपद्रवो भवति। भवान् तत्र गत्वा तद्रक्षां करोतु। अहं तीर्थाटनं करिष्ये।

राजा च ब्राह्मणोऽयमिति मत्वा कृत-विश्वासश्च पितृ-पादेभ्यो राज्यभारं समर्प्य तेन सह तदाश्रमरक्षार्थं तत्र जगाहे। स हि धूर्तस्तालकेतुः तीर्थाटन-छद्मना निजाश्रम-भारं राज्ञे ऋतध्वजाय दत्त्वेह शत्रुजिद्राजपार्श्वमुपेत्योवाच। तव पुत्रो बलिना राक्षसेन निहतः सोऽश्वः पञ्चत्वमुपेत एष तस्य स्वर्णहार एनं गृहाण। अस्माकं विरक्तानां किमनेन बहुमूल्येन हारेणेति दत्त्वा द्रुतं ततोऽपससार।

शत्रुजिच्चाज्ञात-हारदानवृत्तान्तो मे पुत्रस्यैवायं हारो मुनिरयं सत्यवक्तेति जातप्रत्ययो मुमूर्च्छ। मदालसा तु तद्वियोगे पतिपादुकां गृहीत्वा सतीविधिना चितां प्रवृष्टा। सर्वस्मिन्ननर्थे संवृत्ते स तालकेतुस्तत्र निजाश्रमं गतो राजानमुवाच सम्प्रति भवान् निजराज्यं गन्तुमर्हति। अहं तीर्थाटनादागतोऽस्मीति। राजेह राज्ये समेत्य संवृत्तमनर्थं विलोक्य क्रुद्धो यावदुपैति तत्राश्रमे तावत्पलायिततालकेतुं

शून्यं तत्स्थानञ्चालोक्य ततो निवृत्तो मदालसाविरहकातरो राज्यादपि विरक्तो नाहं परिणयान्तरं मदालसेतरं करिष्ये। इति सङ्कल्पयामास।

कियतः कालात् सुहृदौ अश्वतरनागराज-पुत्रौ ऋतध्वजं राजानमुपेत्य विज्ञापितवन्तौ। शङ्करवरप्रसादाल्लब्धमदालसाकन्यो नौ पितृदेवो भवन्तमाह्वयति। राजा च श्रुतमदालसोपलब्धिर्द्रुतं कुवलयाश्वमारूढो नागलोकं जगाम।

तत्राश्वतरो नागराजः शङ्करवरप्रसादाल्लब्धां तां मदालसां निजकन्यात्वेन जामात्रे राज्ञे प्रदाय यौतुकादिना च परितोष्य स्वपुत्राभ्यां प्रस्थापयामास तं तद्राजधानीं कुवलयाश्वमारूढम्।

राजा च मित्रपितृतपस्ययोपलब्धां स्वमहिषीं मदालसां प्राप्य परमप्रसन्नहृदयः पूर्ववद्राज्यकार्य्यञ्चकार। धर्मानुष्ठान-परायणो राजा मदालसायां बहून् पुत्राञ्जनयामास।

मदालसा महाराज्ञी स्वोपदेशेन तान् सर्वानेव स्वसुतान्निवृत्तिमार्गमादिशन्ती कनिष्ठमलर्कं पत्युरनुरोधेन प्रवृत्तिमार्गनिष्ठं राज्यभारवहनक्षमं विदधती विललास। अन्ते पत्या सह वानप्रस्थाश्रमं जिगमिषुर्मदालसा राज्ञी पुत्रमलर्कं राज्येऽभिषिषेच। अलर्कश्च मदालसोपदेशानुसारं राज्यञ्चकार। अवसाने च सोऽप्यलर्को राजा मदालसापुत्रोऽहमिति मातुः शिक्षां सफलयितुं निजं पुत्रं राज्येऽभिषिच्य वानप्रस्थाश्रमं ययौ। मदालसोपदेशश्च नारीभिः स्वपुत्रेभ्यः सदैव प्रदेय इति मार्कण्डेय-पुराणादुद्ध्रियते।

धरामरान् पर्वसु तर्पयेथाः समीहितं बन्धुषु पूरयेथाः।
हितं परस्मै हृदि चिन्तयेथा वित्तं प्रदानार्थमुपार्जयेथाः॥
सदा मुरारिं स्वनुभावयेथास्तद्ध्यानतोऽन्तष्षडरीञ्जयेथाः।
मायां प्रबोधेन निवारयेथा अनित्यतामेव विचारयेथाः॥
राज्यं कुर्वन् सुहृदो नन्दयेथाः साधून्रक्षंस्तात यज्ञैर्यजेथाः।
दुष्टान्निघ्नन् वैरिणश्चाजिमध्ये गोविप्रार्थे वत्स ! मृत्युं भजेथाः॥

बालो मतो नन्दय बान्धवानां गुरोस्तथाज्ञाकरणैः कुमारः ।
स्त्रीणां युवा सत्कुलभूषणानां वृद्धो वने वत्स ! वनेचराणाम् ॥

इत्थं हि भारते आदर्शनार्य्यो बभूवुः । याः स्वपुत्रान् राज्यशासनक्षमान् कुर्वन्त्योऽपि योगमार्गप्रवीणाश्चक्रुः । येनेयं प्रसिद्धिः भारतीया राजा नाभोगेऽपि योगं साधयन्ति स्म । इति ।

शैव्या-चरितम्

"हरिश्चन्द्रस्य पत्नी सा शैव्या राज्ञी पतिव्रता ।
पतिमुद्धारयामास विक्रीय स्वं तथात्मजम्" ॥

पुरा हि कृतयुगे ताराऽपरनामा शैव्या शिविनाम्नो राज्ञः कन्या समजनि । या हि राज्ञा हरिश्चन्द्रेणोद्वाहिता पति-सेवा-निरता परमा पतिव्रता बभूव । एकदास्वप्न प्रसङ्गतो हरिश्चन्द्रो राजा दानविधिना सर्वमपि नैजं राज्य विश्वामित्राय महर्षये प्रददौ ।

प्रत्यूषवेलायां स्वपत्न्यै विज्ञापयामास दृष्टं स्वप्नमिति ततस्तेनोक्तं यावदसौ ब्राह्मणो न समायाति तावदेवास्य राज्यस्य रक्षणभारो ममोपरि । शृणु—

"त्वामपृष्ट्वैव विप्राय संवेशे प्रददावहम् ।
राज्यमित्येव चिन्ता मां बाधते साम्प्रतं प्रिये" ॥

तच्छ्रुत्वा पतिव्रता शैव्या परमप्रसन्नोवाच—

हर्षास्पदे कथं चिन्ता महाराजं विबाधते ।
ऋषीणाममृतां वाणीं स्मरत्येतां न किं भवान् ॥ १ ॥
गेहं वित्तं क्षणध्वंसि जीवितं क्षणभङ्गुरम् ।
एषां सदुपयोगोऽयं यदन्येभ्यः समर्पणम् ॥ २ ॥
चला लक्ष्मीश्चलाः प्राणाः चले जीवे च मन्दिरे ।
चलाचले च संसारे धर्म एको हि निश्चलः ॥ ३ ॥

इदन्तु महाराजेन मे हृदयेन सम्मन्त्र्यैव कृतमिति मन्ये । परन्तु साङ्गतादक्षिणाकृते कुतो द्रव्यम् आगच्छेदित्यत्र किं विचा-

रितम् ? हरिश्चन्द्रोऽवोचत् "यावद्विश्वामित्रो राज्यं न गृह्णाति तावदत्र स्थितिरस्माकम्। आगते तस्मिन् राज्यं तस्मै समर्प्य वाराणसी नास्माकं राज्यमिति तत्रैवास्मान् आसूर्य्यस्थितिं दिवसेनैव विक्रीय यद्द्रव्यं प्राप्स्यामि तदेव द्रव्यं तस्मै दास्यामीति मे निश्चयः"।

शैव्यापि राज्ञोऽभिप्रायं समर्थयन्ती पूर्वमात्मनोऽपत्यस्य च राज्ञो हस्तेन विक्रयं व्यजिज्ञपत्। राजा पत्नीहृदयानुकूलमेव समागताय विश्वामित्राय राज्यं समर्प्य तेनैव सह वाराणसीमुपेतो कस्यचिद्-ब्राह्मणस्य हस्ते धर्मपत्नीं शैव्यामात्मजं च रोहिताश्वं विक्रीय अप्राप्त-पर्य्याप्तद्रव्य आत्मानमपि क्रेतारं कञ्चनालभमानः पूर्वप्रतिज्ञानुसारं सूर्य्यास्तचिन्ताग्रस्तश्चाण्डाल-हस्ते विक्रीय ततो लब्धपर्याप्तद्रव्यः साङ्ग-तादक्षिणर्णामुक्तोऽभूत्।

इत्येवं चण्डाल-भृत्यतां वहतः श्मशान-कर-ग्रहणव्यापृतस्य हरिश्चन्द्रस्य पुत्रो रोहिताश्वः सर्पदंशेन (विश्वामित्रः सर्परूपत्वेन तं ददंश) पञ्चत्वमाप। तच्छवमङ्के कृत्वा श्मशानभूमिमुपेता शैव्या तद्भूमिकरग्रहणार्थमागृह्णन्तं हरिश्चन्द्रमुवाच परिचिन्वाना आर्य्य-पुत्र ! अहं भवतः कर्तव्य-सङ्कटं जानामि। परन्तु किं करोमि मद-न्तिके तु कपर्दिकैकापि नास्ति। अहो भवान् मे शाटिकाञ्चलं स्फाट-यित्वा श्मशानकरं प्रपूरयतु इति। इत्थं तस्यां करुणार्द्रमुक्तवत्यां कर्तव्य-परायणे च हरिश्चन्द्रे शाटिकाञ्चलं कर्तितुं व्यवसितेऽकस्माद् विद्युज्जज्वाल। तत्रैव ब्रह्म-विष्णु-शिवादयो देवाः समवेता बभूवुः। श्मशानभूमिर्दिव्यं धामाभूत्। ब्रह्मदेव उवाच—

हरिश्चन्द्र महाराज ! त्वद्विधो नेह भूतले,
परीक्षा ते समाप्ताभूत् भुंक्ष्व त्रैविष्टपं सुखम्।
पुत्रोऽयं ते चिरायुः स्यात्कीर्तिस्ते विमला भुवि,
शैव्ये ! पुत्रि ! वरं ब्रूहि धन्या त्वं भर्तृ-सेविका ॥

ततः शैव्योवाच-भगवन् पितामहदेव—

भवत्प्रसादात्पति-पुत्रलाभोऽस्तीतः परं किं कुशलं स्त्रिया मे।
भवेत्परीक्षा न कलौ जनानां वरोऽद्य देयो भवता जनेभ्यः ॥

तदैव ब्रह्मदेव एवमस्तु इत्यभिधाय रोहिताश्वं भारतसाम्राज्ये युवराजपदेऽभिषिच्य हरिश्चन्द्रस्तेपतिस्त्वया सहैव यथेच्छं सार्वभौमं साम्राज्यं भुञ्जानोऽन्ते ब्रह्मलोकमुपेता। इत्युक्त्वा देवैः सह ब्रह्मलोकं प्रतस्थे। ततः प्रभृति लोकप्रसिद्धिरभूत् यत्कलौ नेह कस्यापि धर्म्म-परीक्षास्तीति।

दमयन्ती-चरितम्

पतिप्राणा महाराज्ञी दमयन्ती स्वयंवरे।
नलं वव्रे सुरान् हित्वा कलिनातः कर्दथिता।

अस्ति विदर्भदेशे कुण्डिनपुरं नाम नगरम्। तत्र भीष्मो नाम राजा बभूव। तस्य दमनक-मुनि-प्रसादात् दम-दान्त-दमन-नामा-नत्रयःपुत्रा दमयन्तीनामिकैका कन्या च जातेति। सा रूपौदार्य्यादि-गुणेषु अद्वितीया स्वयंवरे समुपस्थितान् शक्रादि-देवानुज्झित्वा नलं राजानं पतिं वव्रे। तत्र समये स्वयंवरमनुपस्थितौ कलिद्वापरौ दमयन्ती-वृतं नलं प्रद्विषन्तौ तद्भ्रात्रा पुष्करेणानुजेन द्यूते पराजितं कारयित्वा वनवासं कारितवन्तौ।

तत्र वनेऽपि द्वापरः शकुन्तच्छद्मना तस्य परिधानं धौतमपि जहार। कलिश्च तमारूढो रात्रिसुप्तां दमयन्तीं हापयामास। अग्रे एकाकी वने पर्य्यटन्नलोऽजगरेण कर्कोटकनाम्ना दष्टो ह्रस्वकायः कुरू-पश्चाजनि। तेनाजगरेण तस्मै नलाय एकं प्रावारं प्रदत्तम्। यदा नलस्त-त्परिधास्यति तदैव स्वरूपं पूर्ववत् प्राप्स्यति। इतो दैवयोगाद् दमयन्ती सार्थवाह-सङ्गता मातृष्वसुरङ्कमुपेताभूत्। वनतोऽत्र निज-मातृष्वसुः पार्श्वमागता सा सर्वं नलवृत्तान्तमश्रावयत्। नलोऽपि ततोऽयोध्यापतेः ऋतुपर्णराजर्षेः सारथित्वेनात्मानं जुगोप। पश्चाच्चर्तुपर्ण-विप्रद्वारा नलस्य वृत्तान्तमुपलभ्य दमयन्तीद्वितीय-स्वयंवरच्छद्मना नलमुद्दधार। दमयन्तीं समुपलभ्य नलः कर्कोटक-प्रदत्त-वस्त्रपरिधानेन प्राप्त-पूर्व-रूपस्तां तुष्टावेति निर्दिश्यते किञ्चित् तद्वाक्यम्।

नलो दमयन्तीमनुनयन् ब्रूते—

वैषम्यमपि सम्प्राप्ता गोपायन्ति कुलस्त्रियः ।
स्वं, सतीत्व-प्रभावेण तरन्ति सकलापदः ॥ १ ॥
कालेनाक्रान्त-कायोऽहं विदासा हृत-राज्यकः ।
नष्ट-चेता वने त्यक्तोऽनुक्रोश्योऽस्मि कुलस्त्रिया ॥ २ ॥

इत्थं दमयन्ती-प्रतिभया तत्सङ्गतो नलः स्व-पुरमेत्य ऋतुपर्ण-राजर्षि-सम्पर्कतो ज्ञातद्यूतसारो निजभ्रातरं द्यूते पराजित्य पुनः स्वराज्यम्प्राप्य ननन्द । इत्यहो अवर्णनीयो महिमा कुलवत्या नार्य्या यत् कलिरपि नलमेवाक्रान्तवान् । न तु तां स्प्रष्टुं शशाक ।

सुनीति-चरितम्

सुनीतिर्ध्रुवमाता सा तुष्टा भर्त्राऽप्युपेक्षिता ।
ध्रुवपुत्रं समुत्पाद्य सवलोकाभिनन्दिता ॥ १ ॥

मनुवंशे-उत्तानपादस्य राज्ञो द्वे महिष्यौ बभूवतुः सुनीतिः सुरुचिश्चेति । तत्रोत्तानपादो ज्येष्ठां सुनीतिमनादृत्य कनिष्ठायां सुरुचावेवाऽसक्त आसीत् । कदाचित् स्वाङ्कमारोढुमुत्सुकं सुनीतितनयं ध्रुवं नाभिननन्द सः । ध्रुवं श्रावयामासोपालम्भ-रूपेण तत्रोपविष्टा सुरुचिः । अयि भो ! वत्स ! यदि त्वं स्वपितुः क्रोडमारोढुमिच्छसि तर्हि त्वया मदुदरतो जन्म कथं नालभ्यत । इत्याक्षिप्तोऽसौ विमात्रा विषण्णो ध्रुवः सर्वं विमातृ-कृतावमानं स्वमात्रे सुनीत्यै श्रावयामास बहु विललाप च । सर्वमुदन्तजातं श्रुत्वा स्वपुत्रं लालयित्वोवाच मारोदीः वत्स ! सर्वेषां जनकः श्रीभगवान्नारायणो वरीवर्त्तते समदर्शी, अनाथानां परिपालकः शङ्खचक्रगदापद्मधारी तमेवाराधय वन एव मेलिष्यत्यसौ । एवं मातृद्वारोत्साहितो ध्रुवः पञ्चवर्षीयो वनं निर्जगाम नारायण ! नारायण ! इत्याहूतिं भृशं चकार । एवं कुतश्चिन्नारदः तत्रारण्ये तमुपेत्य प्रोवाच । भो पुत्रक ! कमाह्वयसि ? स नारायणमिति प्रत्यूचे नारदस्तस्मै पञ्चवर्षीयाय द्वादशाक्षरं मन्त्रं "ॐ नमो भगवते वासुदेवाय" इति दत्वा स्वैरं गतोऽभूत् । सम्प्राप्तद्वादशाक्षरमन्त्रो ध्रुवो नारायणं तपसा प्रसादयामास तत्तपसा तुष्टो नारायणस्तत्रैव

ध्रुवं स्वात्मानं चतुर्भुजरूपं शङ्खचक्र-गदा-पद्म-वन-माला-युक्तं दर्शयामास। भगवताऽऽदिष्टोऽसौयत् पुत्र! पूर्वं त्वं पितृ-पैतामह-सम्प्राप्तं राज्यं कुरु पुनरन्ते त्वं मल्लोकं प्राप्स्यसि। यत्र गत्वा प्राणी न निवर्तते मयि ते नैष्ठिकी भक्तिर्भविष्यति ध्रुवलोकं विख्यातं लोकं भविष्यति।

पितोत्तानपादोऽपि ध्रुवं नारायणतो लब्धवरं श्रुत्वा महता समारम्भेणानीय तं राज्येऽभिषिच्य वनं वव्राज। इत्थं सुनीतिः कालेन राजमाता जाता सुरुचेः कुमार उत्तमो मृगयां गतो व्याघ्र-हतोऽभूत्। सुरुचिस्तु पुत्र-वियोगमसहमाना पञ्चत्वमगात्।

इतो ध्रुवकुमारः स्वमात्रा राज-मातृपदं प्राप्तया सह समृद्धं साम्राज्यं संरक्षन् कृतोद्वाहो जनितसन्तानोऽन्ते मानव-दुर्लभां गतिमासादितवत्यां मातरि स्वयमपि सशरीरं ध्रुवलोकमुपजगाम। तथाहि—

मातुः प्रसादाद् ध्रुवलोकमेतो
विराजते राजसुतो ध्रुवोऽसौ।
माता सुनीतिर्ध्रुव-पुत्रमाप्य
स्वयं कृतार्था तपसस्तदीयात्॥

सीता-चरितम्

सीता विदेहतनया[१]वनिजा सती सा
पत्यु[२]र्वियोगम[३]भजच्छुकबन्ध-दोषात्[४]।
विष्णु[५]-स्वरूप-कृतनारदवञ्चनातो
रामो[६]ऽप्यलब्ध[७] धरणी-तनया[८]-वियोगम्॥१॥

१—अवनिः पृथ्वी तस्याः सकाशाज्जाता इति अवनिजा। विदेहस्य राज्ञः तनया पुत्री सा प्रसिद्धा सती सीता। २—पत्युः रामात् वियोगम् अन्ते वनवासरूपतः। ३—अभजत् प्राप। ४—शुकयोः शुकपक्षिणोः दम्पत्योः बन्धः पञ्जरे पातनं तस्य दोषात्। ५—विष्णुस्वरूपे कृता या नारदस्य वञ्चना तस्या इति विष्णुस्वरूपे कृतनारदवञ्चनाततः। ६—रामो दाशरथिः अपि। ७—अलब्ध लब्धवान् इत्यर्थः। ८—धरण्याः तनया धरणीतनया तस्या वियोगं रावण-हरण-काले। तथाहि—

मैथिलप्रदेशे राज्ञा जनकेन यागारम्भ-काले धरां शोधयितुं हलं कृषतो धरातः सीतोद्गता कन्यैका समुपलब्धेति तस्या नामापि सीता इत्येवाभूत्।

सा हि कौमारावस्थायामुद्याने क्रीडन्ती सखिभिः सह वृक्ष-शाखा-निलीनं शुकद्वयमतिमनोरमं निग्राह्य पञ्जर-बन्धं चकार शुकस्तु पञ्जरान्मुक्तोऽपि शुकी-वियोगेऽमृत। शुकी कियतः कालात् पञ्जरे युग्मापत्यं जनयित्वा कालतोऽम्रियत तदेवं शुकद्वयमयोध्यायां रजक-दम्पती भविष्यतः। यद्वाक्यात्सीता रामवियुक्ता जनिष्यते।

विष्णुदेव एकदा नारदं क्वापि स्वयंवरे स्वात्मानं वारयितुकामं तदीयं सौन्दर्यमीहमानं सर्वं सौन्दर्यं दत्त्वापि मुखं वानरीयं दत्तवान्। उद्घाटिते भेदे क्रुद्धो नारदस्तं शशाप। भवान्नारी-वियोगे विह्वलो विलपिष्यति। इति। तच्छापत एव रामः सीतायां रावणापहृतायामरण्ये बहु विललापेति वाल्मीकीये द्रष्टव्यम्।

सेयं जनकनन्दिनी सीता रामेण धनुषोऽधिज्य-करण-पणेन परिणीता तःमादायसोऽयोध्यां जगाम। तत्र रामाभिषेके कैकय्या निवारिते तत्स्थाने भरताभिषेके रामस्य च वनप्रयाणे याचिते राज्ञा दशरथे-

---

नारदः कदाचिद्विष्णोरग्रे गर्वेण आत्मन इन्द्रियजित्त्वं प्रशशंस। ततो विष्णुस्तद्गर्वप्रभञ्जनाय तन्मार्ग एव मायिकं स्वयंवरं व्यरीरचत्। यत्रातिसुन्दरी नायिका पतिंवराऽऽसीत्। नारदस्तां वीक्ष्य विमुग्धो मार्गत एव परावृत्य विष्णुं ययाचे 'स्वं रूपं मह्यं देहि अहं स्वयंवरे गन्तुमिच्छामि।' विष्णुस्तं विवञ्चयिषुः सर्वं स्वं रूपं दत्वापि मुखं वानरीयं दत्तवान्। वराको नारदो हि कन्यया वृतमेवात्मानं मत्वा सर्वाग्र एवोपाविशत् सा पतिंवरा तमदृष्ट्वैवाग्रे प्रचचाल। पुनर्नारदस्तत उत्थायाग्रे क्वापि स्थितस्तत्रापि तमदृष्ट्वैव साऽग्रे ययौ। असकृदिदं नारदकृत्यं वीक्ष्योपहसन्तौ कौचित् तमूचतुर्दर्पणे मुखं पश्येति। ततो मुखं पश्यन्नतिक्रुद्धो नारदो विष्णुं शशाप त्वमपि नारीजन्मवियोगं प्राप्य विलपिष्यसीति।

नापि धर्मपाशबद्धेन तथैवानुष्ठिते तेनैव सहारण्यं प्रस्थिता। रावणेन राक्षसराजेन हृता लङ्कां नीता। तत्रापि महता प्रयत्नेन सुग्रीवेण बालिवधाभिलाषिणा मैत्रीं विधाय रामस्तत्सैन्य-साहाय्यमाश्रित्य रावणं हत्वा तामुद्दधार। अग्नौ च तां परीक्ष्य स्वजन्मभूमिमयोध्यां निनाय।

तत्र राज्यमधिगत्य सीता जन्मान्तरे रजकतां गतस्य शुकद्वयस्य वचसा पुनर्वनमेव वाल्मीकेर्मुनेराश्रमं रामेण विवासितोवास। वाल्मीकेः प्रयत्नेन रामाश्वमेवयज्ञे रामाय पुनर्दातुमानीतापि स्वमातुरङ्के धरायां लीना समजनि। इति संक्षिप्तं चरितं तस्याः।

अस्याश्चरित-चित्रणमादिकविना वाल्मीकिना वाल्मीकीय-रामायणे द्वितीयकविना व्यासेन चाध्यात्मरामायणे ततोऽन्यैः प्रायः सर्वैरेव कविभिः काव्यनाटकादिषु विबद्धम्। व्यासस्य तु तृप्तिरेव न दृश्यते। स हि पद्मपुराणे प्रधानतयाऽन्यत्रापि प्रायः सर्वेष्वेव पुराणेषु महाभारतेऽपि कुतोऽपि प्रसङ्गमुत्थाप्य सीतारामचरितं चित्रितवानेवेति विचित्रो महिमा सीतायाः।

"सीताचरित्रं परिशीलनीयं—वराङ्गनाभिश्च सुकन्यकाभिः।
रामानुगा सर्वत एव याऽभून्न वापि तद्दोषमुदाजहार॥"

माण्डव्युर्मिला-श्रुत-कीर्ति-चरितम्

तिस्रोऽप्येता विदेहानां, कुलेजाताः सुताः समाः।
पित्रोर्भेदान्मातृभेदाद्, भरताद्यैर्विवाहिताः॥

मैथिलप्रदेशे जनकपुरे विदेह-राजस्य सीर-ध्वजस्य भ्राता कुश-ध्वजः कनीयान् बभूव। तत्र सीरध्वजस्य सीतोर्मिले, कुशध्वजस्य च माण्डवी-श्रुतकीर्तिरिति द्वे बभूवतुः सुते।

धनुर्यज्ञे रामेणाधिज्ये धनुषि विहिते सीता रामेण माण्डवी भरतेन उर्मिला लक्ष्मणेन श्रुतकीर्तिः शत्रुघ्नेन संगता-परिणय-संस्कार कारयिता सदानन्दो गौतमः सहोदरयोरपि सीतोर्मिलयोर्भिन्न-मातृका-

भ्यां रामलक्ष्मणाभ्यां तथैव सहोदरयोरपि माण्डवी-श्रुतकीर्त्योर्भिन्न-प्रसूभ्यां भरत-शत्रुघ्नाभ्यां मेलापकविधिना सङ्गमयामास । तथाहि—

कौशल्ययासावि सुखेन रामः, प्राक् केकयीतो भरतस्ततोऽभूत् ।
प्रासोष्ट शत्रुघ्नमुदारचेष्टमेका सुमित्रा सह लक्ष्मणेन ॥

इति भट्टितो मातृभेदज्ञानं कार्यम् ।

अथायोध्यामागता इमा द्वितीयश्रिय इव परस्परप्रेम्णा श्वश्रूश्वशुरयोः शुश्रूषया पतिपरायणतया च दशरथ-भवनमुद्दीपयामासुः ।

रामाभिषेके प्रस्तुते बहुशो विबोधितापि कैकयी यदाति-प्रियतया रामं राज्याभिषेकान्निरोद्धं नोद्यताभूत्तदा मन्थरा कौसल्यायाः सपत्न्या राजमातृत्वादि-सुखमग्रे कृत्वा निरोधयामासेति नारीभिर्विमृश्यम् । श्वश्रू-कर्म गर्हितमपि रामविवासनं मनसि निन्दन्ती माण्डवी न क्वापि समुज्जगार । प्रत्युत जटां बिभ्रतो नन्दीग्राममधिवसतो भरतस्यैव पत्युरनुकृत्या स्वयमपि ब्रह्मचारिणी भरतवदेव रामानुकृत्या कन्दमूलाशनाऽतिष्ठद् । एवं हि उर्मिला लक्ष्मणं सीतारामसेवायां सम्प्रेष्य स्वयं चतुर्दशवर्षावधि ब्रह्मचारिणी कन्दमूलाशना बभूव । तथैव श्रुतकीर्तिरपि भरतानुकृत्या शत्रुघ्नवदेव माण्डवीमनुचकारेति—यथा परस्परं भ्रातृ-प्रेम तद्वदेव परस्परं भगिनीप्रेमापि । अद्वितीयमिदं सस्वर्णाक्षरमुत्कीर्य हृत्पटलेऽङ्कनीयमाधुनिकीभिर्नारीभिः पाश्चात्याभिमुखीभिरित्यलम् । आसां भगिनीनामेव परस्परसौहार्दाच्चत्वारोऽपि भ्रातरः परस्परं सम्मिलिता एवासन् । इत्यत एव हेतोरासां पतिसौख्येन सह सन्तानसुखमपि पूर्णमेवाभूत् । पश्यन्तु सीतायाः कुश-लवौ । माण्डव्यास्तक्षपुष्कलौ । उर्मिलाया अङ्गद-चन्द्रकेतू श्रुतकीर्तेः सुबाहु-शत्रुघातिनौ ।

एषां राजधानी यथा–१–लवस्य लवपुरम्, (लाहौर) २—कुशस्य अयोध्या, ३—तक्षस्य तक्षशिला, ४–पुष्कलस्य पुष्पपुरम्, ५–अङ्गदस्य कारुपथ-प्रदेशे अङ्गदीया, ६—चन्द्रकेतोः चन्द्रकान्ता नगरी, ७–सुबाहोः मधुरा (मथुरा), ८—शत्रुघातिनो वैदिश नगरम्, इत्येवं

तेषां राजनीत्या प्रजाः प्रसन्नास्तेऽपि सफला राजानोऽभवन् । कैकयी-सम्बन्धेऽपि पूर्व-प्रकरणमेवैकं निबद्धमस्ति । वाल्मीकीयेऽपि ।

भरतादधिकः प्रेमा कैकय्या राघवे ध्रुवम् ।
अयोध्याकाण्डवृत्तेन स्फुटमेव प्रतीयते ।।

अन्यच्च राज्ञः प्रतिज्ञारक्षणं रामकीर्तिप्रदीपनं भरतचरित-प्रख्यापनम् । 'रामादपि हि तं मन्ये धर्मतो बलवत्तरम्' इति हि भरतचरित्र-विषये दशरथ-वाक्यम् । किम्बहुना सर्वमपि वाल्मीकीयं कैकय्युपज्ञमेव तु विद्यते । इत्युक्तं प्रथम-प्रबोधे मया नारीजागरणनाटकेऽपि दशरथ-मुखात् कैकयी-प्रशंसैव कारितास्ति ।

अस्तु सर्वथा दशरथस्य राज्ञः श्रिय एव प्रशंसिताः सन्ति । तत्र तस्य स्त्रीणां स्नुषाणाञ्च बुद्धिवैभवं परस्पर-सौहार्दमेव हेतुः । तथाहि—

"आयुर्द्रोणसुते श्रियो दशरथे शत्रुक्षयो राघवे ।
ऐश्वर्यं नहुषे गतिश्च पवने मानश्च दुर्योधने ।।
शौर्यं सूर्य्य-सुते बलं हलधरे सत्यञ्च कुन्तीसुते ।
विज्ञानं विदुरे भवन्तु भवतां कीर्तिश्च नारायणे ।। इति ।

मन्दोदरी-चरितम्

मन्दोदरी महाराज्ञी महिषी रावणस्य सा ।
मयस्य पुत्री नीतिज्ञा निष्कर्म-ब्रह्मवादिनी ।।

त्रिपुरनगर-निर्माता मयो दानवो हेमानाम्नीमप्सरसं पर्यणैषीत् । तत्कुक्षित एवेयं मन्दम् उदरं यस्याः सा मन्दोदरीति यथार्थनामा कन्या समजनि । हेमा तु तां जनयित्वा स्वः प्रस्थिता मयस्तस्याःशिक्षा-प्रदाने बहु प्रायतिष्ट । यतः सा सर्वशास्त्रज्ञा राजनीति-निपुणा च समजनि ।

राक्षस-राजेन ब्रह्मणः प्रपौत्रेण विश्वश्रवसः पुत्रेण संजीविनी-विद्या-शालिना रावणेन तस्याः परिणयसंस्कारोऽजायत । पितुर्गृहाद्

यौतकाधिक्यमासाद्य पतिगृहमुपेता मन्दोदरी स्वगुणै राजमहिषी पदं प्राप्यान्तःपुरे सर्वमान्या बभूव। रावणोऽपि (रावयति लोकानिति रावणः) तां बहुमन्यते स्म।

यदा शूर्पणखा छिन्नकर्णनासा रावणं सीताहरणे व्यापारयामास (नोदयामासेति) तदैव मन्दोदरी तं बहुधा बोधयामास। यद्रामो न मानुषः सीताऽपि आदिशक्तिर्महामायास्ति। तस्या हरणं न न्याय्यम्, रामेण सह भवतो विरोधोऽपि न वरमहं मन्ये। विरम्यतामस्माद् व्यापारादिति। रावणोऽपि जानाति स्म यद् रामः साक्षात्-पुराणपुरुषः सोऽवतीर्णोऽस्मदादीन् कौणपान् हन्तुमिति। अतो नोपरराम स्वकृत्यात्।

ब्रह्मज्ञानिनी मन्दोदरी यथा रावणेन सह स्थिता कर्मबन्धन-विरहिता तथैव विभीषणेन सहोषिता।

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते।
हत्वापि स इमांल्लोकान्न हन्ति न निबध्यते॥

इति भगवदुक्तिः। तद्-भावाभिपन्ना अनहङ्कारा निष्कर्मा मन्दोदरी क्वापि तिष्ठतु न तस्याः कर्मबन्धनम्। इत्यत एवेयं पञ्चकन्यास्वपि गण्यते। वस्तुतस्तु पञ्चानां समाहारः इति विगृह्य समाहारे क-प्रत्यये च पञ्चकम् इति 'ना' इति नृशब्दस्य सौ रूपम्। पाठान्तरापेक्षया पञ्चकन्ना स्मरेन्नित्यं महापातक-नाशनम् अयं पाठः साधुः। एतत्पाठे तु कन्यात्व-प्रमाणस्य नास्ति प्रयोजनमिति।

अहल्या द्रौपदी तारा कुन्ती मन्दोदरी तथा।
पञ्चकन्याः स्मरेन्नित्यं महापातकनाशनम्॥

सरमा-चरितम्

विभीषणस्य पत्नी या सरमा परमा सती।
सीतामुपचचारैषा पति-कृत्यानुगा हृदा॥

इयं सरमा विभीषणस्य धर्मपत्नी। सीता-सेवायामियमपि त्रिजटावदेव तदनुकूलं व्यवहरति स्म। यदा रावणपादप्रहारोद्विग्नो विभीषणो रामं शरणं गच्छति तदा तु अधिकानुरागा तां परिचरन्ती राक्षसभेदमपि बोधयति स्म।

एकदा रावणो दूतद्वारा मायिकं छिन्नं रामशिरस्तदीयं धनुश्च सीताऽन्तिकं प्रेषयामास। तदेयमेव रहसि सीतां तद्रहस्यमुद्घाट्य व्यजिज्ञपत्। यन्मे ज्येष्ठकल्पिता मायेयमत्रभवती पश्यतु च्छिन्नस्यापि शिरसो निमेषाः पतन्तीत्यादि।

रामस्तु सर्वान् राक्षसान् हतवान्। मज्ज्येष्ठ एवैकोऽवशिष्यते। त्वं श्वः परश्वो वा समुद्धारितासि धैर्य्येण दिनानि यापयेत्यादि। इयं पत्यौ रामाश्रिते तु लङ्कायामेवासीत् सीता-सेवातो रावणेन विरोपिताऽपि गुप्तभावेन तां सन्तोषयति स्मेति प्रशस्यं बुद्धिकौशलमस्याः। सरमा-त्रिजटा-विबोधितैव सोता तावत्कालञ्जीवनं दधारेति संक्षेपः। जनश्रुतिरप्यनयोः सम्बन्धे—

राक्षसीष्वपि संसक्ता त्रिजटासरमेत्युभे।
सत्यौ सीतोपचारेण कलौ राज्यं प्रचक्र तुः॥

इत्यलम्। सरमा एलिजावेथ इति नाम्नाऽवततार पाश्चात्यदेशे तथा च त्रिजटाऽपि कलौ विक्टोरिया जाता। उभयोः संस्कृतं नाम "ऋग्जावेदा, व्यक्तोर्जा' इत्युभे अपि सीतासन्तोषिके तत्फलभुजौ च जाते विद्वांस एव विदन्ति। इत्यलम्।

सुलोचनाचरितम्

वन्द्याऽनसूया शवरी तपस्विनी
भक्ताऽथ मीरा विदुरप्रिया सती॥
सुलोचना शक्रजितस्तपस्विनी
यां वीक्ष्य रामोऽपि विसिस्मिये प्रभुः॥ १॥

अनसूयाचरितन्तु प्राक् प्रस्तुतमपि। अपरासामपि यथावसरं वर्णितं स्यादिह सुलोचनाचरितं चित्र्यते। सा हि मेघनादस्य रावणे-र्धर्मपत्नी यदा सखीमध्ये प्राङ्गणे समुपविष्टाऽभूत्। तदा सहसा अग्रे पतितं पत्युर्दक्षिण-भुजं छिन्नमपश्यत्। रामसेनाया माययमिति सन्दिहाना दासी-स्हतेन भुज-हस्ते संग्राहित-लेखनीकर्णजा भुजं प्रार्थयामास—

"पत्युर्यदि भुजोऽयं मे वृत्तं सर्वं लिखेन्ननु।
इति वाक्याऽवसानेऽसौ लिलेखाधोवचोऽञ्जसा॥" तथाहि—

प्रिये ! भ्रमस्तेऽपसरेद्धृतिं धर
सौमित्रिणा संयमिनेह सङ्गरे॥
समाहतोऽहं दिवमेमि मे शिरः
श्रीरामपार्श्वे व्रज विद्यते नय॥

इति लिखितं पठन्ती सुलोचना मूर्च्छिता भूमौ लुलोठ। क्षणादागतसत्त्वा चिरं विललाप। श्रुत्वा स्नुषाविलापं दशाननस्तदन्तिकमेत्य तां सान्त्वयामास। रुदती सुलोचना श्वशुरादेशमादाय शक्रजिच्छिर आनेतुं रामपार्श्वमियाय।

रामोऽपि श्रुत-सुलोचनोपस्थितिर्द्रुतमेत्य बहिस्तामुवाच—
देवि-सुलोचने !

जानेऽहं ते प्रभावं पतिरपि तव हा विश्वविख्यातकीर्ति-
र्दिष्टं को वा विहन्यादिति स दिवमगात्ते समीहां च वेद्मि।
सौमित्रिच्छिन्नकण्ठं शिर इह मम यत् पार्श्वं आस्ते गृहाण,
त्वां वीक्ष्याहो ममार्तिर्भवति सपदि हा याहि तत्पृष्ठगासि[१]॥

अङ्क-गृहीत-शिराः सुलोचना पार्श्व-स्थितं सौमित्रिं भावाभिनिविष्टोवाच—अये लक्ष्मण !

गर्वं त्वं मा गा हतः शक्रशत्रु[२] र्यत्रासीत्ते भार्य्यया मे विवादः।
त्वंसत्या उद्धारपक्षे यदासीर्भर्त्रा मेभूद्धा सतीत्वघ्नपक्षे॥

१—तस्य मेघनादस्य पृष्ठे गच्छसीति तत्पृष्ठगा सती इति यावत्। २—शक्रस्य

सीतोर्मिलाया मिलितं सतीत्वं, पत्युर्विनाशे मम विद्धि हेतुम् ।
एकाकिनो गर्हितपक्षगाहं नागामये त्वं जयमित्यवेहि ॥

इत्यभिधाय विरतायां सुलोचनायां वानरमण्डली मुग्धा पारस्परिकमुखावलोकिनी तूष्णीमास । तत्र सुग्रीवः कपीशो राममवोचत् । स्वामिन् कथमियं सुलोचना पत्युर्मे शिर इहास्त इति सञ्ज्ञौ ? रामस्तु पातिव्रत्यमहिम्ना सर्वं सम्भवतीति जानन्नपि सुलोचनैवेमान् बोधयेदिति मनसि यावच्चिन्तयामास । तावत्तदिङ्गितज्ञा सुलोचना सुग्रीवमुवाच—अये कपिराज ! युद्धक्षेत्रान्मे प्राङ्गणे पतितः पत्युश्छिन्नभुज-हस्तो लिखित्वा मां व्यजिज्ञपदिति । ततो द्विगुणित-विमुग्धायां वानर-मण्डल्यां मर्य्यादा-पुरुषोत्तमे च रामे—

तपनस्तप्यतेऽत्यन्तं दहनोऽपि च दह्यते ।
कम्पन्ते सर्वभूतानि वीक्ष्य पातिव्रतं महः ॥
न श्रुतं किं त्वया पूर्वं ब्रह्म-विष्णु-शिवादयः ।
अनसूया-गृहोपेता अरिङ्गञ्शिशुतां गताः ॥ इति ।

वदति एव मध्ये आच्छिद्य सुग्रीवस्तामवोचद् । यद्येवं तर्हि मृतमिदं मुखमपि हसितुमर्हति । इत्येवंवादिनि कपीशे रामाभिप्रायमालक्ष्य शोकमग्नापि सुलोचनाऽऽत्मगतमुवाच—

शत्रुः मेघनादः हतः (मयेतिशेषः) अये लक्ष्मण शक्रशत्रुः मेघनादः मया हतः इति गर्वं त्वं मा गाः । यत्र ते तव भार्य्यया सह मे (सुलोचनायाः) विवादः (आसीत्) त्वं तत्र सत्याः सीताया उद्धार-पक्षे यद् आसीः अभूः । मे भर्ता मेघनादः सतीत्वं (नारीणां) हन्तीति सतीत्वघ्नस्तस्य पक्षेऽभूत् अवर्तत । अतश्च सीतया सहिता उर्मिला सीतोर्मिला तस्याः (उभयोः स्त्रियोः) सतीत्वं मिलितं मम पत्युर्विनाशे हेतुं विद्धि । (न हि त्वं हेतुः) अहमेकाकिनी सती तत्रापि च गर्हितस्य सतीत्वहन्तुः पक्षगा इति हेतोः जयं विजयं न अगाम् गता । अये लक्ष्मण ! त्वम् सत्यं कारणम् अवेहि जानीहि (अत्र मेघ-नाद-वधे सीतोर्मिलोभयं सतीत्वं कारणं न त्वमिति निष्कर्षः)

यद्यहं मनसा वाचा कर्मणा पतिदेवता।
तदा हसतु संछिन्नमपि पत्युर्मुखं मम ॥

इत्येवं सहसा हसिते सुलोचनाङ्कगे संछिन्ने शक्रजिन्मुखे वानर-मण्डली चकित-चकिता स्तब्धा समजनि। सुग्रीवो मुक्तकण्ठं सुलोचनां तुष्टाव।

ततश्चलितु-कामा सुलोचना रामं व्यजिज्ञपत्। भगवन्! पत्युरन्त्येष्टि-संस्कारोऽद्य प्रवर्तते। तदनुगाहं चितामधिरुह्य तं संङ्गंस्ये। अतोऽद्य युद्धविरामो भवेदिति। रामोऽपि सुलोचनायाः पत्युरनुगमनं द्रष्टुमद्य युद्धविराम उद्घुष्यतामिति मारुतिविभीषणौ सन्दिश्य, ताञ्च सम्बोध्य, ससम्मानामनुगम्य, व्यसर्जयत् कियन्तमध्वानम्।

सुलोचनापि गृहमुपेता रावणादेशमुपलभ्य जलधिवेलायां चन्दनेन्धनघृताहुति-प्रदिग्धायां चितायां समग्रनरनारी-सङ्कुले वेलातटे परिधृतालङ्कारा सशृङ्गारा पत्युः स-शिरो देहमङ्के निधाय चितोपविष्टा ज्वलनाध्वना पत्या सङ्गता क्षणादैहलौकिकीं लीलां संववार।

"सुलोचनासमा नारी सती जगति दुर्लभा।
या चकाराद्भुतं कर्म रामसेना-समावृता ॥"

तारा-चरितम्

तारा वालिप्रिया श्रेष्ठा राजधर्मोपदेशिका।
ज्ञानज्योतिर्निरासक्ता कन्यात्वं न जहौ क्वचित् ॥

वालिनो वानरराजस्य धर्मपत्नी सुषेण-पुत्री तारा तत्त्वज्ञानिनी मुक्ता नारी बभूव। सा हि वालिनं सततं धर्मपथमुपदिदेश। यदा हि सुग्रीव एकदा ततः पराजितोऽपि पुनः सन्नद्धो भूत्वा योद्धुमुपसर्पति तदापि तारा तं राजनीतिमुपदिदेश। परन्तु बलगर्वितो वाली दिष्टप्रेरितोऽपि तारोपदेशं न शुश्राव। सुग्रीवेण साकं युध्यमानो रामवाणविद्धो दिवं जगाम।

म्रियमाणो वाली तारोपदेशं बुबुधे। पश्चात्तपन् सुग्रीवमानाय्य तस्मै राज्यमर्पयन् तारां तुष्टाव। तथाहि—

सुषेण-दुहिता चेयमर्थ-सूक्ष्म-विनिर्णये ।
औत्पातिके च विविधे सर्वतः परिनिष्ठिता ॥
यदेषा साध्विति ब्रूयात्कार्यं तन्मुक्तसंशयम् ।
नहि तारामतं किञ्चिदन्यथा परिवर्तते ॥
(किष्किन्धा० सर्ग २२ श्लोक १३,१४,)

रामोऽपि ज्ञाततारावैभवो ज्ञान-मार्गेणैव तां विबोधितवान् । यथा—तारे ! त्वं तु मुक्ता ज्ञानिनीति न मे बहुवक्तव्यमस्ति । वद जीवस्तु नित्योऽस्तीति जानास्येव तर्हि—

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वापि भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥

इत्येवं जीवाय रोदनमपि ते न वरम् । शरीरं तु त्वत्पुर एवास्ति । तत्कृते किं रोदनम् । इत्यादि वचसा रामस्तस्या मोहं दूरीचकार । विगतमोहा तारा तज्जाति-प्रथमा सुग्रीवं समाश्रितापि निरभिनिवेशा सती एव गीयते । यतोहि तत्त्वज्ञानिनी तारा वानरराजं वालिनं देहिनं मत्वा न सिषेवे किन्तु ईश्वरकलां मत्वा । तथैव सुग्रीवमपि ईश्वरकलां मेने न सुग्रीवं देहिनम् । इति ताराबुद्धौ एकैव चित्कला उभयत्रापीति नास्ति भेददृष्टिस्तारा-ज्ञाने । इति सा पूज्यतमा सतीत्युच्यते—सनातन-धर्माणस्तु तस्याः सतीत्वेन सह कन्यात्वमपि न गतमित्यामनन्ति । तथाहि—

अहल्या द्रौपदी तारा कुन्ती मन्दोदरी तथा ।
पञ्चकन्याः स्मरेन्नित्यं महा-पातक-नाशनम् ॥

अत्र पाठभेदोऽप्यस्तीति मन्दोदरीचरितेऽभिहितं तत्रैव द्रष्टव्यम् ।

इयं तारा प्रत्युत्पन्नमतिर्देशकालज्ञा राजनीति-निपुणाऽप्यासीद् । अन्तःपुर-प्रविष्टं लक्ष्मणं क्रुद्धं वीक्ष्य त्रस्तः सुग्रीव इमामेव तस्य पुरतः प्रजिघाय । इयञ्च तं नीतिवचसा माधुर्य्येण च क्लिन्नं विगतक्रोधं कृत्वा सुग्रीव-पुरतो निनाय । इति रामायणे वाल्मीकीये द्रष्टव्यम् ।

अहल्या-चरितम्

गौतमस्य मुनेः पत्नी सदानन्द-प्रसूर्मता ।
अहल्या ब्राह्मणी दिव्या या रामेण समुद्धृता ॥

ब्राह्मणकन्या अहल्या बाल्यकालादेव पितुरनुकम्पया ज्ञाततत्त्वसारा ज्ञानिनी समजनि। मिथिलाप्रदेशशासकानां विदेहराजानां पुरोधसा गौतमेन मुनिना तस्याः पाणिग्रहणसंस्कारोऽभवत् । सा पितुर्गृहादेत्य तदाश्रमे वसन्ती तमुपचचार । सदानन्दनामा सुतोऽपि गौतमादहल्यायां प्रादुरासीत् । यो हि पितुरवसाने जनककुलपुरोधा अभूत् । पौराणिकी कथास्ति यत् एकदा इन्द्राग्निदेवौ गौतमाश्रमे गतौ । तत्र रात्रेर्मध्ययामे एवाग्निः कुक्कुटरुतं कृतवान् । तद्भ्रमाद्गौतमोऽवसन्नां रात्रिं मत्वा स्नानार्थं नदीं जगाम । निर्गते तस्मिन् शक्रो गौतमवेशं धृत्वाऽहल्यया सङ्गमं चकार । आन्तो गौतमो यदा निवृत्तोऽभूत्तदात्रागत्याहल्यां शशाप त्वं जड़कृत्यं कृतवतीति प्रस्तरं भूत्वा तिष्ठ। रामात्ते शाप-विमुक्तिः । शक्रं शशाप सर्वाङ्गभगदेहो[१] भवेति । पुनर्बहुप्रार्थनया सन्तुष्टो भगास्ते नेत्राणि समये स्युरिति निरधारयत् । वाल्मीकीये रामपादस्पर्शाद्द गौतमस्त्री प्रस्तरभावान्मुक्ता पुनर्नारी जातेति द्रष्टव्यम् । विमर्शोऽयमत्र—गौतमवेशभृतं शक्रं गौतमत्वेन ज्ञातवती अहल्या तु निर्दोषैवासीत् । अत एव मर्य्यादापुरुषोत्तमेन सा तारितेति स्फुटं तस्या निर्दोषित्वम् । अपरञ्चाहल्यायाः कन्यात्वाच्युतौ तु ज्ञानित्वं कारणम्। ज्ञानवतीनां नारीणामयं पन्था नान्यासामिति विशिष्टनारीभिरवसेयम् । उक्तञ्च श्रीमद्भागवते—

नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः ।
विनश्यत्याचरन् मौढ्यं यथा रुद्रोऽब्धिजं विषम् ॥

१—सर्वाणि च तानि अङ्गानि सर्वाङ्गानि सर्वाङ्गेषु भगाः यस्य स सर्वाङ्गभगः देहात् इति व्यधिकरण-बहुव्रीहिः । ततः सर्वाङ्गभगो देहो यस्येति समानाधिकरण बहुव्रीहिणा सर्वाङ्गभगदेह इन्द्रः । वैशद्यम् ।

स्पष्टार्थतया—अहनि लीयते इति अहल्या रात्रिस्तस्या जारः सूर्य्यः। इति नैरुक्तोऽर्थः। सूर्य्यो हि रात्रिं विलापयति जारयति। अतः स अहल्याजार उच्यते। इयमेव कथा पुराणे इन्द्राहल्यारूपे परिणतेति सुधारकदृष्टिः। पौराणिकानां तु अहनि प्रकाशमये ज्ञाने लीयते इति अहल्या ज्ञानिनी नारी। यतः सा ज्ञानिनी विद्यते। अतो 'निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः'[१] इति नियमात् न तस्यां काऽप्यवस्थाधारणा स्त्रीत्वसम्बन्धिनी आसीदिति न कन्यात्वच्युतिः।

शबरी (श्रमणा)-चरितम्

मतङ्गमुनि-सन्दिष्टाऽतिभक्ताऽतितपस्विनी।
शबरी राममासाद्य मुक्ता स्वगुणतोऽजनि॥

शबरजातीया श्रमणा तपस्विनी शबरी पम्पासरःसमीपे मतङ्गमहर्षेराश्रमपार्श्वे कृतकुटीरा वसति स्म। सा हि स्व-शिष्यानुपदिशतो मतङ्गमहर्षेः कदाचिच्छुश्राव। यत्—

पत्रं पुष्पं फलं तोयं यत्किञ्चिद्भक्त-कल्पितम्।
सर्वं गृह्णाति देवोऽसौ भक्तिश्रद्धासमर्पितम्॥

भक्तहस्तार्पितं भगवान् तुच्छं वा सारं वा पदार्थं भक्तिश्रद्धा-युक्ततया सर्वमेवाङ्गीकरोति। तत्र जाति-वर्णाश्रमादिविचारं न करोतीति। भगवतः प्रसादने भावशुद्धिमात्रमपेक्ष्यते। स्वकर्त्तव्यं कर्मैवालं तत्र हेतुरिति। नान्यत् किमपि—

तथाहि— शुचि मनः शुचि कर्म शुचि व्रतं
शुचि विधानमपि श्रुतमीहितम्।
अशनकं वसनं शुचि सर्वतो
वरमुपानयते भगवत्पदम्॥ इति।

१—शुकदेवोक्तिरियं परीक्षितं प्रति। निरहंकारिणः कृष्णस्य गोपीक्रीडा-जन्यवद्धत्व-शङ्का यथा निर्मूला तथैव ज्ञानिनीनामहल्यादीनां कन्यात्वच्युतिशङ्कापीति सर्वमवदातम्।

श्रुत्वेदं शबरी सुधाह्लदस्नातेव धन्यमात्मानमामनन्ती मतङ्ग-मुनि शिक्षया मुनीनामावासं मार्गमाश्रमं मार्जयन्ती तेभ्यः पुष्प-फलादिकं तुलसीदलं व्यञ्जनादिकमुपहरन्ती स्नान-सरोवर-घट्टं परिष्कुर्वती गृहविरक्ता मुनि-सेवयैव दिनानि निनाय।

कदाचित् प्रसन्नो महर्षिमतङ्गस्तामुवाच। शबरि! तव निष्काम-कर्मणा त्रिलोकीनाथः प्रसन्नस्त्वां रामरूपेणात्रैवाश्रमे दर्शनं दास्यतीति! ततः प्रभृति मुनि-वचसि विश्वासं बिभ्रती शबरी द्विगुणितोत्साहा मुनिसेवापरायणा बभूव।

दैवयोगात्सीतापहारे तद्वियोगातुरो रामो विराधं हत्वा तद्वचसा शबरीमन्विष्यन् पवित्रं तदाश्रममप्याजगाम। सा तु स्वोटजे समुपस्थितं त्रिलोकीनाथं विलोक्य विस्मितान्यकार्य्या केवलं तन्मुखं निरीक्षमाणा कथञ्चित्सम्पादितपाद्यार्घाचमनीयाद्यतिथि-सत्कारा पूर्वसञ्चित-मधुराम्लरसं बदरीफलमानीय भगवतः पुरतः स्थापयामास। भगवांश्च सुधासमानीमानि फलानीति प्रशंसन् लक्ष्मणेन सह बुभुजे। सर्वमिदं पश्यन्ती शबरी लोकोत्तरमानन्दमनुभवन्ती कृतकृत्यतां जगाम।

तत्रैव कियन्तो मुनयः समेत्य लक्ष्मणमावेदितवन्तः। दीनबन्धो! ह्रदस्यास्य जलं कियतः कालाद्विकृतं विगुणितं विद्यते। भवतामागमनादस्य शुद्धिरपेक्षितेति। ततो लक्ष्मणस्तानुवाच—भवन्तस्तु जानन्त्येव—

जलाशयस्तथा कूपो नदी च विमलाशया
भुवो वृक्षा अरण्यानि सर्वभोग्यानि संविदुः।

मन्ये यावदत्र सर्वोपयोगितासीत्तावदयं शुद्धोऽभूत्। यतः प्रभृति कुतोऽपि कारणात्सा निरुद्धा तत एवायमीदृक् स्यादिति हेतुरन्वेष्योऽस्य। ततश्च हेतुगवेषणया ज्ञातमभूज्जल[१]-जन्तु-वधाशङ्कयाऽरण्यवा-

१—कदाचित्कोऽपि शबरस्तत्र मत्स्यान् कण्टकेनाकृष्याकृष्य नयति स्म तद् वीक्ष्य क्रुद्धेन केनापि मुनिना तेषां सर्वथा स्नानाद्युपयोगोऽपि निरोधितोऽभू-

सिनां तत्र स्नानाद्युपयोगोऽपि निरुद्ध आसीदिति पुनः पूर्ववद्विहिते सर्वोपयोगे जलाशयोऽसौ शुद्धस्वच्छजलोऽजनीति विचित्रा घटना प्राक्तनी।

सुकन्या-चरितम्

शर्यातिराजकन्या सा सुकन्या च्यवनप्रिया,
पाति-व्रत्य-प्रभावेण स्ववैद्यौ तोषितौ यया।

शर्यातिनाम्नो नृपस्य कन्या अतिसुन्दरी अतिगुणशालिनी विदुषी सुकन्या बभूव। सा हि कदाचिन्मृगयाङ्गतस्य पितुः सैन्यैः सह स्वयमपि वनं विहरणबुद्धया जगाम। तत्र गता वने विचरन्ती बल्मीकसञ्छन्नं समाधिस्थं च्यवनमृषिं समुज्ज्वलज्योतिषोर्नयनयोः कौतुकाविष्टाऽज्ञानतस्तृणेन तुतोद।

ततश्च कियतैव क्षणेन सर्वेऽपि राजपरिवारस्थाः ससैन्या निरुद्धमलमूत्रा व्यथिता बभूवुः। ततश्च कारणान्वेषणे सुकन्या निजदोषं पित्रेऽवोचत्। फलतः सुकन्या च्यवनसेवायां तद्धर्मपत्नी भूत्वा तत्रैव स्थिता राजा च शर्यातिः ससैन्यो राजधानीं जगाम।

कदाचित् पतिमुपचरन्ती सुकन्या स्ववैद्यौ प्रसादयामास। तौ च तत्पतिभक्तितुष्टौ च्यवनाश्रममेत्य वरं ब्रूहि! इति महर्षिमूचतुः। च्यवनश्च स्वात्मनो नव-वयोनेत्रोपलब्धि-वरं वव्रे 'एवमस्तु' इत्युक्त्वा तौ च्यवनेन सहैव तत्रत्ये कस्मिंश्चिन्महाह्रदे निमज्य त्रयोऽपि समानरूपवयोऽवस्था विनिर्गताः। तदा सुकन्या स्ववैद्यौ प्रार्थयमानोवाच—

मनसा कर्मणा वाचा यदि व्यभिचरामि नो।
तदा स्यान्मे पतिः पार्श्वे स्ववैद्यौ प्रार्थितौ मया॥ इति।
इत्युक्तवत्यां तस्यां वै मुनिस्ताभ्यां पृथग् भवन्।
तयोरेव प्रसादेन सुकन्या-पार्श्वगोऽभवत्।

दिति हेतुस्तस्य विकृताविति सूक्ष्मो धर्ममार्गो विवेच्यः सर्वदा सर्वैः।

इत्येवं प्राप्तकामश्च्यवनस्तावुवाच—

यद्यहं स्वेन तपसा विभुमाराधयं सदा।
परोपकारविधिना विश्वात्मा तोषितो यदि ॥
अस्मात्कालात्समारभ्य यज्ञभागभुजौ युवाम्।
स्ववैंद्यावपि शक्राद्यैः सह स्यातामिति ब्रुवे ॥

इत्यभिधाय राज्ञा शर्यातिना महायज्ञमनुष्ठाप्य तत्रैव तयोर्वैद्ययोरपि यज्ञभागं कल्पयित्वा शक्रमपि सन्तोष्य शाश्वतीं मर्यादां प्रत्यतिष्ठिपत्। यथोच्यते—

यदा शर्यातियागेऽसौ मुनिः शक्रादिभिः सुरैः।
सहैवाश्विनयोर्भागं प्रदातुमुपचक्रमे ॥
अतूतुलत्तदा वज्रं मुनौ क्रुद्धः शचीपतिः।
च्यवनोऽस्तम्भयत्तस्य वज्रबाहुं स्वतेजसा ॥
सोमभागस्ततो जातस्तयोः स्ववैंद्ययोरपि।
च्यवनस्य मुनेरेव प्रसादेनेति संश्रुतिः ॥
तत्र हेतुः सुकन्यायाः सतीत्वं सुदृढं महत्।
विहाय राज्य-भोगं या च्यवनर्षिमुपाश्रयत् ॥ इति।

जरत्कारु-चरितम्

जरत्कारुर्जरत्कारोः पत्नी प्रोक्ता पतिव्रता।
आस्तिको यत्सुतो जज्ञे सर्प-मन्त्रप्रदो भुवि ॥

जरत्कारुर्नाम मुनिर्बहुवर्षावधि वने तपश्चचार। कदाचिदरण्ये पर्यटन् क्वापि कूपेऽधो लम्बमानान् तृणाऽधारस्थितान् पुरुषान् ददर्श। उपरि तृणमूलं छिन्दन्तं श्वेतमूषकं च ददर्श। चमत्कृतेन तेन पृष्टास्तृणाऽधारलम्बिताः पुरुषा ऊचुः। जरत्कारोः पितृपितामहाः स्मः मृत्युना मूषकेण तदायुषि तृणे छिन्नेऽधो नरके पतिष्यामो यदि सोऽस्मांक पिण्डदं सन्तानं नोत्पादयति।

इति पूर्व-पुरुषैर्बोधितो जरत्कारुर्नियमं चकार। यदि मन्नामधारिणी सुलक्षणा कन्या प्राप्ता स्यात्तदा तां परिणेष्यामीति। ततो जरत्कारुतो भागिनेयकामो वासुकिनागो निजभगिनीं जरत्कारुनाम्नीं जरत्कारवे तस्मै सयौतकां विवाहविधिना ददौ।

सती जरत्कारुर्योग्यं पतिमुपलभ्य कर्मणा मनसा वाचा साधु समुपचचार। येन प्रसन्नतरः पतिस्तदासक्तः समजनि। कदाचित्तदङ्के शयानं पतिं सन्ध्याकालं सन्निकटं ज्ञात्वा सोद्बोधयामास। स च स्वापमानं मन्यमानोऽदृष्ट-प्रेरितः प्रव्रज्यां जग्राह। प्रव्रजन् गर्भे तेऽस्ति सन्तान इत्युवाच समयेन जाते पुत्रे 'अस्तीति' जरत्कारुवाक्यात् तस्य 'आस्तिक' नामाभूत्। स एवास्तिको जनमेजयस्य राज्ञः सर्पसत्रे समुपस्थाय सर्पसत्रं निरोधयन् तक्षकादीनवशिष्टानग्निपाताज्जुगोप। सर्पमन्त्रमपि लोकेभ्यो ददौ। तथाहि—

[1]विक्रीणीते हस्तिनं हस्तिपालोऽवक्रीणीते तं धनी धर्मपालः।
पर्य्यक्रीणीतास्तिकः सर्पसत्रे सर्पाभीतिं मन्त्रदानान्नृलोके॥

मन्त्रस्तु महाभारतोक्तः श्लोकद्वयात्मकः—

'सर्पापसर्प भद्रं ते दूरं गच्छ महाविष!
जनमेजयस्य यज्ञान्ते आस्तिकवचनं स्मर॥
आस्तिकवचनं स्मृत्वा यः सर्पो न निवर्तते
शतधा भिद्यते मूर्ध्नि शिशवृक्षफलं यथा। (महाभा०)

(मन्त्रोऽयं शयनकाले तथा मार्गेऽन्धकारे पठनीयः। नागपञ्चम्यामपि अनेनैवाभिमन्त्रितं गोमयं गृहेऽभिवेष्टनीयं भवति)

१—हस्तिपालः हस्तिनं विक्रीणीते। धनी धर्मपालः तं हस्तिनम् अवक्रीणीते। आस्तिको मुनिः नृलोके मन्त्रदानात् सर्पसत्रे सर्पाभीतिं पर्य्यक्रीणीत क्रीतवान्। सर्पाणां हवनकुण्डे पातं निरोध्य जनमेजयाय इममेव मन्त्रं दत्तवान् आस्तिकमुनिः। येन सर्पेभ्योऽभयक्रयणं मन्त्रमूलकमभूत्। इति परस्पर-द्रव्य-विनिमयात् 'परिव्यवेभ्यः क्रियः १।३ १८ इति' सूत्रस्योदाहरणम् पद्यमिदं भवति। इत्यलम्।

धरा-चरितम्

द्रोणपत्नी धरानामा विप्रातिथ्यचिकीर्षया,
स्तनौ छित्वा व्रजे जाता यशोदा साऽन्यजन्मनि ।

पूर्वजन्मनि द्रोणविप्रस्य पत्नी धरानामा महाप्रसिद्धा सती समजनि । उभौ दम्पती क्वापि वनैकदेशे कृतकुटीरौ जीवनयात्रां भिक्षया चालयन्तौ निवसतः स्म । प्रत्यहं नित्यकृत्यं विधाय नियमत आश्रमोपस्थितान् सबालिकान् बालकान् शिक्षयन्तौ स्वाध्यायपरायणौ पवित्रं जीवनं यापयतः स्म ।

कदाचित्तस्याः पतिर्द्रोणो यदा भिक्षार्थं बहिरगमत्तदैव विष्णुदेवस्तदाश्रमे विप्रबटुर्भूत्वा वृद्ध-मातृपितृभ्यामुमामहेश्वराभ्यां सह भोजनवेलायामुपातिष्ठत् । गृहस्वामिनि ! पितरौ मे भृशं बुभुक्षितौ गन्तुमसमर्थौ भोजय किञ्चिद् द्रुतं तौ इत्युवाच ।

धरा अलिन्ददेशे समागता तान् वीक्ष्य ससम्भ्रमं जलासने दत्त्वोवाच—हस्तपादादिकं प्रक्षाल्य आसने समुपविशन्तु प्रपानकमिदं पिबन्तु च सुस्वादु । तावत् पतिदेवो म आयाति इति । विप्रबटुरुवाच–तर्हि अन्यत्र गच्छामि क्षुत्क्षामकण्ठौ मे पितरौ वक्तुमसमर्थौ न विलम्बं सहेते इति । 'तर्हि तिष्ठन्तु द्रुतमहं विपणितो भोज्यमानयामीत्युक्त्वा तदाश्रम-पार्श्वे स्थितस्यैकस्यापणिकस्य सकाशमुपेत्य कारुक ! पुरुषत्रयभोजनक्षमं द्रुतं सव्यञ्जनं साम्लं शष्कुलीभोज्यं दीयताम्—इत्युवाच । कारुकस्तु कामुकः सुन्दरीं दृष्ट्वैव कामातुरः सर्वं भोज्यं शीघ्रं संगृह्य पत्रपिनद्धं विधाय युवति-हस्ते ददत् तन्मूल्य-प्राप्तये हस्तान्तरं प्रसारयामास । युवतिः मूल्यं नास्ति पुण्यं ते स्यादित्युवाच । कारुको नाहमेवं पुण्यकर्ता मूल्यं दत्त्वैव भोज्यं नयेति ससङ्केतं नेत्रेङ्गितेन तत्स्तनौ समसूचयत् । युवतिस्तु तदापणे स्थितां तीक्ष्णामसिपुत्रीं गृहीत्वा स्वस्तनौ छित्वा तद्धस्ते पातयित्वा द्रुतगत्याश्रमं चचाल । कारुकस्तु तत्रैव मूर्च्छितो निपपात ।

इहाश्रमे समुपस्थितां युवतिं रुधिरार्द्रां वीक्ष्य किमिति किमिति त्वं रुधिरार्द्रा कथमिति विप्रवटौ ब्रुवत्येवाश्रमे दिव्यः प्रकाशोऽभूत्। ते त्रयोऽपि पुरुषा विष्णुशिवोमारूपाः सञ्जाता युवतिश्च सुस्तनी दिव्यभावाभिपन्ना बभूव तत्पतिरपि तदानीमुपस्थितोऽधस्तना गिरः शृणोति। तत्र विष्णुदेवः—

मदर्थे स्तनावर्पयन्त्या भवत्या
यशोदाख्यया नन्दपत्नीत्वमग्रे।
सुलभ्यं तव स्तन्यपाता तथाहं
भविष्यत्ययं द्रोण-देवोऽपि नन्दः॥

इत्युक्त्वा विरराम। ततो महेशोप्येवमुवाच—

धरे ते करानीतमम्बु प्रपीय व्रजेशो भवन् कृष्णलीलां विचष्टा[१]।
उमेयं प्रसन्ना त्वदीयाच्चरित्रादुपेता व्रजे योगमायास्वरूपा॥

इत्यभिधाय त्रयोऽपि देवास्तत्रैवान्तर्हिताः। ततः प्रभृति द्रोणोऽरण्याधीशो धरा च प्रचुरधनाधीश्वरी तत्रोपतस्थुषामतिथीनां सेवापरौ सन्तानसमृद्धिसम्पन्नौ समये कृतदेहविसर्गौ जन्मान्तरे वरप्रदान-सुखमन्वभूताम्। पश्यन्तु सतीमहिमानं पद्येषु सर्वे—

जागरूकं सतीत्वस्य महत्त्वं दृश्यतां जनैः।
धरासतीत्वमाहात्म्यात् त्रिदेवास्तद्वशानुगाः॥
विष्णुः शिशुः पपौ स्तन्यं यशोदा साऽभवद् व्रजे।
महेशोऽपि व्रजेशोऽभद्योगमायाप्युमाऽभवत्।
व्रजे विजह्रतुर्बाल्यलीलालुब्धौ हरेरुभौ।
पश्यन्तौ दम्पती तत्र बाल्यलीलां व्रजेशितुः।

१—चष्टा = द्रष्टा। चक्षिङः ख्याञादेशस्य बाहुलकात् तृचि तासि वा रूपम्। सा=धरा। व्रजेशः शूरसेनः। व्रजेशितुः श्रीकृष्णस्य। उभौ दम्पती उमामहेश्वरौ। इति संक्षेपः।

यशोदा-चरितम्

यशोदा कृष्ण-माताऽभूद् केवलं स्तनपायिका ।
द्रोण-पत्नी धरानामा देवकी जन्मदायिनी ।

पूर्व-जन्मनि द्रोणनाम्नो विप्रस्य पत्नी धरानामा विष्णोर्वरेणास्मिन् जन्मनि व्रजे सुमुखनाम्नो गोपस्य धर्मपत्न्यां पाटलायां दुहिताऽजनि । (केषाञ्चिन्मते नित्यैव यशोदा विद्यते कृष्णो यदापि बाल्यलीलयावतरति तदा तस्या एव स्तन्यपानं करोति । इति पक्षेऽपि नित्या यशोदाऽस्यामेव धरायां विलीना भूत्वा तिष्ठतीति सर्वथा सामञ्जस्यं ज्ञेयम्) ।

द्रोणविप्रस्तु इह जन्मनि नन्दनामा गोपोऽभूत् । यस्य यशोदा सुमुखगोपकन्या धर्मपत्नी जातेति गाथा प्रसिद्धैवास्ति । यदा कारागृहाविर्भूतं श्रीकृष्णं वसुदेवो यशोदापार्श्वे तत्याज तदैव तत्र योगमायाऽपि यशोदापार्श्वे प्रादुर्भूतासीद् यामादाय परावृत्तः स देवकी-पार्श्वे तां संस्थाप्य निगडबन्धबद्धोऽभवदिति । कृष्णस्य जन्मदा देवकी स्तन्यदा यशोदेति पौराणिकी प्रसिद्धिः । यशोदावात्सल्यं बहुधा कविभिर्वर्णितम्—

कृष्णं नीलमणिं ब्रूते यशोदा प्रेमविह्वला ।
औरसं तं विजानाति तद्वियोगासहा तथा ।।
यशोदा मूर्छिता जाता पूतनापहृते हरौ ।
शकटासुरसम्पाते सैव तस्या दशाऽभवत् ।।
वर्षग्रन्थिदिने तद्वत्तृणावर्त-निपातने ।
यशोदां मूर्छितां दृष्ट्वा द्रुतं कृष्णः समागतः ।।

मृत्तिकाभक्षणे दृष्ट्वा त्रिलोकी-सम्भृतं मुखम् ।
यशोदा चकिता भूत्वा क्रोडे कृष्णं द्रुतं व्यधात् ।।
बन्धनार्थं यदा श्रान्तां मातरं दृष्टवान् विभुः ।
बभूव सहसा बद्धोऽर्जुन-वृक्षविमुक्तये ।।

दुष्टोत्पात-समाक्रान्तं सा हि नीलमणिं व्रजे।
तद्रक्षार्थं भयार्ता सा द्रुतं वृन्दावनं ययौ॥
जघान वकवत्सादीन् दैत्यान्नीलमणिस्तदा।
पञ्चमे सर्पदमनं सप्तमे धेनुकावधः॥
गिर्युद्धारोऽष्टमे वर्षे नवमे दशमेऽन्ततः।
बाललीलासमाप्तिर्वै प्रायो नीलमणेरभूत्॥
अरिष्टस्य वधः पश्चाद् द्वादशे केशिमर्दनम्।
ततो द्विजाति-संस्कारो गुरुगेहगतिस्ततः॥
कृष्णस्तस्याः समालोक्य सहजां प्रीतिमद्भुताम्।
अनयत्तां निजं धाम यत्र गच्छन्ति योगिनः॥ इति।

रोहिणी-देवकी-चरितम्

कद्रूः कश्यप-पत्नी या सैवेहागत्य रोहिणी।
कश्यपो वसुदेवोऽभूद्विनता देवकी मता॥

आनकदुन्दुभेर्वसुदेवस्य द्वे भार्ये बभूवतुः। देवकी रोहिणी चेति। तत्र कंसभगिन्याः कृष्णमातुर्देवक्याः चरितं सर्वविदितमिति न विव्रियते। यदा देवकी तेन सह कारागारेऽभवत्तदापि रोहिण्यास्तत्र गमागमनिषेधो नासीत्। तत्रैव देवक्यास्त्रैमासिको गर्भो योगमायया दक्षिण-कुक्षौ रोहिण्या अपवाहितः। ततो गर्भिणी रोहिणी वसुदेवप्रेरिताऽनाहूतैव नन्द-पुरमागता।

'गर्भे' प्रणीते देवक्या रोहिणी योगनिद्रया।
अहो विस्रंसितो गर्भ इति पौरा विचुक्रुशुः॥ (भा० १०।१।१५)

तत्र नन्दपुरे रोहिणीतः सप्तमे मासि सङ्कर्षणाविर्भावः। 'अनाहूता' रोहिणी यदा नन्दगृहे प्रविशेत्तदा नन्दस्य महामङ्गलोदयः, इति ज्यौतिषमुखाच्छ्रुतवती यशोदा परमप्रसन्ना रोहिणीं साधु समुपच-

चार। रोहिण्यागमनफलमेव तस्या नीलमणि[1]लाभः, सङ्कर्षणजन्मानन्तरं नीलमणिलाभ इत्येवं नन्दगृहे मङ्गलपरम्पराविर्भावोऽभूत्।

सार्द्धैकादशवर्षावधि रामश्यामयोः (गौरमणि-नीलमण्योः) बाल्यलीला मधुरमधुरा व्रजेऽजनि। इति महामङ्गलं नन्दगृहे तावदभूदिति सर्व-विदितम्। कंसवधानन्तरं कारागारवियुक्तो वसुदेवो यदा रोहिणीं मथुरामानाययामास तदा यशोदा-वियोगकातरा रोहिणी महता दुःखेन व्रजान्मथुरां गता। ततः कुरुक्षेत्रेऽनयोः सङ्गमः। दन्तवक्रं विनाश्य व्रजं प्रविशतः कृष्णस्य यशोदया समागमः। अवसाने च द्वारकोपकण्ठे प्रभासक्षेत्रे—

देवकी रोहिणी चैव वसुदेवस्तथैव च।
कृष्णरामावपश्यन्तः शोकार्ता विजहुः स्मृतिम्॥
प्राणान् हित्वा गताः सर्वे भगवद्विरहातुराः।
तद्धाम शाश्वतं दिव्यं प्रभासे तदनन्तरम्[2]॥ इति।

रेवती-चरितम्

रेवती रैवताद्राज्ञो जाता सत्ययुगे तदा।
द्वापरान्ते बलेनोढा ब्रह्मणा प्रेरिता सती॥

आनर्त[3]-देशाधिपतिः सत्ययुगस्थो रैवतो राजा ब्रह्मलोकं गतो ब्रह्मदेवं पप्रच्छ ममेयं रेवती कन्या योग्यवराभावान्न मयाऽद्यावधि कस्मैचन दत्ता। भवन्तं पृच्छामि कञ्चन वरमादिशतु तस्मै ददामीति।

ततो ब्रह्मदेवः स्मित-पूर्वमभाषत। राजन् भवानिह तु ब्रह्म-लोक-कालमानेन कियन्तमेव समयं न्युषितवान्। परन्तु मृत्युलोक-काल-

१—यशोदा श्रीकृष्णं नीलमणिनाम्नैवाह्वयति स्म। सङ्कर्षणं च गौरमणीति प्रेमनामद्वयमिदं तत्कृतम्। २—तदनन्तरम् तयो रामकृष्णयोरनन्तरम् तदनन्तरम् १२५ शतोत्तर पञ्चविंशतिवर्षावधि श्रीकृष्णो भूमौ स्थित्वा स्वलीलावरणं चकार। ततः पश्चादेवेमे ब्रह्मविलीना इति कीदृग्दीर्घायुष्ट्वं प्राचीनानामिति स्मरणीयमिदम्। ३—आनर्त-देशः = आधुनिको भूसी प्रान्तः।

मानेन तु तत्र पृथिव्यां युगत्रयं व्यतीतम्। सम्प्रति तत्र द्वापरान्तो वर्तते। येषां राजकुमाराणां विषये भवान् निजसंकल्पं क्रमशः परिवर्तितवान् तेषान्तु पुत्र-पौत्र-प्रपौत्रादि-परम्पराऽपि विनष्टा। भवतोऽपि राज्यं सराजधानि धूलिसात्सम्प्रवृत्तम्।

अस्तु भवानितो निजर्जुगत्या[1] द्वारिकां गत्वा तत्र बलरूपतोऽवतीर्णाय भगवतेऽनन्तायेमां रेवतीं ददातु। तच्छ्रुत्वा चकितचकितो राजा द्रुतमुपेतो द्वारिकां सपदि समेत्य बलरामं तदानीन्तनयुगपरिणामानुकूलविवाहविधिना श्रीमते बलरामाय रेवतीं समर्प्य श्रीबदरिकाश्रमं तपस्तप्तुं जगाम। तदानीन्तनमानवानां खर्वाकृतिं पशु-वृक्ष-क्षुप-सरीसृपादि च खर्वं वीक्ष्य राजा भृशं तापमाप।

तदानीं रेवतीं तालाकारां सत्ययुगीयां द्वापरीयं ह्रस्वाकारं च रामं समीक्ष्य हसन्तं वनमालिनं समालोक्य रामो हसन्नेव हलेन रेवतीमस्तकं प्रच्याव्य द्वापरीय-स्त्रीकायकल्पं तत्कायं चकार। परम-सती रेवती सर्वथा प्राणप्रियं हलधरं प्रीणयन्ती भृशं समुपचचार। यत्परवशो रामः सर्वमपि सांसारिकं सुखजातमनुभवन् गतमनेकहायनमपि नाजीगणत्। यथोक्तम्—

प्रणयोपचयो न शक्यते विवरीतुं बलरेवतीभवः[2]।
अतुल-प्रणयप्रणीप्रियौ वितुलौ तौ जगतीह दम्पती[3]॥

रुक्मिणी-चरितम्

रुक्मिणी केशवं प्राप निजबुद्धिप्रभावतः।
अभवन्महिषी मुख्या पतिसेवा-परायणा॥

१—निजा चासौ ऋजुर्गतिः=निजर्जुगतिः तया=साक्षाद् द्वारिकामेव गच्छ नान्यत्रेति। २—बलश्च रेवती च=बलरेवत्यौ तयोर्भवः=तत्रयोत्पन्नः। प्रणयस्य उपचयः वृद्धिः। विवरीतुं वर्णयितुं न शक्यते। 'वृतो वा' इतीटो दीर्घत्वम्। ३—अतुलं प्रणयं प्रणयतः इति अतुलप्रणयप्रण्यौ तौ च तौ प्रियौ इति अतुलप्रणयप्रणीप्रियौ तौ दम्पती इह जगति वितुलौ=विगता तुला ययोः तौ वितुलाविति बहुव्रीहिः।

भीष्मको नाम महीपतिर्विदर्भदेशे गणराज्याध्यक्षोऽतिप्रतापो बभूव। तस्य रुक्मि-रुक्मरथ-रुक्मबाहु-रुक्मकेश-रुक्ममालिनामानः पञ्च पुत्रा रुक्मिणी नामिकैका च कन्या बभूवुः। प्राप्तविवाहवयसं रुक्मिणीं कृष्णाय दीयमानामाच्छिद्य कृष्णद्विट् रुक्मी चैद्याय दातुं सम्भारमाततान। पट्वी बुद्धिमती रुक्मिणी गुप्ताभिसन्धिना विप्रं दूतं सम्प्रेष्य भगवन्तं कृष्णं स्वपाणिग्रहणायोत्सुकं चकार। स्वयं च देवीपूजनावसरेऽपहरतु मां भवानिति विप्रवाक्याद्दत्तसङ्केताऽऽत्मानमपाहारयत्।

श्रीकृष्णोऽपि नारीमनोरथपूरणेहया[१] तद्बोधनप्रकारेणैव तामाहृत्य शास्त्रविधिना च पाणिग्रहणसंस्कारं विधाय तां स्वीचकार। श्रीकृष्णश्च स्वमनोरथपूरकं समुपलभ्य रुक्मिणी तथाविधमुपचचार यथा तद्वशगः स द्रुतमेव तां पट्टमहिषीपदे प्रत्यतिष्ठिपत्। रुक्मिणीकृतं स्तवं व्यासदेवो निबध्नाति—

[२]तं त्वानुरूपमभजं जगतामधीश-
मात्मानमत्र च परत्र च कामपूरम्।
स्यान्मे तवांघ्रिशरणं सृतिभिर्भ्रमन्त्या,
यो वै भजन्तमुपयात्यनृतापवर्गः॥ (भा० १०।६०।४३)

इत्थं हि हार्दं भावमुद्गिरन्त्यो गृहिणीगुणैरात्मवशं नयन्ति नायकं विदुष्यो रमण्य इति रुक्मिणी-चरितादवगच्छन्तु पाठिकाः पाठकाश्चेति संक्षेपः।

या रुक्मिणी स्वं[३]वरयांचकार,
मुरारिणा बुद्धिबलाद्विचित्रात्।

---

१. नार्या मनोरथः नारीमनोरथः तस्य पूरणं नारीमनोरथपूरणम् तस्य ईहा तया। २. त्वा = त्वाम्। कामं पूरयतीति कामपूरम् अंघ्रिरेव शरणम् = अंघ्रिशरणम् मयूरव्यंसकादित्वात्समासः। अनृतः अपवर्गो यत्र। ३—स्वम्

गृहागता चापि वशे निनाय,
श्रीमालिनं भक्तिबलात्स्वकीयात् ॥

गान्धारी-चरितम्

नेत्रे वस्त्रावृते कृत्वा पत्युरन्धत्वकारणात्,
तत्तेजोऽभाजि गान्धार्य्या वज्राङ्गो यत्सुयोधनः ।

'त्वं-स्वकन्यां गान्धारीं धृतराष्ट्राय देहि' इति—व्यासादेशात् सुबलो गान्धारदेशाधिपः शकुनिना स्वपुत्रेण सैन्यरक्षितां तां हस्तिनापुरं प्रजिघाय। तत्रैव शास्त्रविधिना परिणीता सा धृतराष्ट्र-धर्मपत्नी भूत्वा वस्त्र-प्रगुणितां पट्टिकां नेत्रोपरि यावज्जीवं बबन्ध । तत्र हेतुरहं सुलोचना पतिर्मेऽन्ध इति माभूदभिमानो ममेति ।

एवं पतिव्रता गान्धारी "शतपुत्रा भवित्री त्वमिति" महेशाल्लब्धवरा द्वादशमासान्तं गर्भं दधाना धैर्य्यच्युता स्वोदरं ताडयन्ती लोध्रं मांसपिण्डं प्रासोष्ट ।

व्यासदेवो हि शीतजलप्रयोगेण तस्मादेव मांसपिण्डाच्छतं पुत्रानेकां च कन्यामाविश्चकार। तद्यथा—घृतसम्भृतेषु शतेषु कलशेषु एकस्यां च कलशिकायां घृतसम्भृतायां तस्मान्मांसपिण्डादेकमेकं लघु लोध्रं निःसार्य्य निःसार्य्य प्रत्येकघटे प्रचिक्षेप । तत एव क्रमशः शतं पुत्रा दुर्योधनादय एका च दुःशलानामा कन्या जाता ।

यस्मिन् दिने तत्राधित्यकायां पाण्डुपुत्रो भीमोऽजनि तस्मिन्नेवाहनि दुर्योधन इह हस्तिनापुरे जज्ञे घटात् । इतीमौ सवयस्कौ युधिष्ठिरो वर्षमनेकं ज्येष्ठः । दुर्योधनभगिनी सर्वापेक्षया कनिष्ठा सिन्धुराजेन जयद्रथेन परिणीता ।

धर्मशीला गान्धारी सर्वदैव दुर्योधनं बोधयतिस्म ज्येष्ठभ्रातुर्युधिष्ठिरस्येदं राज्यं "यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः" इति

आत्मानम् मुरारिणा श्रीकृष्णेन वरयाञ्चकार श्रीमालिनं श्रीकृष्णं वशे स्वधीनं निनाय नीतवतीत्यर्थः ।

कृष्णदौत्ये सा सर्वथा तत्पक्षं समर्थयन्ती बभूव। किन्तु दुर्योधन औद्धत्यात्तत उत्थाय बहिर्गच्छन्नकरोद्विघातं तन्मन्त्रस्य। धृतराष्ट्र एव तत्पक्षमपि कदाचित् समर्थयति कदाचिद्विदुरमपि सन्तोषयति स्म। तस्यैव दौर्बल्याद्भारतयुद्धम्।

एकदा भीमभीतो दुर्योधनो मातरमुवाच। मातः! भीमो मां न हन्यादित्यस्योपायं वद! सोवाच। युधिष्ठिरं पृच्छ तद्बोधितं कुरु। दुर्योधनपृष्टो युधिष्ठिरः उवाच'यदि माता नेत्र-पट्टिकामुद्घाट्य सर्वाङ्गं ते पश्येत्तदा त्वं वज्राङ्गः' इत्युक्तवति युधिष्ठिरे मातुः समक्षे सर्वथा नग्नो भूत्वा गन्तुमुद्यतं तं कृष्णोऽबोधयत्। वयस्कस्य ते कौपीनाच्छन्नोपस्थस्योपस्थितिः साधीयसीति।

दुर्योधनोऽदृष्टप्रेरितस्तथैव कौपीनाच्छन्नगुप्ताङ्गो मातुरग्रे दण्डायमानो नेत्र-पट्टिकामुद्घाटयितुं प्रार्थयामास। अपसारितनेत्रावरणा गान्धारी यावत् पश्यति तावत्तं कौपीनाच्छन्नं वीक्ष्योवाच किमिदं कृतं त्वयेति। स होवाच केशवपरामर्शोऽयमिति। गान्धारी हा ईश्वरेच्छेदृशीति [1]तूष्णीमास। (तत्रैव गदायुद्धे भीमगदानिपात इति विमर्शनीयं विबुधैर्दैवप्राबल्यम्)

अस्तु गदायुद्धे गदापातेन विचूर्णितोरुं दुर्योधनमुपचरितुमादिश्यार्जुनं युधिष्ठिरं संबोध्यारूढरथश्चक्रपाणिर्द्रुतं हस्तिनापुरे गान्धारीमाजगाम। शापं न सा विसृजेदिति। तत्र पूर्वत एव व्यासदेव उपस्थितो बभूव। केशवो दूरत एव रुदन् गान्धारीमुपससाद। कथं केशवाश्रुपात इति गान्धारीपृष्टोऽवोचत्। महाभागे! 'यतो धर्मस्ततो जयः' इति हि त्वदुक्तिस्त्वया कोपो न कार्य्यः। गदायुद्धे दुर्योधन-पराजय इति।

१.—गान्धारी श्रीकृष्णमीश्वरं सदैव जानाति स्म। अत एव यदा कृष्णपरामर्शेनाहं कौपीनाच्छन्न आगतोऽस्मीति दुर्योधनवाक्यं श्रुतवती तदा हा ईश्वरेच्छा एव ईदृशी अस्ति। तर्हि मानवयुक्तिरकिञ्चित्करीति विचार्य तूष्णीम् बभूव। न किञ्चिद् दुर्योधनमुक्तवतीति तात्पर्यम्।

गान्धारी केशवसमक्षे न मे क्रोधोद्रेकः सम्प्रति हतबान्धवयोरावयोः शान्तिस्तवाधीना। युधिष्ठिरेण सहोषितस्यान्धस्य राज्ञस्त्वमेव शरणम्। इति सर्वेऽरुदन्।

तत्र कियत्क्षणानन्तरम् हन्त! अश्वत्थाम्नो दुर्बुद्धि[1]रुदितास्ति। रात्रावेव सुप्तान् युधिष्ठिरादीन् हन्तुमिति मे तत्र गनममनुमोदयेति गान्धारीमुवाच कृष्णः। सर्वेऽपि रक्षतु पाण्डवानिति ब्रुवन्तो द्रुतं व्यसर्जयन् कुरुक्षेत्रं तं गन्तुम्। कदापीतो गान्धारी बान्धवानामग्निसंस्कारकाले स्त्रीणामार्तनादं श्रुत्वा व्यपगतधैर्य्या केशवमशपत्—

शक्तोऽपि नाऽरुणद् युद्धं यद्वास्यात्कारणं तव।
शोक-वेगो न मे कृष्ण! रुध्यतेऽतो ब्रवीमि ते॥
यथेमे मे हताः सर्वे बान्धवास्तव पश्यतः।
क्षयं तथैव गन्तारो दायादास्तेऽपि यादवाः॥

गान्धारी-शापं श्रुत्वा कृष्ण उवाच—

राजपुत्रि! वृथैव त्वं तपःक्षयमपाकरोः।
विप्र[2]शापप्रदग्धास्ते यादवाः पूर्वतः समे॥

१.—श्रीकृष्णस्येश्वरत्वादेव तत्र हस्तिनापुरे स्थितस्यापि अत्र कुरुक्षेत्रे स्थितस्य अश्वत्थाम्नो दुर्बुद्धेर्ज्ञानमभूत्। यदा दुर्योधनं कुरुक्षेत्रे पतितं दृष्ट्वा कृपाचार्य्य-कृतवर्माश्वत्थामानः परावृत्य कस्मिंश्चिद्वट-वृक्षतले शयाना आसन्। तदैव जाग्रत अश्वत्थाम्नो रात्रौ वटवृक्षे कृतनीडान् काकान् उलूकेनैकेनैव कृतविनाशान् वीक्ष्य अहो एवमेव अहमपि युधिष्ठिर-शिविरे गत्वा सर्वान् विनाशयामीति दुर्बुद्धिरुदिताऽभूत्। इयमेवाश्वत्थाम्नो दुर्बुद्धिः।

२.—यदा दुर्वासःप्रमुखा ऋषयः कृष्णं द्रष्टुमागता आसन्। तदा शाम्बादयो बालाः कौतुकात् गर्भलक्षणं वस्त्रादिनोदरमुन्नतं कृत्वा स्वेष्वेव कञ्चिद्बालं स्त्रीवेषं कृत्वा ऋषीणां पार्श्वमुपेत्य पप्रच्छुः कं सन्तानमियं जनयिष्यतीति। क्रुद्धो दुर्वासा उवाच। लौहं जनयिष्यति येन यादवकुलविनाशो भवितेति। भीतास्ते पलायिताः। अयमेव विप्रशापो यादवकुलविनाशे।

सर्वावसाने गान्धारी विदुरपरामर्शान्मृतबान्धवानां यथाविधि विहितश्राद्धकृत्येन धृतराष्ट्रेन सह वनमाजगाम। युधिष्ठिरानुरोधात्ते सकुन्तीकाः पूर्वं कियत्कालावधि समीपारण्ये स्थित्वा पश्चाद्धरद्वारारण्ये वसन्तः समाधिना विहितमहाप्रयाणे धृतराष्ट्रे दावानले दग्धदेहाः सर्वेऽपि स्वर्गे गताः। कुन्ती यावज्जीवं गान्धार्य्या सहैवासीदिति कुन्ती-धैर्यस्य गान्धारीधर्मशीलतायाश्च प्रशंसायामुक्तं मुनिना व्यासेन महा-भारते—तथाहि—

> विस्तरं कुरुवंशस्य गान्धार्य्या धर्मशीलताम्।
> क्षत्तुः प्रज्ञां धृतिं कुन्त्या उक्तवान् भगवान्मुनिः॥
> माहात्म्यं वासुदेवस्य पाण्डवानां च सत्यताम्।
> दुर्वृत्तं धार्तराष्ट्राणां सर्वं द्वैपायनोऽब्रवीत्॥

कुन्ती-चरितम्

> पितृष्वसा पृथा शौरेः शूरसेन-समुद्भवा।
> कुन्तिभोजसुता जाता दत्तकत्व-विधानतः॥

भगवतः श्रीकृष्णस्य पितामहः शूरसेनः स्वसुतां पृथां पैतृष्वस्रीयस्य अनपत्यस्य कुन्तिभोजस्य राज्ञो दत्तकविधिना पुत्रीं कारयामास। पृथाऽतिसुन्दरी प्रखरमतिः सात्त्विकवृत्तिश्च विद्यालयेऽधीयाना द्रुतमेव शास्त्रमर्मज्ञा गृहकार्य्यकुशला च जाता। कुन्तीति तस्याः संज्ञा तत्र जाता।

एकदा महर्षिर्दुर्वासाः चातुर्मास्यव्रतप्रसङ्गेन कुन्तिभोजभवनेऽतिथिर्भूत्वोवास। तदुपचारे नियुक्ता पृथा बुद्धिवैभवेनैवं तमुपचचार यत्सहजकोपोऽपि स परमप्रसन्नस्तस्यै अथर्वशीर्षमन्त्रं प्रदायोवाच। पुत्रि! मन्त्रेणानेन ते वशा देवा आह्वानप्रतीक्षाः स्युरिति।

गते मुनौ कुमारी पृथा कदाचित् कौतुकात् सूर्य्यदेवं मन्त्रेण तेनाह्वाययामास। स चोपस्थितस्तस्यै कर्णनामानं सकवचकुण्डलं सुतं दत्त्वा यथागतं गतः। समये प्रसूतं कुन्तीसुतं कर्णं सूतोऽधिरथोऽनपत्यः

पुपोष। तत्र तस्य वसुषेण इति नामधेयं बभूव। स च तत्रैव हस्तिनापुरे पाण्डवैः कौरवैः सहाधीयानो धनुर्वेदशास्त्रे च परमप्रावीण्यं गमिष्यति।

कुन्तिभोज-सुता कुन्ती पाण्डुना परिणीता हस्तिनापुरमाजगाम। आखेटप्रियः पाण्डुः कदाचित् किन्दमनामानमृषिं मृगयोनिमुपेतं मृगीसङ्गतमाखेटलक्ष्यं कृत्वा विव्याध। स चैवमेव भार्य्यासङ्गतस्त्वं पञ्चत्वमेष्यसीति तं शशाप।

मुनिशप्तः पाण्डुर्विरक्तो भवन् राज्यं धृतराष्ट्राधीनं त्यक्त्वाऽरण्यमियाय। तत्र बदरिकाश्रमपार्श्वे हिमवदधित्यकामधिवसन् कदाचित्स्वर्गाश्रमयात्रिणामृषीणां सम्पर्कतः

'अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च'

इति श्रुत्वा परमविषण्णोऽभूत्। पश्चाच्च दुर्वासोमन्त्रप्रभावतः कुन्त्यां युधिष्ठिरभीमार्जुनसंज्ञान् क्षेत्रजान् त्रीन् द्वौ च माद्रयां यमजौ नकुलसहदेवौ क्षेत्रजावेव सुतौ लेभे। कदाचनादृष्टवशगो जानन्नपि माद्रीसङ्गतो महाप्रयाणमाससाद। सा च तेनैव सह चितामारूढा सतीत्वमाजगाम। कुन्ती सपञ्चसुता मुनिभिर्हस्तिनापुरं प्रापिता।

'पाण्डुपुत्रा इमे सर्वे भर कौरव यत्नतः।' इत्याकाशभाषितं श्रुत्वा धृतराष्ट्रः परमप्रसन्नः स्वसुतनिर्विशेषं राजपोषं तान् पुपोषाध्यापिपच्चेति। इयं कुन्ती दौत्यकर्मणा हस्तिनापुरमुपेतं श्रीकृष्णं सम्बोधयन्ती उवाच—अयि भगवन्!

वाच्यो मद्वचनाद्धर्मो माता सर्वान् ब्रवीति वः।
यदर्थं क्षत्रिया सूते तस्य कालोऽयमागतः॥ इति।

विशेषतो युधिष्ठिरमुवाच—

श्रोत्रियस्येव ते पुत्र! मन्दकस्याविपश्चितः।
अनुवाकहता बुद्धिर्धर्ममेवाभिपश्यति॥

प्रवृत्ते युद्धे साहसं कृत्वा कुन्ती कर्णपार्श्वेऽपि गत्वोवाच—त्वं मे पुत्रोऽसीति जानीहि सर्वामपि तज्जन्मसम्बन्धिनीं कथां श्रावयन्ती

कनिष्ठभ्रातॄणां वधान्निवारयामास। कर्णोऽपि मातृसम्मानं कुर्वन् अर्जुनादृते चतुर्णामपि स्वावध्यं प्रतिजज्ञे। अन्तेऽपि कुन्ती ज्येष्ठभ्रात्रे कर्णाय तिलाञ्जलिर्देयः त्वयेति यदोवाच। तदा सत्त्वाच्च्युतो युधिष्ठिरो महता प्रयत्नेन कृष्णप्रबोधितो राज्यं चकार। तदानीमेव मातुर्धैर्य्यं प्रशंसन् स्त्रियो नाग्रे वाचं निगूहितुं शक्ष्यन्तीति युधिष्ठिरः स्त्रीवर्गं शशाप।

अस्तु कुन्ती महाराज्ञी विरक्तप्रकृतिर्धृतिमती वीरस्वभावा ज्ञानशालिनी चासीदिति द्वारिकां जिगमिषुं श्रीकृष्णं स्तुवत्यास्तस्या वाक्यात्प्रतीयते। तथाहि—

विपदः सन्तु नः शश्वद्यत्र तत्र जगद्गुरोः।
भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम्॥ इति।

सा हि यावज्जीवं गान्धार्य्या सहैव हस्तिनापुरे समुवास। अन्तेऽपि तया सहारण्यं जगाम। विदुर-धृतराष्ट्राभ्यां सहैव सगान्धारी कुन्ती हरद्वारतीर्थमुपेत्य दावाग्निनारण्ये कालजवेन कायं मुमोचेति गान्धारी चरितेऽङ्कितम्।

अनासक्ति-योगात्सूर्य-वराच्चास्याः कन्यात्वं न जगामेति पञ्चकन्यासु कीर्त्यते नरैश्च प्रातः स्तूयते। अहो—

सर्वमेवाद्भुतं कुन्त्या बाल्यादेव प्रतीयते।
दत्तकत्वविधानेन कुन्तिभोजगृहागमः॥
तत्र दुर्वाससो मन्त्रोपलब्धिः परमाद्भुता।
पुत्र-प्राप्त्या च तन्मन्त्रात्पत्युरिच्छाप्रपूरणम्॥
सपत्न्यै मन्त्रदानेन तस्या अपि सुतार्पणम्।
स्वपुत्रेभ्योऽधिकं तस्याः पुत्रयोः प्रतिपालनम्॥
सुतेभ्यः साहसं दत्त्वा तेषां शौर्यप्रवर्द्धनम्।
गान्धार्य्या सह संस्थानं न स्वपुत्रैः सह स्थितिः॥
विपदो याचनं कृष्णादसक्तेश्च प्रदर्शनम्।
सत्यं कन्यात्वमेतस्याः सूर्य्य-दत्तवरादहो!

द्रौपदी-चरितम्

द्रौपदी यज्ञतो जाता धृष्ट-द्युम्न-स्वसा सती,
कृष्ण-भक्ताऽप्यतस्तेन सर्वथा सा सुरक्षिता ।

द्रोणपराजितो द्रुपदो द्रोणघातिनं पुत्रं लब्धुकामो दशकोटि-मुद्रा-प्रदान-परेण याजनाम्ना विप्रेण पुत्रेष्टि-यागं कारितवान् । तत एव धृष्ट-द्युम्नं पुत्रं कृष्णां च पुत्रीं लब्धवान् । तत्र द्रौपद्यां कृष्णायां महा-माया गुणवती इति द्वे अपि नार्यौ निजांशतः प्रविष्टे सर्वदा स्त इति एकापि सा नारीत्रयात्मिका कथ्यते ।

इयं कृष्णवर्णेति कृष्णाभिधाना द्रुपदपुत्रीति द्रौपदी कथ्यते । स्वयंवरे विप्रवटुरूपिणमर्जुनमेकं वव्रे । किन्तु श्वश्र्वा आज्ञया युधिष्ठि-रेच्छया व्यासदेवादेशेन च पञ्चभिरेव पाण्डवैर्विवाहविधिनोढाऽभूत् । नारदमनीषया वर्षविभागेन ज्येष्ठानुक्रमं प्रत्येकं पत्नीत्वेन सङ्गता च ।

द्यूतयुद्धे पराजितेषु पाण्डवेषु अस्याः सभायां धर्षणं सर्वविदितमेव । मयापि नारीजागरणनाटके भाषामये संस्कृतमये चोभयत्रैव विस्तरा-द्विवेचितमिति तत्रैव द्रष्टव्यम् । अत्र तु संक्षेपेण पटवर्द्धन-विधिना भग-वता श्रीकृष्णेन सा रक्षितेति प्राचीन-पद्येन सन्तोष्टव्यम् ।

चिकीर्षिते कर्मणि चक्रपाणेर्नापेक्ष्यते तत्र सहायसम्पत् ।
पाञ्चालजायाः पटसर्जनेऽपि मध्ये सभायां न तुरी न वेमा ।।

इयं भगवतः श्रीकृष्णस्य वात्सल्यभाजनमासीत् । अरण्ये भुक्तवत्या-मस्यां यदा दुर्वासाः स्वशिष्यैः सह तत्रोपस्थितस्तदा तत्रोपस्थाय तदुखापात्राच्छाकमाकृष्य—'अनेन त्रिलोकी तृप्यताम्' इति संकल्प्य तं भुञ्जानस्तां दुर्वाससः शापाद्ररक्ष । भारत-युद्धे च 'अद्यापाण्डवा मेदिनी' इति भीष्मप्रतिज्ञायां च तस्या उपानहौ करे संवहन् तां भीष्मपार्श्वे प्रापय्य 'सौभाग्यवती भव' इत्याशीर्वादं प्रणमन्त्यै तस्यै दापयित्वा तदीयसौभाग्यश्चाक्षयं चकारेति पद्येऽधस्तने द्रष्टव्यम्—

पादत्राणं यदीयं नयति निजकरे विप्रशापाद्वने यां,
रक्षिष्यत्येत्य शाकं विदधदशनगम्पाकपात्रप्रसक्तम् ।
योऽसौ सर्वस्य साक्षी त्रिभुवनमविता रक्षिता भृत्यवर्गान्,
र रे कृष्णः स्मृतः सन्निह सदसि स तां किं प्रपश्येद्विवस्त्राम् ॥

युद्धावसाने 'कर्णस्ते भ्राता तस्मै तिलजलाञ्जलिर्देयः' इति मातृवचसा विषण्णे राज्यत्यागपरे धर्मराजे द्रौपद्यास्तदुद्बोधनञ्च परिशीलनीयम् । तथाहि—

शत्रून् हत्वा द्रौपदीं सान्त्वयिष्ये,
राज्यं कुर्वन् मोदयिष्ये स्वबन्धून् ।
मात्रे दत्वा राजमातृत्वमेवं,
श्रीकृष्णस्यापीहितं पूरयिष्ये ॥

इति काननवृत्तम्—तदुक्तं स्मारयन्ती पाञ्चाली युधिष्ठिरमुद्दीपयामास ।

इयं दृढ़संकल्पा मनोनियन्त्रणे निपुणा योगिनी वीरबालासीदिति पञ्चकन्यास्वस्या अपि प्रवेशोऽस्ति 'अहल्या द्रौपदी तारेत्यादि'—[1]

सेयं द्रौपदी पाण्डवैः सहैव हिमालये गत्वाऽध्यात्मज्ञानबलात् सर्वात्मना दग्धकर्मबीजा हिमान्यां निजनश्वरं कलेवरं जहौ। इति तच्चरितसंक्षेपः ।

सुभद्रा-चरितम्

सुभद्राप्यद्भुता देवी वीरसूः शौर्य्यशालिनी,
योधयित्वार्जुनं भ्रात्रा दण्डिराजमरक्षयत् ।

१—प्रातः शय्योत्थायं 'ब्रह्मामुरारिस्त्रिपुरान्तकारीत्यादिस्तोत्र-पाठं' भारतीयाः कुर्वन्ति । तत्रैव 'अहल्या द्रौपदीत्यादि' पद्यपाठमप्याचरन्ति । तत्र 'पञ्चकं ना' इति पाठे तु न काप्यापत्तिः । परन्तु 'पञ्चकन्या' इति पाठे कथं परिणीतानां जात-सन्तानानामासां कन्यात्वमिति शङ्कायाः समाधानं यथाऽत्राहल्यादिचरित-निरूपणे कृतं तथैव श्रीभारतधर्ममहामण्डल, जगतगञ्ज, वाराणसी, इतः प्रकाशिते 'पुराणरहस्य' पुस्तकेऽपि विस्तराद् द्रष्टव्यम् ।

ब्राह्मणगोरक्षानिमित्तेन युधिष्ठिरकालिकद्रौपदीगृहप्रविष्टोऽर्जुनो यदा तत्प्रायश्चित्तप्रसङ्गतो द्वारकामुपगतोऽभूत्तदा तां श्रीकृष्णपरामर्शतः परिणिनाय हरणविधिना। हस्तिनापुरमुपेता सा पतिं श्वश्रूं सपत्नीश्च तादृशमुपचचार येन प्रधानमहिषीवन्मान्या जाता।

गर्भिणी सुभद्रार्जुनाद् व्यूहभेदनकलां शिक्षमाणा गर्भस्थेऽभिमन्यौ व्यूहभेदनविज्ञानमासञ्जयामास। कदाचित् पर्वणि यमुना-स्नानार्थमवतीर्णा तत्र अवन्तीपतिं दण्डिराजं नद्यामात्मघातं कर्तुं प्रवृत्तं ददर्श। पृष्टः सोऽवदद् 'द्वारकाधीशः श्रीकृष्णो मेऽश्वां मनोरमां बलादपहरति। कोऽपि न साहाय्यमाचरतीति नदीनिपातेनात्मघातं करोमि।'

अहं श्रीकृष्णस्वसा सुभद्रा ते साहाय्यं करोमि। निवर्तस्व व्यापारादस्मादिति तं मृत्युमुखान्मोचयित्वार्जुनं तद्वडवां दापयितुं श्रीकृष्णात्प्रैरयत्। अर्जुनश्च सर्वथा निष्फलः स्वोद्यमे युद्धं चक्रपाणिना चकार। भक्तसेव्ययोरिदं युद्धं तदैवोपरराम यदा दण्डिराजवडवा [1]स्वयमेवोर्वशी भूत्वा दिवमुत्पपात।

एवं लक्ष्याभावादुपरते युद्धे भ्राता भगिन्या औदार्यं दार्ढ्यं च प्रशंसन्ननुनिनाय विनिनाय च ताम् स्वपार्श्वे। कृष्णो वार्द्धक्ये द्वारिकामेव स्वनिकटे तां वासितवान्। प्रभासे पञ्चत्वमितेषु स्वबन्धुषु द्वारिकामुपेतस्यार्जुनस्य समक्षे सुभद्रा देहोत्सर्गं चकार। इत्यलम्।

उत्तरा-चरितम्

विराटराजस्य सुतोत्तराऽभवत्—
वीराभिमन्योर्महिषी प्रिया सती।
परीक्षितं पुत्रमजीजनन्नृपं
ररक्ष यं द्रौणिहतं सुदर्शनी॥

१—दण्डिराजवडवा पूर्वजन्मनि उर्वशी नामाऽप्सरा अभूत्। कस्यापि महर्षेः शापेनाश्वयोनावागताऽभूत्। यदा ते निमित्तेनैव श्रीकृष्णार्जुनयुद्धं स्यात्तदातेऽस्माच्छापाद्विमुक्तिरित्येव शापोद्धारस्तस्याः।

विराटराजस्य भवने यदा पाण्डवा गुप्तवासं चक्रुस्तदार्जुनो बृहन्नलानाम्ना प्रसिद्धस्तत्र विराट-सुताया उत्तरायाः शिक्षको बभूव। प्राकट्यं गतेषु तेषु अर्जुनसुतेनोत्तरायाः परिणयोऽभूदभिमन्युना वीरेण।

भारतयुद्धे पराक्रम-शालिनोऽभिमन्योर्जयद्रथेन कृतेऽमर्षणीये वधे श्रीकृष्णादिभिर्विबोध्यमाना परोक्षितं गर्भगं रिरक्षिषुर्नानुजगाम तम्। समये यदा मूर्छितं सुतमुत्तराऽजीजनत्[1] तदा कुन्तीसुभद्रादिभिः प्रार्थितः श्रीकृष्णः प्रसूतिगृहमुपेतो विक्लवाम् उत्तरामुवाच—

शान्ता भव पतिव्रते शान्ता भव, नायं शिशुर्मृतोऽस्ति। इत्युक्त्वा द्रौणि-प्रहितं शस्त्रं शमयन्नुवाच—

यदि धर्मे च विप्रे च सत्ये श्रद्धा दृढ़ा मम।
जीव्यादयं शिशुः सद्य उत्तराङ्कागतो ध्रुवम्॥
यदि धर्मस्य सत्यस्य स्थितिर्मयि निरन्तरा।
अभिमन्युसुतः शीघ्रं जीवतादुत्तराजनिः॥
इत्युक्तवति श्रीकृष्णे शिशुः श्वासं समाददे।
नेत्रे उन्मीलयामास जहृषुः सकलाः स्त्रियः॥
पतिव्रतासुतः कस्मादकालमरणं व्रजेत्।
इत्युवाचोत्तरां कृष्णः सान्त्वयँस्तां मुहुर्मुहुः॥

भारती-चरितम्

सा भारती मण्डनमिश्र-भार्य्या,
श्री-शङ्कराचार्य्ययतिस्तुता या।
शास्त्रार्थ-निर्णायकतां जगाम,
पश्चात्स्वयं तं सुधियं जिगाय॥

१—उत्तराया मूर्छितसुतजनने कारणमिदम्—यदा रात्रौ शिविरयुद्धे प्रमादश्वत्थामा पाण्डवसुतानां पञ्चानां शिरांसि छित्त्वा दुर्योधनायाददात् तदा प्रातर्विबुद्धेन श्रीकृष्णेन प्रहितोऽर्जुनस्तं निग्रहीतुं प्रवृत्तोऽभूत्तदैव ब्रह्मास्त्रं पाण्डवेभ्यः स मुमोच तत एव परीक्षितो गर्भे मूर्च्छित आसीद् यं चक्रपाणिर्जीवयामासेति पौराणिकी कथा।

यदा हि कुमारिलभट्टनुन्नः स्वामी श्रीशङ्कराचार्यः प्रयागात् खसृत्या गच्छन् माहिष्मतीं मण्डनमण्डितां नगरीमुपतस्थे । तदा तस्य मण्डन-मिश्रेण शास्त्रार्थप्रवृत्तौ सैव भारती श्रीशङ्कराचार्य्यप्रस्तावेनैव तयोः शास्त्रार्थनिर्णायिका भूत्वा स्वभर्तुरेव पराजयनिर्णयं ददौ ।

पश्चाच्च 'अर्द्धाङ्गिनी भार्य्या' इति नियमान्मे पराजयेनैव भवतः पूर्णविजयोद्घोष इति स्वेन सहापि तस्य शास्त्रार्थवादं ययाचे । तया सह शास्त्रार्थे महता प्रयत्नेन विजयिनः श्रीशङ्कराचार्य्यस्य शिष्यतां गतो मण्डनमिश्रः सुरेश्वराचार्य्यनाम्ना शारदापीठस्य द्वारकाधामस्थस्य शङ्कराचार्य्यो बभूव ।

तदानीमियमेकाकिनी गृहसञ्चालिका पूर्वोत्तरमीमांसापीठस्थान् सर्वानेव विदुषश्छात्रान् सञ्चालयन्ती तदीय-विश्वविद्यालयस्य कुलपति-त्वमुवाह । एतादृशी प्रतिभावती योग्यतमा विदुषी भारती शास्त्रमर्मज्ञा निष्पक्षन्यायकर्त्री वावदूका ब्राह्मणी बभूव । ततश्च—

निष्पक्षपातिता न्याये पाण्डित्यं बहु विस्तृतम्,
भारत्याः सूक्ष्मबुद्धयेदं विवेच्यं सूरिभिः सदा ।

लक्ष्मी-रुक्मिणी-संवादः

द्वितीयप्रबोधावसाने पुस्तकपाठजन्यफलप्राप्तिप्रसङ्गेन लक्ष्मीप्राप्ति-निदानं स्वयं लक्ष्मीदेव्या रुक्मिणीं प्रति प्रतिपादितं निगद्य द्वितीय-प्रबोधः समाप्यते । तथाहि—

पुमान् वाऽप्यथवा नारी बालो वा बालिकाऽथवा
श्रद्धया सम्पठन्नारीचरितं सुखमेधते ।
लक्ष्मीः प्रसन्ना भवति पाठेन प्रतिवासरम् ।
वीराङ्गना-वैभवस्य प्रबोध-द्वितयस्य ह ॥

रुक्मिणीं प्रति लक्ष्मीवाक्यम्—

वसामि नित्यं सुभगे ! प्रगल्भे दक्षे नरे कर्मणि वर्तमाने ।
अक्रोधने मातृपरे कृतज्ञे जितेन्द्रिये नित्यमुपात्तसत्त्वे ॥

स्वधर्मशीलेऽथ कृतोपकारे वृद्धोपसेवानिरते च दान्ते ।
कृतात्मनि क्षान्तिपरे समर्थे क्षान्तासु दान्तासु तथाऽबलासु ॥
शुद्ध-स्वभावार्जवसंयुतासु वसामि देवद्विज-पूजिकासु ।
सत्यासु नित्यं प्रियदर्शनासु सौभाग्य-युक्तासु गुणान्वितासु ॥
पुत्रे स्थिताहं पितृमातृदेवे पित्रोश्च सन्तानसुशिक्षयित्रोः ।
दारेषु तिष्ठामि पतिव्रतेषु स्त्रीमानदे भर्तरि संस्थिताऽहम् ॥
नाहं शरीरेण वसामि देवि नैवं मया शक्यमिहाधिकर्तुम् ।
भावेन यस्मिन्निवसामि पुंसि प्रवर्द्धतेऽसौ धनधर्मकामैः ॥
जानीहि सर्वं कथितं मदीयं तथैव सर्वं परिपालय त्वम् ।
ममैव रूपेण भुवि प्रतिष्ठां त्वं रुक्मिणि प्राप्स्यसि सिद्धमेतत् ॥

मया भारतीयार्य्यनारी-चरित्रं[१],
निबद्धं प्रयत्नाद् द्वितीये प्रबोधे ।
प्रशील्यं मुदा कन्यकाभिश्च बालैः,
निजां संस्कृतिं संस्कृतं वेत्तुकामैः ॥

इति म० म० पण्डितराज-श्री गोपालशास्त्रि-
दर्शनकेशरि विरचिते वीराङ्गनावैभवे
द्वितीयः प्रबोधः समाप्तः ।

—:*:—

१—सावित्र्या विस्तृतं सर्वं चरित्रं तत्र भारते ।
अतस्तत्रैव सा दृश्या यस्या वशगतो यमः ॥ इति ।

तृतीयः प्रबोधः

निबध्यते सङ्गति-सङ्गतेऽस्मिन्,
प्रयत्नतोऽधीतिकृते तृतीये ।
स्त्रीणां सुनाम्नामपि लौकिकीनां,
सारः कथाया महिते प्रबोधे ॥

विषया-चरितम्

मन्त्रिणो विषया कन्या महाबुद्धिः सुलक्षणा ।
चन्द्रहास-विषं युक्त्या विषयामकरोत्स्वयम् ॥

केरलदेशमहाराजस्य शत्रुभिराक्रान्तस्य युद्धे निहतस्य धर्मपत्नी चितामारुह्य सतीविधिना तेनैव सह दिवमारूढा । राज्यं शत्रोराधीनमभूत् । पुत्रं तदीयं चन्द्रहासनामानमादाय बुद्धिमती स्वामिभक्ता दासी कुन्तलपुरमेत्य तत्रैव राजसदने राजपुत्रवज्जुगोप तम् ।

कुन्तलराजमन्त्री दुष्टबुद्धिरेवमभिषन्धिं कृतवानासीद् । यदनपत्ये राज्ञि दिवङ्गते राज्येऽस्मिन् स्वपुत्रमहं राजानं कारयिष्यामीति । राज्ञो वार्द्धक्यात्स एव राज्यसञ्चालकोऽभूत् ।

केनापि ज्योतिर्विदा चन्द्रहासस्येदं राज्यं स्यादिति, श्रुत्वा तदीयबधविधानेहया घातकानादिश्यात्मानं सफलमनोरथं मन्यमानः स मन्त्री कदाचित्कुलिन्दराजं निजसामन्तराजं चन्दनावत्यां नगर्यांगतवान् ।

तत्र गतस्स दुष्ट-बुद्धिस्तत्रैव कुलिन्दराजतोऽद्भुतां चन्द्रहासावाप्तिकथां निशम्य विस्मितोऽभूत् । किन्तु स्वचेष्टितान्नोपरराम । चन्द्रहासस्य पुनर्वधाभिषन्धिना पत्रं लिखित्वा सामन्तराजमादिष्टवान् । अयं चन्द्रहासो मत्पत्रं गृहीत्वा द्रुतं मद्राजधानीं गच्छतु इति ।

तदाज्ञया कुलिन्दराजोऽसौ सामन्तराजः शीघ्रमेव हयारूढं चन्द्रहासं कुन्तलपुरं प्रेषितवान् । तत्रोपस्थितश्चन्द्रहासः श्रान्तः क्वचिदुद्यानस्थाने विशश्राम । स हि शीघ्रं श्रान्ततया निद्रालीढः समजनि । तत्रैव

विहारार्थं समागता विषया-नामा राजमन्त्रिकन्या दैवात् चन्द्र-हास-कक्षगुटिकातः पत्रं पतितं पठति ।

'प्रिय पुत्र मदन ! शुभाशीः ।

पत्रनेताऽयं चन्द्रहासो मत्सम्पत्तेरधिकारी भवितेति ज्यौतिष-मुखाच्छ्रुतं मया । त्वमिदानीं कुलशीलमानमर्य्यादाविद्यावयोविभवादि-विचारं विनैवास्मै विष दीयतामिति । एतेनैवाहं कृतकृत्यः स्यामिति । ममाज्ञापालने त्वं विलम्बं न करिष्यसीत्यपि मे विश्वासः । इति शुभम् ।

पत्रं पठित्वा मुग्धा बालिका चन्द्रहाससौन्दर्यचलितचित्ताऽङ्कुरिताऽनुरागा क्षणं स्तब्धा किंकर्तव्यविमूढा द्रुतमेवाऽचिन्तयत् । नहि नहि निर्जितमारायास्मै कुमाराय कथं मे पिता विषं दापयते । नूनमत्रानुस्वारो न विस्मृतः, किन्तु याकारो विस्मृत इति स मया सम्पादनीयः । इति द्रुतं नेत्राञ्जनं गृहीत्वा नखकोणेन 'ष' कारोत्तरं या इत्यक्षरं लिखित्वा पुनर्यथावस्थितं पत्रं कृत्वा ततोऽपससार ।

उत्थितश्चन्द्रहासः शीघ्रं मदनमुपेतस्तस्मै पत्रं ददौ । स च पत्रं पठित्वा राजनीतिर्विचित्रा भवति । स्वानुपस्थितावेव मे भगिन्या विवाहश्चिन्तितः पूज्यपित्रेति 'विवाहः सार्वकालिकः' इति शास्त्रं संस्मरन् त्वरितं पुरोहितमाहूय तस्यामेव रात्रौ चन्द्रहासेन विषया-पाणिग्रहणं महता समारम्भेण सम्पाद्य प्रातः सर्वत्र राज्ये डिण्डिम-घोषमकारयत् । 'चन्द्रहास-राजकुमारेण विषयाराजकुमार्य्याः पाणि-ग्रहणसंस्कारः सम्पन्न इति' ।

पश्चात्समयेन समुपेतो राजमन्त्री जामातृत्वमुपेतं चन्द्रहासं विलोक्य निजपत्रं च पुनः प्रपठ्य मनस्येवाचिन्तयत्—

अवश्यभव्येष्वनवग्रहग्रहा यया दिशा धावति वेधसः स्पृहा ।
तृणेन वात्येव तयानुगम्यते जनस्य चित्तेन भृशावशात्मना ।।

इति विचिन्तयन्नसौ निजां दुष्टबुद्धिं विहाय ततः प्रभृति सर्वथा स्वात्मनः परिवर्तनं चक्रे । परमो विरक्तो वैष्णवो दैवपरो दिवसान् निनाय ।

साधूक्तं केनचित्—

द्विबाहुना समारब्धं कथं दुष्टमनोरथम् ।
सिध्येद् यत्र स्वयं गोप्ताऽनन्तबाहुर्महेश्वरः ॥ इति ।

पद्मिनी-चरितम्

पद्मिनी सुन्दरी नारी क्षत्रिया या महासती ।
पत्यावुपरते युद्धे जौहरं व्रतमातनोत् ॥

परमसुन्दरी पद्मिनी चित्तौरगढदुर्गतः २० विंशतिक्रोशदूरे पूर्वस्यां दिशि स्थितस्य सिङ्गोली-नामकस्थानस्याधिपतेः सामन्तराजस्य कन्या १२७५ पञ्चसप्तत्युत्तर-द्वादशशतके खीष्टाब्दे चित्तौरगढसिंहासनासीनस्य लक्ष्मणसिंहनाम्नो राणामहोदयस्य पितृव्येन श्रीरत्नसिंहेन परिणीता चित्तौरगढमाजगाम ।

तस्याः सौन्दर्य्यस्य वीरतायाश्च तदानीं महती प्रसिद्धिरासीत् । यां श्रुत्वा दिल्लीशासकः श्रीअल्लाउद्दीननामा सम्राट् तां ग्रहीतुं विफलप्रयत्नः चित्तौर-गढदुर्गमुपरुरोध । ततः क्षत्रियवीरैः पराजितः स पुनर्दिल्लीं गत्वा द्विगुणित-सैन्यः पुनर्युद्धायाह्वानमकरोत् ।

अस्मिन् युद्धे क्षत्रियैरल्पसैन्यैरपि प्राणपणं युध्यमानैः क्रमशः क्षीणैरात्माहुतिश्चक्रे । रत्नसिंहोऽपि तत्रैव वीरगतिं जगाम । अवसाने सर्वेषु क्षत्रियवीरेषु वीरगतिं गतेषु पद्मिनी-प्रभृतयो वीराङ्गना [1]जौहरव्रतेनात्मानमनले जुहुवुः । इत्यहो क्षत्रियवीराङ्गनानामद्भुतं सतीत्वरक्षणसाहसम् ।

१—यदा सर्वे वीरा युद्धे वीरगतिं गच्छन्तिस्म । तदा तेषां स्त्रियोऽपि-क्षत्रियाण्यः सामूहिकरूपेण दुर्गे एवाग्निं प्रज्वाल्य तत्रैवात्मानं पातयन्ति स्म । वयं यवन-हस्तगता न भवाम इति बुद्ध्या । तदेव जौहरव्रतमुच्यते । यदुद्दिश्य श्रीहर्षो नैषधे वक्ति ।

दहनजा न पृथुर्दवथुव्यथा विरहजैव पृथुर्यदि नेदृशम् ।
दहनमाशु विशन्ति कथं स्त्रियः प्रियमपासुमुपासितुमुद्धुराः ॥

पन्ना-धात्री-चरितम्

पन्ना धात्री महासत्त्वा माताऽजनि धरातले
मेवाड़राजतनयं ररक्षात्मज-दानतः ।

मातुर्हृदयं मातैव जानाति नान्या तद्धृदयं ज्ञातुं समर्था । पन्ना धात्री स्वात्मज-बलिदानेन मेवाडराजकुमारमुदयवीरं ररक्षेति विश्व-विदितमितिहासवृत्तमस्ति । पन्नेयमुदयवीरस्य बाल्यसेवायां नियुक्ता मातृकल्पा धात्री आसीत् ।

राणा संग्रामसिंहस्य स्वर्गरोहणानन्तरं चित्तोरदुर्ग-सिंहासनयोग्य-स्तदीयः कनिष्ठ-सूनुः श्रीमदुदयवीर-कुमारो घोषितोऽभूत् । ज्येष्ठपुत्रो विक्रम-सिंहोऽयोग्यताकारणान्न राज्याधिकारित्वे सम्मतोऽभूदिति ।

ततो राज्याधिकारिणा उदयवीरस्य षड्वर्षीय-बालस्य रक्षायां संग्रामसिंहस्यैव दासीपुत्रो वनवीरो नियुक्तोऽभूत् । स च दुष्टबुद्धिः स्वयं राज्याधिकारी भवितुं षड्यन्त्रेण विक्रम-सिंहं पूर्वमेव विनाश्य उदयवीरमपि हन्तुं दशवादने रात्रौ पन्नाधात्र्या भवनमागन्तुं यदा निश्चिकाय । तदैव दैव-प्रेरितस्तदुच्छिष्ट-पात्रमार्जको भृत्यः शीघ्रं समेत्य पन्नामसूचयत्तद्रहस्यम् । प्रत्युत्पन्न-मतिः पन्ना शीघ्रं तद्धस्ते-नैवानीते झावुके एकस्मिन् उदयवीरमुपवेश्य तच्च फलैः प्रपूरितं विधाय वहिर्नदीतीरे उदयवीरं नेतुं तमादिदेश । स्वयञ्चागन्तुं सङ्के-तस्थलं च तं समकेतयदमुकस्थाने त्वं मां प्रतीक्षस्वेति ।

कार्य्येऽस्मिन्सम्पन्ने (अपवाहिते उदयवीरबाले) तच्छयने च शायिते पन्ना-धात्री-सुते (यतो हि पन्नाया पुत्रोऽप्येक उदयवीरवयस्क आसीत्) उद्यतासिर्वनवीर आगत्य पन्नामपृच्छत्, कुत्र उदयवीर इति । प्रथमन्तु पन्ना तस्य प्राणभिक्षार्थं बहु प्रयतितवती । अवसाने यदा ता-मेव हन्तुं वनवीर उद्यतोऽभूत्तदा स्वपुत्रमेवोदयवीरत्वेनासूचयत् । स पिशाचस्तं हत्वा ततो बहिर्जगाम ।

रुदती वीरा तच्छवं नीत्वा नदीतीरे गत्वा तस्यान्त्येष्टिसंस्कारं कृत्वा स्वयं स्नात्वा झावुकवाहकं च रहस्यमिदं गोप्तुं सन्दिश्य उदय-

वीरं वहन्ती रात्रावेव देयरा-शासकस्य ग्राशासाहस्य पार्श्वे तं प्रापयत् । तत्र गत्वा सर्वमितिवृत्तं निवेद्योदयवीरं च तदङ्के निधाय 'रक्षैनं' मेवाडराजमित्युक्त्वा मूर्च्छिता धरण्यां पपात ।

ग्राशासाहश्च ज्ञातरहस्यः पन्नां धात्रीं सम्बोध्य तां प्रशंसन्नुदयवीरं प्राणप्रियं यावज्जीवं जुगोप । ग्राशासाहोपरमे जीवन्ती पन्ना समये प्राप्ते चित्तौर-दुर्ग-सिंहासनासीनमुदयवीरं पश्यन्ती राजमातृपदं प्राप्यान्ते स्वर्जगाम । वनवीरोऽपि स्वपापफलं भुञ्जानो दुर्गतिग्रस्तो महता कष्टेन मृतो नरकेऽपतत् । इति ।

उदयवीर-सिंहश्च पन्नाधात्रीबुद्धिप्रकर्षाद्रक्षितो मेवाड़राज्यं शासत् प्रजाश्च पुत्रवत् पालयन् पितुर्गौरवं ततान । तत्कृते पुत्रबलिदानं कृतवत्याः पन्नाधात्र्याः शाश्वतिकं यशोऽधुनापि जेगीयते लोके—

पन्ना धात्री दिवं याता तस्याः कीर्तिर्भुवि स्थिरा ।
स्मरिष्यन्ति सदा नार्यो यावच्चन्द्रदिवाकरौ ।।

किरणदेवी-चरितम्

अहो किरणदेव्याः स प्रभावः प्रथितो भुवि ।
यतोऽप्यर्कवरः सम्राट शुद्धान्तःकरणोऽभवत् ।।

स्वसतीत्वसंरक्षणम्भारतीयनारीणामुदीयमानमितिहासरत्नमिह जेगीयते । तत्रैवायं किरणदेव्या इतिहासः । सा हि दिव्या किरण-देवी मेवाड़सूर्यस्य राणाप्रतापवीरस्य भ्रातुः शक्तिसिंहस्य कन्या वीकानेर-राजस्य भ्रात्रा पृथ्वीराजेन परिणीता तत्प्रधान-महिषी ग्रासीत् ।

पृथ्वीराजो हि कार्य्यवशात् कियन्तं कालं दिल्लीनगरं स्वमहिष्या सहोवास । ग्रर्कवरः सम्राट् (ग्रक्कवर) तदानीं दिल्लीनगरे राजप्रासाद-पार्श्वे '**नवरोज**'—नाम्ना एकां स्त्रीमेलां चालयति स्म । तत्र पुंसां गमनं निषिद्धमासीत् । किन्तु स स्वयं स्त्रीवेशं विधाय परिभ्रमति स्म । यां कामपि सुन्दरीं पश्यति, तां स्वगुप्तचरीभिर्वशीकृत्य तत्सतीत्वं विनाशयति स्म ।

किरणदेवी तां मेलां द्रष्टुमुपगता तद्वागुरायां पतिता विस्मिता यावत्तद्भवनचाकचिक्यं पश्यति। तावत्तत्रोपस्थितोऽर्कवर: कामुकचेष्टया तां पश्यन् स्व-कुचेष्टां प्रारब्धवान् । सा हि पूर्वं वीरचेष्टया तं सम्बोधयन्ती भर्त्सयामास । परन्तु '**कामान्धो नैव पश्यति**' इति सिंहिन्यास्तस्या वचोऽनवदधत् स यावदन्यथा चेष्टमानोऽभवत् । तावदेव वद्धकक्षा सा सिंहगर्जं गर्जन्ती स्वकञ्चुकादसिपुत्रीमाकृष्य तं च भूमौ विनिपात्य तदुरसि कालिकेव समारूढा जगर्ज ।

अरे नराधम ! त्वमेव भारतसम्राट् ! क्व ते भारतीयनारीणां सतीत्व-संरक्षणव्रतं क्वेदं कुत्सितं तद्विरुद्धं कर्मेति । अहमद्यैव तव लीलां समापयामि । नो चेत् प्रतिजानीहि यदद्यारभ्य स्व-धर्मपत्नीभ्योऽतिरिक्ता यावत्योऽपि भारतीया वीराङ्गनास्ता मे यथावयो मातरो भगिन्य: पुत्र्यश्चेति ।

अर्कवरस्तु तदीयसतीत्वतेज:सूर्य्यप्रतापाग्रे दिवान्धवद् घूर्णितलोचन: सर्वाङ्गवेपथुर्वद्धहस्ताञ्जलिस्तामुवाच—'मातर्मर्षय मां नाहमित: कामप्यार्य्यमहिलां स्प्रक्ष्यामि । त्वद्वचोऽनुरूपमेव व्यवहरिष्यामीति प्रमाणपत्रं मे स्थापय । तदन्यथाभावे तत्प्रकाशनं कार्य्यमिति' सर्वां तत्रत्यां घटनां स्वप्रतिज्ञां च तत्तेज:स्पर्शविगलितमोह: सञ्जातचेतनश्च लिखित्वा ददौ । स्वपतिमृतेऽन्यत्र तद्घटनाञ्च नाख्यातुं प्रतिज्ञाप्य पद्भ्यामेव राजप्रासादाद् द्वारोपान्तं तामनुगम्य विससर्ज । तत: प्रभृति सत्यं तस्य स्वभावपरिवर्तनं जातम् । 'नवरोज'-मेला च सर्वथा निरुद्धा ।

अर्कवरीयं पत्रं तद्वंशे बहुवर्षावधि सुरक्षितमासीदधुना विलुप्तमिति श्रूयते ।

सतीत्वमहिमा लोके कुत्र केनोपमीयते ।
सम्राडर्कवरो यस्माच्छुद्धचेता: क्षणादभूद् ।। इति ।

मीराबाई-चरितम्

मीरा भक्तिमती राज्ञी भगवद्भक्तिमाश्रिता
जगाम भगवद्धाम कीर्तिस्तस्या भुवि स्थिरा ।

मुहम्मदीयशासनकाले भारते सूर-तुलसी-मीरा-प्रभृतयो बहवः प्राकृतकवयोऽभूवन् ये भारतं बहूपकृतवन्तः । तत्र राजमहिषी मीराऽपि भक्तिरसं प्रवाहयन्ती भारते स्वयशोऽमरं चकार। तस्याः कवितागानं भारते प्रतिगृहमधुनापि पूर्ववदेव भवति ।

परमपवित्रायास्तस्या जन्म षष्ट्युत्तरपञ्चदशशतके वैक्रमे (१५६०) मेवाड़प्रदेशे कुड़कीग्रामेऽभूत् । सा हि—योध-पुरनगरनिर्मातुः श्रीयोधासिंहस्य वंशे श्रीरतनसिंहस्य पुत्री बभूव । बाल्ये एव मातृ-वियोगोऽस्या अभूदिति तदानीं स्वपितामहस्य जयमालभक्तस्याश्रयेण पाल्यमानेयं भक्तिरसाप्लुताऽजनि ।

त्रयोदशवर्षीया मीरा चित्तौर-दुर्गसिंहासनाधीशेन श्रीभोजराजेन परिणयसंस्कारमवाप्य चित्तौरदुर्गमागता । तत्रापि तद्वदेव नूपुरं पादबद्धं विधाय नन्द-नन्दनस्याग्रे नृत्यति स्म । यत्तत्रत्याभ्यः श्वश्रूप्रभृतिभ्यः स्त्रीभ्यस्तत्तस्याः कृत्यं न रोचते स्म । तत्तु तस्या दैनन्दिनं कृत्यमासीद् । यत्कृते सा भर्तृगृहे बहुयन्त्रणां सेहे । परन्तु भगवद्भक्तिरसाप्लुता मीरा तत्कृत्यान्नैवोपरराम ।

कालवशात्पत्यौ तारुण्ये एव पञ्चत्वमुपगते तद्व्यथामन्तर्निगूहमाना सर्वमपि समयं भगवद्भक्तावेव यापयति स्म । कदाचिन्मेवाड़तो वृन्दावनमुपेता नक्तन्दिनं नन्द-नन्दनं भगवन्तमर्चन्ती बद्धनूपुरपादं नृत्यति स्म । तत एवेदं गानं जगति प्रसिद्धम्—

ननर्त मीरा मृदु पादपद्मयोरुद्दुह्य सन्मञ्जुलमञ्जुमञ्जिरम् ।
सनूपुरं नन्दयितुं भृशातुरा निजेष्टदेवं वनमालिनं विभुम् ।।

कदाचित्ततोऽपि द्वारिकां गता मीरा तत्र रणच्छोरनाथसमक्षे भावमग्ना सनूपुरमञ्जीरा नृत्यन्ती सहसा प्रतिमानिलीनात्मज्योतिर्जाता । तत्रैव तस्या विरक्तसन्यासिनीविधिनाऽन्त्येष्टिसंस्कारोऽभूत् । सा हि मूर्तिः सम्प्रति डाकोरस्थाने विद्यते । तत्रैव यात्रिभ्यो देवदर्शनार्थिभ्यो देवला मीराचीरं दर्शयन्ति । मीरानिर्मितानि गीतपद्यानि सर्वत्र भारते गीयन्ते ।

तत्प्रशंसायां च—

अहो विलक्षणा भक्तिर्मीराबाय्या प्रदर्शिता ।
साक्षाद्विलीना श्रीकृष्णे रणच्छोराभिधे विभौ ॥

रूपकुमारी-चरितम्

अहो रूपकुमारीयं सत्यं श्रीसिंहवाहिनी ।
प्रत्युत्पन्नमतिः साध्वी धर्मतत्त्वविवेकिनी ॥

आगरामण्डलस्यैकस्मिन् ग्रामे महादम्भी भागवतदासनामा साधुरेकः प्रतिवसति स्म । विशालतुलसीमालां गले दधच्चन्दनचर्चितगात्रो वकव्रती तुलसी-रामायणकथामपि ग्रामीणजनेषु करोति स्म । सर्वैरपि दुर्व्यसनिभिश्चौरैर्लुण्ठाकैर्दुष्टकुट्टिनीभिश्च गुप्तसम्पर्कं संस्थाप्य रक्षिणां साहाय्येन च नगरे मुख्यतां वहन्नभूत् । कुमार्गेणोत्कोचादिना द्रव्यसंग्रहं विधाय पापवासनामपि पूरयति स्म । मार्जारभक्तस्य तस्येदं रहस्यं कस्यापि विदितं नाभवत् । सर्वेऽपि सभ्या नागरिका महान् साधुरयमिति मत्वाऽर्चयन्ति स्म ।

कदाचिद् धर्मसिंहनाम्नो गृहस्थस्याऽतिसुन्दरीं भार्यां विलोक्य चलितचित्तस्तां लब्धुं कृतप्रयत्नोऽपि विफलः कस्मिंश्चिदभियोगे रक्षिसम्बन्धिनि तं पातयित्वा उपरितस्तस्य साहाय्यं चिकीर्षुरुवाच । अत्र त्वां रक्षिणो निग्रहीष्यन्ति । त्वं ग्रामान्तरे गुप्तो भव । अहं तवैव गेहे कथां चालयिष्यामि, हरिकीर्तनं च भविष्यति । तत एवाहं त्वां यदाऽभियोगान्मुक्तं करिष्यामि तदा त्वमागन्ता । यस्याहं सहायकः स्यां तस्य रोमाऽपि नान्यथा स्यात्त्वं निश्चिन्तो ग्रामान्तरे तिष्ठेति ।

स हि धर्मसिंहो भीरुर्धार्मिक-प्रवृत्तिः स्त्रीद्वितीयः साधु-सेवी विश्वस्तोऽभवत् । ममैवं गृहरक्षाऽपि भवति साधुना च हरिकथा चालयितव्येति धर्मोऽपि स्यादिति विचार्य्य ग्रामान्तरे गुप्तोऽभवत् । मार्जारभक्तश्च तद्गृहे कथां कीर्तनं च चालयन् कथान्ते स्वाश्रमे समेत्य तिष्ठति स्म ।

एकस्मिन् दिने उद्बुद्धपापबुद्धिः कथान्ते धर्मसिंह-पत्नीमुवाच। अद्य मे स्वास्थ्यं विगुणितं भाति। तवैव गेहे शयनं प्रातराश्रमगमनमिति। धर्मसिंहगृहिणी साधु-गृहनिवासः पुण्यजनकः, इति महतोत्साहेन स्वगृहे तस्य शयनशय्यामकारयत्।

रात्रौ च विश्वस्तं शयाना निशीथे तमेव भागवतदासं स्वशय्यापार्श्वे दण्डायमानं दुश्चेष्टं वीक्ष्य भर्त्सयन्ती उवाच। अये धर्मध्वजिन्! किमिदं ते विचेष्टितं दूरमपसर। नाहं त्वां विषकुम्भं पयोमुखं ज्ञातवतीत्युक्त्वा भर्त्सयन्ती ततः प्रकोष्ठान्तरे गत्वा आभ्यन्तरतो दत्तशृङ्खला तत्कृत्यं प्रतीक्षमाणाऽतिष्ठत्। स हि कामान्धस्तत्प्रकोष्ठभीतिं कुद्दालेन विदार्य शिरोदेशेन तच्छिद्रद्वाराऽऽत्मानं यावत्तस्मिन् प्रकोष्ठे पातयितुमिच्छति, तावदेव रूपकुमारी दैवात्तत्प्रकोष्ठ-स्थितेन तीक्ष्णशस्त्रेणैकेन 'खच्' इति शब्देन सहैव तच्छिरोधरां पृथक् चकार।

प्रातर्ग्रामीणा भगवद्दासदशां दृष्ट्वा रूपकुमारीतस्तदुदन्तं च श्रुत्वा परस्परमूचुः। अहो धर्मध्वजिनां षड्यन्त्रवागुरा—किं किमनर्थं जगति न कुर्य्यादित्यल्पमेव। अयमेव धर्मध्वजी वैडालव्रती धर्मसिंहं शासनाभियोगे पातयित्वा ग्रामान्तरेऽतिवाह्येदं दुष्कृत्यं साधायितुमत्र हरिकथादम्भं चालितवान्। इति ग्रामे तस्मिन् सर्वोऽप्युपद्रवस्तन्मूलक एवासीदिति साधूक्तम्।

'हिंस्रः स्वपापेन विहिंसितः खलः।'

बलरामेणापि—वध्या हि धर्मध्वजिनस्ते हि पातकिनोऽधिकाः।

मनुनाऽप्युक्तम्—न वार्य्यपि प्रयच्छेत्तु वैडालव्रतिके द्विजे
न वाकव्रतिके वापि नावेदविदि धर्मवित्। इति।

ततश्च शासका रूपकुमार्य्याः साहसं श्रुत्वा तस्यै पुरस्कारं दत्तवन्तः। तस्मिन् प्रान्ते तस्याः साहसचर्य्या कथानकरूपतो गृहं गृहं जेगीयते।

अहो रूपकुमारीयं कीदृशी साहसप्रिया।
धर्मध्वजिविनाशेन ग्रामं निष्कण्टकं व्यधात्॥

वीरवाला-चरीतम्

वीरबाला महाप्राज्ञा नीतिज्ञा धैर्यशालिनी ।
राणाप्रतापं सम्बोध्य सन्धि कर्तुं न्यषेधयत् ।।

भारते राणाप्रतापं को न जानाति । स हि हल्दीघाटी-युद्धेऽलब्ध-विजयोऽन्यक्षत्रियवदर्कवरेण सन्धिं न चकार । प्रत्युत प्रियतमया वीरबालया निजपत्न्या समेधितोत्साहः पञ्चविंशतिवर्षावधि युद्धव्यापृत एवासीदिति ।

कदाचित्सन्तानदुःखविक्लिन्नहृदयोऽर्कवरेण सन्धिं कर्तुं पत्रं लेखितुं प्रवृत्तोऽपि वीरबालयैव निवारितोऽभूत् । सा हि विजने तमुक्तवती । अयि वीरवर ! व्यसनेऽपि वात्यायां गिरिवद्वीरपुरुषा अकम्पना एव भवन्ति । पश्यतु यदा भवत्पत्रं तत्रार्कवर-सदसि समुपस्थितं स्यात् । तदा भवत्पराक्रमविषयकोऽर्कवरभाव एव कीदृक् परावर्तितः स्यात् । तत्रत्यानां भवत्प्रशंसकानां का दशा स्यात् ? भवत्प्रतापसूर्यं सदैवार्कवरसमक्षे स्तुवतो रहिमखानखानाकवेः स्वाभिमानिनो वैरहमपुत्रस्य का स्थितिः स्यादिति चिन्तयतु ।

इत्येवं पत्नी-प्रबोधित एव प्रतापः सन्धिपत्रादुपररामेति बहव ऐतिहासिका ब्रुवन्ति । इत्येवं वीरबालाधैर्यबलादेवारण्ये कष्टमयजीवनं यापयन् राणाप्रतापसूर्य्यो निजयशोरश्मिभिर्भुवं पाययन्नन्तेऽस्ताचलमाससादेति सर्वोऽपि वीरबालाया धैर्यप्रभाव एव । अतश्च सर्वैर्नरैरिदं सर्वदैव चिन्तनीयम् ।

पत्नीप्रभावेण नरो महान् भवेत्
पत्नीप्रभावेण विपत्तिमुत्तरेत् ।
पत्नीप्रभावेण वसेत्सदा सुखी
पत्नीप्रभावेण नरोऽमरो भवेत् ।।

रानीभवानी-चरितम्

रानीभवानी विधवा विबुधा धर्मचारिणी ।
बभूव भारते नारी यया सन्दीपितं जगत् ।।

रानीभवानी हि नाटौर-राजवंशस्य रमाकान्तदेवस्य धर्मपत्नी वङ्गदेशीय-मुर्शीदावादनगरे स्वराजधान्यां निवसति स्म। द्वात्रिंशद्वर्षीयैवेयं पत्युर्महाप्रयाणात्तद्वियोगविधुरा राज्यशासनसूत्रं जग्राह।

तदानीं भारते गोरण्डशासन-प्रभुता प्रवर्द्धमानाऽसीत्। लार्डक्लाइवो वङ्गीयाढ्यवर्गमनीषिभिर्मिलित्वा गुप्तषड्यन्त्रेण वङ्गालनरेशं सिराजूद्दोलाख्यं मोहम्मदीयशासकं समुन्मूलयितुं यदेयेष, तदेयमेव तन्मर्मज्ञा तत्कूटनीतिप्रासादं ध्वंसयामास।

लार्डक्लाइवकूटनीतिं यथेयं ज्ञातवती, तथैव यदि सर्वेऽपि भारतीय-राजन्यवर्गा अज्ञास्यंश्चेदन्यथैवाद्याभविष्यद्भारतीयराजनीतिः। अस्तु विधातुर्विधानं कः परिवर्तयेत्। भारतीया एव गोरण्डशासनमत्रानयन्निति तथ्यम्।

इयं राजनीतिनिपुणा प्रजापालनतत्परा तारुण्येऽपि विधवा राजमहिषी नियतिचक्रादेव स्वजीवनयात्रां चालयति स्म। प्रातर्ब्राह्ममुहूर्त्ते समुत्थाय गङ्गास्नानं विधाय यथासमयं देवपूजनकृत्यं विधाय राज्यकार्यं पश्यतिस्म।

भोजनवेलायां प्रतिदिनं ब्राह्मणान् भोजयित्वा सार्द्धप्रहरे स्वयं हविष्यान्नं भुंक्ते स्म। ततो राज्यकार्य्यालये राज्यशासनादेशं विधाय तृतीयप्रहरे पुराणश्रवणं ततो व्यवहारकर्गजेषु हस्ताक्षरकरणम्। हस्ताक्षरवेलायां सर्वेऽपि कर्मचारिणः कम्पन्तेस्म। यतोहि कर्गजान्यथावृत्तविज्ञाने भृत्यतापाकरणमेव फलं भवति स्म।

सायमपि गृहे देवतागारारार्तिकानन्तरं प्रजानां नियमतो विवादव्यवहारश्रवणम्। ततो मिताहारग्रहणानन्तरं समये शयनं समये च समुत्त्थानमिति व्यवस्थितमस्याः सर्वोऽपि कार्य्यक्रमः।

सर्वतीर्थस्थलेषु धर्मशालाः-प्रपा-देवमन्दिरादि-निर्माणजीर्णोद्धारादिकृते प्रतिवर्षं लक्षरूप्यकव्ययो निर्द्धारित आसीत्। धनसम्पत्तौ सत्यां कठोरव्रतपालने राज्यचालने पुरुषापेक्षयाप्यतिदाक्ष्यं राज्यकोशाभिवृद्धिश्चेत्यादयोऽद्भूता गुणा रानीभवान्यामासन्। ७६ उनाशीतितमे वर्षे

बड़नगरे गङ्गातीरे हरिकीर्तने देहविसर्जनम्। इति प्राशस्त्यं जीवनं तस्याः। तथाहि—

> सम्पत्तेः सद्व्ययस्तद्वत्तारुण्येऽप्यति-संयमः।
> कृत्यं व्यवस्थितं सर्वं भवान्या भुवि राजते॥

दुर्गावती-राज्ञी-चरितम्

> दुर्गावती महाराज्ञी वीरवैभवशालिनी
> रणे वीरगतिम्प्राप्ता सर्ववन्द्या पतिव्रता।

इयं देवी हम्मीरपुर-मण्डले महोवानगरे (१६००) षोडश-शताब्दी-मध्ये चन्देलवंशीय-महाराजश्रीकीर्तिसिंहात् पितुर्जन्मासाद्य तेनैव सह कालीञ्जरनाम्नि प्रसिद्धदुर्गे बाल्यकालं निनाय। मध्यप्रदेशे राजगोंड़वंशे महाप्रभावस्य संग्रामसिंहस्य सूनुः श्रीदलपतशाहनामा प्रसिद्धो भूपति-र्युद्धे चन्देलवंशीयान् विजित्य दुर्गावतीं परिणिनाय।

स हि भूपतिर्विवाहादष्टमे वर्षत्रयवयस्कं पुत्रं विधवां दुर्गावतीं च विहाय स्वर्जगाम। पुत्रपालनव्यापृता राज्ञी पतिं नानुजगाम। पुत्रं शिक्षयन्ती १५ पञ्चदशवर्षावधिं राज्यशासनं चकार। तस्याः शासनमतिसमृद्धं यत्र हस्तिनमारूढाः प्रजा निष्कं करं दातुं राजधानी-मागच्छन्ति स्म। तस्याः कोशगृहं हिरण्यैर्महारत्नैः सम्भृतं बभूव।

एकदाऽकबरः सम्राट् तस्याः पार्श्वे पत्रं प्रहितवान्। तेनैव सह सुवर्णमयं तर्कुयन्त्रञ्च। यत् स्त्रियाः तर्कुचालनं कर्म न हि राज्यशासनम् इति। तदुत्तरे इयमपि महाबुद्धिमती राज्ञी सुवर्णमयं तूलधूनन-यन्त्रं सम्प्रेष्य लिखितवती यत्तवापि तूलधूननं कर्म नहि राज्यशासन-मिति। फलतः उभयोर्महायुद्धे प्रवृत्ते युध्यमाना देवी दुर्गावती वीर-गतिं लेभे।

तस्याः समाधिः हस्तिहस्तिपकाभ्यां सह जब्बलपुरतो बरेलाग्रामं गच्छतो मार्गस्योपरि तद्ग्रामपार्श्वे विद्यते। यत्र प्रतिवर्षं जनमेला

भवति । दर्शनार्थिनो दुर्गावती-समाधिं दर्शं दर्शमात्मानं पावयन्ति । तत्कीर्तिगाथाश्चाद्यापि मध्यप्रदेशे प्रतिगृहं तत्रत्या जना गायन्ति । इति ।

लक्ष्मीबाई-चरितम्

लक्ष्मीबाई महादेवी रणदुर्गाऽभिधीयते ।
युध्यमाना यया सार्द्धं गोरण्डा भूरिशो हताः ॥
महाराष्ट्राभिधे देशे कृष्णाया उत्तरे तटे ।
बाई नामनि वै ग्रामे मोरोपन्तो द्विजो ऽभवत् ॥
तस्य विप्रस्य या पत्नी नाम्ना भागीरथी शुभा ।
मातापित्रोस्तयोर्जाता बालिका शुभलक्षणा ॥
चन्द्राङ्कवसुचन्द्रेऽब्दे वैक्रमे कार्तिके शुभे ।
शुक्लपक्षे चतुर्दश्यां ग्रहेषूच्चेषु पञ्चसु ॥
मनू बाईति यन्नाम मातृपितृकृतं शुभम् ।
लक्ष्मीबाई ततो नाम पत्युर्गृहमुपागता ॥
कन्येयं राजपत्नी स्यादिति दैवज्ञ उक्तवान् ।
तथैव तस्याः संस्कारो वैवाहो राज-सद्मनि ॥
झांसी-प्रदेशराजेन रावगङ्गाधरेण वै ।
दाक्षिणात्यप्रथानीत्या लक्ष्मीबाईति कथ्यते ॥
कियतः कालतस्तस्याः पुत्ररत्नमजायत ।
कृताखिलप्रयत्नोऽपि शिशुस्तस्या दिवङ्गतः ॥
अङ्गशून्याङ्कचन्द्रेऽब्दे वैक्रमे चापि तत्पतिः ।
दैवाद्रोगाभिभूतः सन्नकालमरणं गतः ॥
तदानीं शासका येऽपि गोरण्डाः कूटनीतयः ।
तद्राज्यार्द्धमपाहृत्य क्षते क्षारं न्यपातयन् ॥
ह्रस्वराज्या पतिप्राणा वीरपत्नी वियोगिनी ।
कालं प्रतीक्षमाणा साऽयापयद्वीरजीवनम् ॥
ब्राह्मे मुहूर्ते तूत्थाय स्नात्वा कृत्वाऽह्निकक्रियाम् ।
अश्वमारुह्य नित्यं सा व्यायामं प्राङ्गणेऽकरोत् ॥

भुक्त्वा किञ्चिच्च विश्रम्य राज्यकार्य्यं स्म पश्यति ।
इत्थं कर्मप्रसक्तायाः कालोऽगच्छदहर्निशम् ॥
कम्पनीराज्यलोपार्थमान्दोलनमभूद् यदा ।
तदा सा धृतसन्नाहा सेनाचालनतत्परा ॥
प्रावर्तताश्वमारूढा योद्धु गोरण्डसैनिकैः ।
न सा वर्णयितुं शक्या लक्ष्मी वाई महाद्युतिः ॥
सौदामिनीव मेघेषु सैन्येष्वादृश्यते स्म सा ।
खड्गेनाप्यथ कुन्तेन प्रासेनान्यैः सुदारुणैः ॥
शस्त्रैरस्त्रैः कृतवती महायुद्धं यशस्विनी ।
कर्णपूरात्प्रयागान्तं गोरण्डान्सा व्यनाशयत् ॥
कदाचिद् ग्वालियर्युद्धे गोरण्डान् विनिपात्य सा ।
त्यक्त्वा देहं गता स्वर्गं गीतकीर्तिर्महीतले ॥
कीर्तयन्ति यशस्तस्या आर्य्याः सर्वत्र भारते ।
इत्येवं बहवो वीरा नार्य्योऽस्मिन्भारतेऽभवन् ॥
कैकयी विदुला घोषा राज्ञी दुर्गावती तथा ।
यासां चरित्रमहसा पवित्रा भारती मही ॥
बाल्ये सदा युद्धकलां शिशिक्षे ।
भाग्येन याऽयुध्यत यौवनेऽपि ॥
गोरण्ड - सैन्यैर्युधेऽन्त - काले ।
युद्धार्थिनी साऽजनि पन्त-पुत्री ॥

अहल्यावाई-होल्कर-चरितम्

विदुष्यहल्यावाई सा महाराज्ञी गुणोज्ज्वला ।
तीर्थोद्धारादिभिर्यस्याः कीर्तिः सर्वत्र गीयते ॥

अहल्यावाई होल्कर इति नाम्ना प्रसिद्धेयं वीराङ्गना भारतगगने विद्योतते । उज्ज्वलकीर्तिरियं मल्हारावहोल्कराज्ञया तत्पुत्रेण खण्डेराव होल्करेण परिणीता इन्दौरराजधानीमध्युवास । सेयं कियतैव कालेन—

श्वश्रूं श्वशुरदेवं च पतिदेवं सबान्धवम् ।
ननान्दृवर्गं भृत्यांश्च स्वगुणैः पर्यतोषयत् ॥

ततश्च प्रधानमहिषी-पदासीनाऽहल्याबाई एकं पुत्ररत्नं ततश्च कियतः कालादेकां कन्यां च सुषुवे । विधातृनियोगान्नव-वर्षावधि दाम्पत्य-सुखमुपभुञ्जानेयं दशमे वर्षे विवाहकालाद्वैधव्यदग्धा श्वशुरानुरोधात्पत्युरनुगमं न चकार । तदनुरोधादेव इन्दौरराज्यशासनसूत्रं जग्राह ।

अहल्याबाई-शासनं वीक्ष्य परमप्रसन्नो मल्हाराबो विस्मृतखण्डेरावमृत्युदुःखः सुखेन निजाशेषजीवनं निरुवाह । पञ्चषष्ट्युत्तरसप्तदश-(१७६५) शतके जीवनलीलां संववार । ततोऽहल्याबाई-पुत्रो मालेराबो राज्यशासनं चालयन् नियतिवशादल्पायूरकाले एव दिवं जगाम ।

इत्येवं वैधव्यदुःखदग्धाऽपि पुत्रशोकसन्तप्ताऽहल्याबाई पुना राज्यशासनं पूर्ववत्सञ्चालयामास । गोब्राह्मणान् परिपुष्णती सर्वत्रैव भारते तीर्थक्षेत्रेषु धर्मशाला-तीर्थ-घट्ट-नदी-सेतुनिर्माणादिना स्वकीर्तिमचलां चकार । अद्यापि काशीप्रभृतितीर्थस्थलेषु, अहल्याबाईघट्टोऽयम् अहल्याबाई-धर्मशालेयमित्यादि घोषैस्तस्याः कीर्तिर्जेगीयते ।

कदाचिद्विद्वांसोऽभिनन्दनग्रन्थं निर्माय तत्प्रकाशनार्थं तां प्रददुः । सा हि 'निष्कामकर्मैव मानवानपवर्गं नयति' इत्युक्त्वा ग्रन्थरत्नप्रकाशनं निरुध्य स्व-ग्रन्थागारे सञ्चिकाय । ब्राह्मणेभ्य एव तत्प्रकाशनमूल्याच्चतुर्गुणं द्रव्यं विभज्य वितताार । ईश्वरगुणगानमेव वैदुष्यकर्म न हि मानवगुणकीर्तनमिति तानप्युपदिदेश ।

अवसानेऽविच्छिन्नं दशसहस्रब्राह्मणान् पक्वान्नं भोजयन्ती तेभ्यो वस्त्रालङ्कारान्ददती हरिकीर्तनमध्ये द्वाषष्टितम (६२) वत्सरवयोऽवस्थायां नश्वरशरीरं विजहती स्वर्जगाम—

वीराहल्या धर्म-मर्म-प्रबोधान्-
निष्कामं स्वं कर्म कृत्वा धरायाम् ।

प्राप्ते काले राज्यभारं समुह्य,
नारीणां तत् कृत्यमर्हं दिदेश ।।

एनी-विसेण्ट कथा-सारः

एनी-विसेण्ट इत्याख्या यूरोप-महिला बुधा ।
भारतेऽत्र समागत्य कांग्रेसान्दोलने रता ।।

इयं हि विदुषी आयरिशजातीया एनीविसेण्ट इत्यभिधाना इंग्लिश-भाषाभिज्ञा थियोसफिष्टमताभिरतेह भारते शिक्षाप्रचारं विदधती महाराष्ट्रप्रदेशे प्रथमम् अडियारस्थ-थियोसफिस्ट-समाजे तस्थौ ।

इयं स्वतन्त्रतासम्बन्धे इंग्लिशभाषायामतिमञ्जलमाकर्षकं व्याख्यानं ददाति स्म । भारते पञ्चवर्ष-स्थित्यनन्तरं काश्यां हिन्दुकालेज नाम्ना महाविद्यालयं चालितवती । यो हि मदनमोहनमालवीयमहोदयस्य हिन्दूविश्वविद्यालयरूपेऽग्रे परिणतोऽभूत् ।

तत एव हिन्दूकालेजं मालवीयमहोदयहस्ते समर्प्य मुक्तबन्धनेयं देवी कांग्रेसान्दोलने व्यापृता बभूव । तत्रापि स्वजीवनं समर्पयन्तीयं स्वयोग्यतया कांग्रेसाध्यक्षपदमलञ्चकार ।

इत्थमियं भारते शिक्षा-प्रचारेण कांग्रेसान्दोलनेन स्वराज्यप्राप्तौ साहाय्यदानेन हिन्दुतीर्थव्रतादिषु श्रद्धाविश्वासाभ्यां च भारतीयसंस्कृति-प्रेम्णा सर्वानेव भारतीयान् स्वभक्तान् चकार । अवसाने च भारतीया अपि इमाम्—

सद्बुद्धि-दुग्धदानेन सद्वात्सल्यहितेन च ।
मातेयं मातरोऽस्माकं केवलं जन्महेतवः ।

इत्यादि-वाक्यैर्मातरं पूजयन्तो भारतीयशास्त्रमर्य्यादयाऽन्त्येष्टिसंस्कारं श्राद्धकृत्यं च कृत्वा तस्यां श्रद्धां व्यञ्जयन् । इत्थं षडशीतिवर्षतोऽप्य-धिकं स्वजीवनं भारतराष्ट्रोन्नीतौ समर्पयन्त्यै आर्य्यायै वासन्तीदेव्यै ममापि श्रद्धाञ्जलिर्भूयादित्यलम् ।

भीमाबाई-होल्कर-कथासारः

भीमाबाई महावीरा शास्त्रास्त्रकुशलाऽभवत् ।
माल्कमहेलीमतिक्रम्य हयाऽरूढ़ा तिरोऽजनि ॥

इयं भीमादेवी अहल्याबाईहोल्करीयदत्तकपुत्रस्य तुकोजीरावस्य पौत्री यशवन्तरावहोल्करस्य पुत्री बभूव । पित्रैव शिक्षिताऽश्वचालने शास्त्रास्त्रविद्यायां च पारङ्गताऽसीत् । मातृभाषया सह पार्सीभाषाया (फारसी भाषाया) अभिज्ञेयमपरिणीतैव यदा पितृगृहेऽभवत् । तदैवास्याः पितुरुपरमे तदीयराज्यमपहर्तुं गोरण्डीयाः कूटनीतिं प्रयुयुजुः । रणचण्डीस्वरूपा भीमादेवी ज्ञातशस्त्रास्त्रविद्या सैन्यसंग्रहं विधाय शिववीरवत् अवसराक्रमणयुद्धम् (गोरिल्लायुद्धम्) आरेभे । यद्भयात्तेऽस्या राज्यं स्वतन्त्रमत्यजन् । कथेयं तत्र देशे प्रतिजनं प्रसिद्धास्ति यत् माल्कमहेली ससैन्यो यदा भीमादेवीं पर्य्यरुणत् । सैन्यञ्चादिशद् इमां जीवन्तीं निग्रहीतुं । तदा यथा यथा सैनिकाः सर्वदिग्भ्यः संवृण्वन्तोऽस्याः सन्निधिमागच्छन्ति स्म तथा तथेयं माल्कमहेली-सन्निधाने गच्छति स्म । ते हि यावत्तर्कयन्तो यदियमस्माभिः समावृता स्वामिने आत्मसमर्पणं कर्तुं तत्सान्निध्यमासादयतीति शिथिलयत्ना भवन्ति । तावदेवेयं झटिति तत्समीपमुपेत्य हयञ्च गुल्फेङ्गितेन माल्कमहेलीशिरसैवोत्फाल्याऽश्वपादाघातञ्च तच्छिरसि कारयन्ती तिरोबभूव । इयं गता इयं गृहीता अहो पलायिता । न जाने कुत्र विलीनेति ब्रुवन्तो विनिवृत्ताः सैनिकाः स्वामिशिरश्चिकित्सायां सर्वे व्यापृताः भीमा देवी नैवासादिताभूदिति । तत्सम्बन्धे पद्यमिदं प्रसिद्धम् । तथाहि—

भीमा देवी समरकुशला भारतेऽभूत्प्रसिद्धा
होल्करवंशे जनिमलभत ब्रह्मचर्यप्रधाना ।
श्रीपित्रैव प्रथितयशसा शिक्षिताश्वास्त्रविद्या
माल्कमहेलीं व्यजयत पुरः पश्यतां सैनिकानाम् ॥

प्रभावती-कथा-सारः

प्रभावती महाराज्ञी वीरा परमसुन्दरी।
कामुकं म्लेच्छराजं तं विवाहविधिनाऽवधीत् ॥

गुन्नौरराजस्य राज्ञी प्रभावतीनामा सौन्दर्यगुणे ख्यातयशा रमणी बभूव। तस्याः सौन्दर्यलुब्धस्तद्राज्य-समीपस्थो मुहम्मदीयो राजा सहसा तद्राज्ये ससैन्य आक्रमणं चकार। रणे युध्यमानो गुन्नौरराजस्तु वीरगतिं जगाम। स्वयं युद्धनिपुणा राज्ञी अपि युध्यमाना सैन्यक्षये नर्मदादुर्गाश्रयणं चकार। ततः कामुकोऽसौ "यदि त्वं मया सह परिणयं विधाय तिष्ठसि चेत्ते राज्यं त्वत्पुत्राय दत्त्वा तद्रक्षाभारमप्यहमावक्ष्यामीति" दूतं प्रजिघाय।

बुद्धिमती राज्ञी अन्तर्ज्वलिताऽपि 'मायाचारो मायया लङ्घनीयः' इति छद्मनैवोदतरत्। आवयोः परिणयो हिन्दुसंस्कारविधिना भविष्यति। इति। स हि कामुकः 'अर्थी दोषं न पश्यति' इति सवं राज्ञ्या विवाहपणं स्वी-चकार। यदा स हालाहलविषदिग्धं वरपरिच्छदं परिधाय मण्डपमध्ये समाजगाम तदा राज्ञीसौन्दर्यं वीक्ष्यैव मुग्धोऽभवत् अहो रूपमहो सौन्दर्य्यमित्युच्चैर्जगर्ज। तदनन्तरं क्षणेनैव कञ्चुकं स्फाटयन् म्रियेऽहं मां रक्ष रक्षेति व्याहरन् भूमौ लुलोठ। राज्ञी तु तन्मुखं निरीक्षमाणा व्याप्तविषं तं परिलक्ष्य मनसि तु तवाधमस्य यमदेव एव रक्षकोऽधुनेति व्याहृत्य स्वराज्यरक्षां विधाय नर्मदाधारापाते स्वजीवनं विससर्ज। स हि पापस्तत्रैव व्यवसन्नप्राणः पञ्चत्वं प्राप। पश्चाच्च हतस्वामी मन्त्री स्वयमपि प्राणप्रियो द्रुतं तद्राज्यात् सैन्यं परावर्तयामास। प्रभावत्याः बुद्धिप्रभावं सतीत्वरक्षणदार्ढ्यं च स्मरणीयं सर्वैरित्यलम्।

सरोजिनीनायडू-कथा-सारः

जज्ञे सरोजिनी देवी नायडू वङ्गभूमिषु।
ब्राह्मणी राजनीतिज्ञा ख्याता भारतकोकिला ॥

इयं सरोजिनी देवी वङ्गप्रान्ते श्रीअघोरनाथ-पितुर्ब्राह्मणविदुषः सकाशाज्जन्म लेभे। एतस्या माता वङ्गभाषायाः कवयित्री आसीदिति कविताशक्तिरस्याः स्वाभाविकी बभूव। पिताऽस्या विज्ञानकलाविदासीदिति इमां बाल्यादेवेंग्लिशभाषणे पटवीं चकार। इयं द्वादशवर्षावस्थायामेव इंग्लिशभाषायाः प्रवेशिकां परीक्षामुत्ततार। भारते नाद्यावधि काप्यन्या कन्येमां परीक्षामस्यामवस्थायामुत्ततार।

इयमिंग्लिशभाषां गोरण्डवदेव वदति स्मेति षोडशवर्षंगे वयसि इग्लैण्डनगरे राजमहाविद्यालयेऽध्येतुं प्रेषिताऽभूत्। ततो वर्षत्रयेणाधीत्य १८९८ अष्टनवत्युत्तराष्टादशशतमिते खीष्टाब्दे परावृताऽभूत्। तस्मिन्नेवाब्दे श्रीगोविन्दराजुलूनायडू इति नाम्ना वङ्गीयेनाब्राह्मणेन परिणीताऽत एव सरोजिनीनायडू इत्यभिधानं लेभे।

महात्मनो गान्धिनः कांग्रेसान्दोलने व्यापृतेयम् इंग्लिशव्याख्यानं समुत्तेजकं करोतिस्म। अस्या इंग्लिशभाषा मञ्जुला मधुरा कवितामयी भवति स्मेति 'भारतकोकिला' जनतादत्त एवास्या उपाधिरभूत्। इयं पञ्चविंशत्युत्तरोनविंशतिशतमिते वर्षे राष्ट्रीयमहासभायाः (कांग्रेसस्य) अध्यक्षपदमप्यलञ्चकार। जाते स्वराज्ये उत्तरप्रदेशराज्यस्य राज्यपालपदमप्यलं चकार।

इयमेव प्रथमा भारतीयमहिला या हि राजनीतौ प्रविष्टा राज्यपालपदं प्राप्य ७० सप्ततितमे स्वजन्मतो वर्षे नश्वरं शरीरं विहाय त्रिदिवं जगामेति संक्षेपः।

सतीनां मया लौकिकीनां समन्तात्,
कथासार आहृत्य दत्तस्तृतीये।
प्रबोधे प्रशील्यः सदा बालिकाभि-
स्तथा बालकैर्वेदितुं गौरवं स्वम्॥

इति श्री म० म० पण्डितराज श्रीगोपालशास्त्रि-
दर्शनकेशरि-विरचिते वीराङ्गनावैभवे
तृतीयः प्रबोधः समाप्तः।

—:*:—

चतुर्थः प्रबोधः

ग्रामीणबालाचरितैः सहैवं,
क्रान्ति-क्रिया-दीक्षित-योषितां च ।
संक्षिप्य सत्साहसमत्र तुर्य्ये,
स्त्रीधर्मचर्चाऽपि कृता प्रबोधे ॥

क्षेत्रगोपिकाकन्या-चरितम्

क्षेत्रपाला तु या कन्या सा हि क्षत्रियबालिका ।
परिणीताऽरिसिंहेन प्रभाव-बलबुद्धिभृत् ॥

राणा श्रीलक्ष्मणसिंहस्य ज्येष्ठकुमारः श्रीमदरिसिंहो वयस्यैः सह मृगयाङ्गतो वनशूकरं कञ्चिदनुसरन् यदा क्षेत्रगोपिकायाः कस्याश्चन सस्यपूर्णेऽपि क्षेत्रे प्रवेष्टुमियेष । तदैव द्रुतं सा तदग्रे समुपेत्योवाच । युष्माकं साश्वप्रवेशेन क्षेत्रं मे विमर्दितं स्यादिति । अहमेव शूकरं हत्वा युष्मत्समक्षे संस्थापयामीत्युवाच तेनाङ्गीकृते सा क्षेत्रे प्रविश्य कियतैव क्षणेन हतं शूकरं तेषामग्रे चिक्षेप । ते च साश्चर्यं शूकरं गृहीत्वा प्रतिनिवृत्ताः ।

कियतः कालस्यानन्तरम् तेष्वेकस्याश्ववारस्याश्वः कुतोऽपि प्रक्षिप्तेन प्रस्तरेण भग्नपादोऽभूत् । ततः सैव बालिका "ममानवधानतया पक्षित्रासार्थं प्रक्षिप्तेन प्रस्तरेण वोऽश्वो भग्नपादोऽभूदिति क्षन्तव्यो मेऽपराधः । अरिसिंहस्तु प्रसन्नतरोऽवोचत् । तव शक्ति विलोक्याश्चर्यमग्नस्य मे हस्तेऽधुना किमपि ते पुरस्कारयोग्यं वस्तु नास्तीत्येव मे विषादः ।

सायङ्काले परावर्तमानैस्तैरेव सैव बालिका मस्तकोपरि दुग्धपात्रं संस्थाप्य हस्तद्वयेन द्वौ महिषौ रज्जुबद्धौ कर्षन्ती गृहाभिमुखम् गच्छ-

न्ती दृष्टा। तत्रैकः कौतुकी विनोदबुद्धया तस्या दुग्धपात्रं पिपातयिषुरग्रे चचाल। सा हि तदिङ्गितज्ञा पुरतो हस्तरज्जुमेवं प्रचिक्षेप येनैको महिषो महता वेगेनोच्छलितोऽभूत् सोऽश्ववारः साश्वो भूमौ पपात।

पश्चाच्च ज्ञाततत्त्वोऽसावरिसिंहोऽपि इयं क्षत्रियबालिकेति तस्याः पितरं निवेद्य विवाहविधिना तां परिणीय प्रधानमहिषीं चकार! सैव राजमहिषी हम्मीरसिंहस्य जन्मदात्री राजमाता बभूवेति लोकप्रसिद्धिः।

सूर्या परमारा च

राज्ञो देवलराजस्य दाहरस्य सुते उभे।
सूर्य्या च परमारा च बगदादे दिवं गते॥

बगदादस्य खलीफा वलीदनामा भारते विजयकामनया स्वसेनापतिं विनकासिमं महत्या सेनया सह सिन्धुप्रदेशस्थ-देवलराज्योपरि समाक्रमणाय प्रजिधाय।

तदानीं देवलराज्यस्य राजा दाहरः तत्पुत्रश्च जयशाहो महतासाहसेन युध्यमानौ वीरगतिं प्रापतुः। राजमहिषी चापि स्वामिपुत्रयोर्निधनानन्तरम् वीराङ्गनोचित-साहसोपेता सेनासंग्रहेण बीनकासिमं चमत्कुर्वती तदीयसेनां विनाशयन्ती दैवदुर्विपाकात् निजस्वामिगतिमनुजगाम। विनकासिमो म्लेच्छबुद्धिः स्वसैन्यै राजप्रासादद्रव्याण्यपाहृत्य दाहरसुते सूर्य्या-परमारे बन्दिन्यौ विधाय दाहरशवस्य शिरश्छित्त्वा तेनैव सह वगदादं प्रेषयामास।

यदा ते वलीदस्य पुरोऽप्सरायमाणे समुपस्थिते। तदा सहसा ते वीक्ष्य तत्सौन्दर्य्यमूर्च्छितोऽसौ अहो! सौन्दर्य्यम् अहो सौन्दर्य्यमिति असकृद्विजल्पन् किं युवामप्सरसौ स्थ इत्यूचिवान्।

यदाऽसौ तयोरग्रे विवाहप्रस्तावं चकार तदा ते ऊचतुः। आवां विनकासिमेनापवित्रीकृते स्वः। तस्य शिरश्छिन्नमानयतु तदावां त्वां

वरिष्याव:। इत्युक्तोऽसौ तथैवाकरोत्। यदा विनकासिमशिरश्चर्मनद्धं वगदादे समागतम्। तदा सूर्या पितुः भ्रातुश्च प्राणहरस्य प्राणान् हारयित्वा सन्तुष्टा भूत्वेवाच—अये खलीफा: वयं क्षत्रियकन्या: स्मः। अस्माकम् अङ्गस्पर्शम् कर्तुं न भवान् समर्थ इत्यभिधाय पूर्वसंकल्पानुसारमुभे अपि खलीफाभवनोपरि गत्वा प्रासादप्रान्ते स्थित्वा परस्परं विषसिक्ते खड्गे उरसि व्यासज्य पञ्चत्वमिते अभूताम्। प्रासादादधस्तयो: प्राणहीनौ देहौ पतितौ दृष्टौ।

खलीफाबलीदस्तु तयो: साहसं वीरत्वं च वीक्ष्य मूर्च्छितोऽभवत्। परिजनैरुपचरितो लब्धसंज्ञोऽभूत्। अद्यापि वगदादे तयोश्चरितम् गाथारूपे निबद्धं गीयते।

सूर्या च परमारा च दाहरस्य सुते उभे।
खलीफा-स्पर्शभीत्या ते प्राणान् विजहतुर्हठात्॥

सरदारबाई महावीरा

सुसुन्दरी सा सरदारवाई या वञ्चयद्राहमतं खलं तम्
अश्वावरोहा धृतसैन्यवेशा रात्रौ पवित्रैव पलायिताऽभूत्।

वैक्रमसंवत्सरस्य त्रयोदशशताब्दी-घटनेयम्। गुर्जरप्रान्ते रानीपुर नामकं स्वल्पं हिन्दूराज्यमासीत्। तत्रत्यो राजा खेमचन्द्रस्तस्य पुत्रो मूलराजश्चेति पितापुत्रौ दिल्ली-सम्राजोऽधीनत्वं बिभृत:। खेमचन्द्रस्तु वीरप्रकृति: क्षत्रिय: शासकोऽभूत्। पुत्रस्तु नीच-प्रकृतिर्मद्यपो द्यूतप्रियश्चासीत्। राज्ञ: खेमचन्द्रस्य दुहिता परमसुन्दरी सरदार वाई वीराङ्गना बुद्धिमती बभूव।

एकदा हस्तिनापुराधिपते: सेनापति: रहमतखां नामा यवन: सामन्तकरग्रहणाय गुर्जरप्रान्ते भ्रमँस्तत्र रानीपुरेऽप्यागतोऽभूत्। तत्र कस्मिंश्चिन्महोत्सवे सम्मिलितेषु पुरुषेषु पुरुषशून्ये नगरे द्वित्रै रक्षिभि: सह पर्यटन् रहमत: सरदारवाईं वीक्ष्य तत्सौन्दर्याकृष्टमना: तां ग्रहीतुं यत्नपरोऽभवत्। तदानीन्तु यवनशासकानामेषा सामान्यवार्ताऽसीद्

यद् हिन्दुकन्यानां सौन्दर्य्यं वीक्ष्य तासां स्वायत्तीकरणे वागुरोपप्र—क्षेप इति।

स हि यवनसेनापतिर्मूलराजं द्यूते पराजित्य ग्लहे सरदारवाई च विजित्य तस्या आनयनाय शिविकां प्रजिघाय। खेमचन्द्रः सरदार-वाईपिता परमक्रुद्धः शिविकां विनाश्य तदधिकारिणं च कारागृहेरुद्धं कृत्वा रहमतखानं भर्त्सयामास जानासि नहि, क्षत्रिया वयं यवनान् म्लेच्छान् स्पृशामोऽपि नहि, पुत्रीदानन्तु दूरकृत्यम् इति।

रहमतखां यवनोऽपि क्रुद्धतरो मूलराजमग्रे कृत्वा सैनिकैः सह गुप्तमार्गेण राजभवने प्रविवेश। तदानीं सहसा राजभवने प्रविष्टं ससैन्यं यवनसेनापतिं सैन्यपुरःस्थितं च निजपतिं वीक्ष्य चण्डीस्वरूपा मूलराज-पत्नी राजभवनस्थिताभिः स्त्रीभिः सह सैनिकवेशे यवनसैन्यैः सह योद्धुं सन्नद्धाऽभूत्। सा हि तैः सह युध्यमाना तत्सहायकं निजपतिमपि हत्वा बहून् यवनांश्च विनिपात्य निजपतिघातपापान्मुक्ता भवामीति ब्रुवती यवनसैन्यसमाक्रान्ता स्वोरसि खड्गनिपातं कुर्वती पञ्चत्वमाप। तस्याः श्वशुरः खेमचन्द्रोऽपि स्वसैन्यैरगणितयवनसैनिकान् विनिपात्य स्वम-हिष्या सरदारवाई-पुत्र्या च सह वन्दीबभूव। इत्थं हि राजभवनमध्ये तस्मिन् तुमुलयुद्धे सर्वेऽपि खेमचन्द्रसैनिकाः समाप्तिमुपगताः। यवन-सेनापतिः रहमतखां तान् त्रीनपि वन्दीकृतानादाय गुर्जरप्रान्तीय-यवन-सम्राड्राजधानीं पाटनपुरं जगाम।

मध्येमार्गं क्वापि विश्रामस्थले रात्रौ कामुकोऽसौ रहमतखलः सर-दारवाईपटमण्डपे जगाम। सा च सुस्वागतमित्युक्त्वा तं साधूपचचार। पूर्वं मातापित्रोर्मुक्तिपत्रं लेखयित्वा स्वहस्तेनैव तावन्मद्यं पाययामास यावता स तन्मदमत्तः क्षीवो जातः। पश्चाच्च पवित्रतमा सा तं पादप्रहारेण शय्याधः पातयित्वा तत्सैनिकस्यैव कस्यचन मद्यमदविलुप्तसंज्ञस्य परिच्छदं परिधाय पितरं मातरं च परिमोच्य ताभ्यां सहैव तस्यामेव रात्रौ सर्वान् सैनिकान् वञ्चयन्ती शिबिरादपाजगाम। प्रातरुत्थितो व्यपगतमदो रहमतखलः पश्चात्तापपरो हस्तमर्दनमात्रफलः स्वात्मानं शतधा निनिन्द।

'स[१]-मूलाऽप्यथ[२] सद्वृत्ता सरदारा तपस्विनी।
मुक्ता बुद्धिबलाज्जाता वर्तिका श्येनचञ्चुतः॥'
सङ्कटे पतिताः साध्व्यो नार्य्यः सद्वृत्तरक्षिकाः।
आत्मानं गोपयन्त्येव दशास्या[३]द्भूमिजासमाः॥

महावीरा ताजकुमारी

वीराङ्गना ताजकुमारिकाऽसौ
जघान शत्रून् विपिने व्रजन्ती।
पश्चाच्च दिल्लीश्वरसैनिकानां
शिरांसि भित्वा समरे ममार॥

कर्णपुरपार्श्वे किशोरा-राज्यनामकमेकं स्वल्पपरिमाणं हिन्दूराज्यमासीत्तस्य शासको महापराक्रमः क्षत्रियप्रकृति र्यथार्थनामा सज्जनसिंह आसीत्। तस्य लक्ष्मणसिंहनामा युवराजः पुत्रो ताजकुमारीनामा दुहिता चास्ताम्।

उभावपि युद्धविद्याविशारदौ क्षत्रियप्रकृती चास्ताम्। कदाचिदरण्ये मृगयाक्रीडया निर्गतौ सहसा कियद्भिर्यवनदुष्टै राक्रान्तौ। तदानीं युद्धकुशलिनावश्वारोहिणौ सशस्त्राविति कियतो हत्वा कियतश्च विद्राव्य गृहं परावृत्तौ। पश्चाच्च विद्रावितैरन्यथाप्रतिबोधितो दिल्लीश्वरः कुतुबुद्दीननामा सम्राट् ताजकुमारीजिघृक्षया सैनिकैः सह किशोराराज्यदुर्गं संरुरोध।

तत्र युद्धे विनिहतेषु सैन्येषु सस्वामिषु युध्यमानौ भ्रातरौ लक्ष्मणसिंहो ताजकुमारी च यदा वन्दित्वमुपनमन्त मात्मानं ददृशतु स्तदा

१.—मूलेन सहिता=समूला पित्रा मात्रा च सहितेति। २.—सत् = सुरक्षितं वृत्तं चरित्रं यस्याः सा सुरक्षितचरित्रैव। यथा श्येन-पक्षिणः चञ्चुतः मुखात् वर्तिका मुक्ता स्यात् तथैव सरदारवाई रहमतखानतः निर्गतेति पिण्डितोऽर्थः। ३. यथा दशास्याद् रावणाद् भूमिजा सीता आत्मानं रक्षितवतती तथैव सरदारवाई रहमतखांसकाशात् आत्मानं जुगोप।

ताजकुमारी भ्रातरमुवाच । भ्रातः ! क्रियतां स्वयं भगिन्या यवनहस्त-पातान्मोक्ष इति ज्ञात-स्वसृचेष्टो निजखड्गेनैव तां दिवङ्गतां विधाय कालरुद्रवदगणितान् यवनसैनिकान् विनिघ्नन् वीरगतिं जगाम ।

अद्यापि ताजकुमारी कर्णपुर-प्रान्ते देवीवत्पूज्यते । उत्सवादिषु तद्गाथागानं नरा नार्यश्च कुर्वन्ति । इत्यहो ताजकुमार्या वीराङ्गनात्वम्–

यावदेवंविधा नार्यः कीर्त्यन्ते भारते हृदा ।
तावदाक्रमितुं शत्रुः कः शक्तो भारतीभुवम् ॥

वीराङ्गना वीरवती

वीराङ्गना वीरवती देशद्रोहकरं पतिम्
खड्गेन युद्धे संहत्य स्वयं तदनुगा बभौ ।

विक्रमस्य चतुर्दशशताब्द्यां देवगिरिनामकं स्वल्पपरिमाणं हिन्दु-राज्यमासीत् । यस्य राजा रामदेवः स्वतन्त्रशासकोऽभूत् । तं वशे कृत्वा सामन्तकरं जिघृक्षया आक्रमको दिल्लीश्वरोऽल्लाउद्दीनः पराजितो भूत्वा दिल्लीं जिगमिषुरासीत् ।

परन्तु वीरवत्या भावी पतिः श्रीकृष्णरावनामा महाराष्ट्रयुवा तत्सैन्यमध्यगः 'त्वामेव देवगिरिशासकं विधास्यामीति' उल्लाउद्दीने-नाभिसन्धितः सर्वमपि स्वीयं भेदं प्रख्याप्य पुनस्तं संग्रामोन्मुखं चकार अल्लाउद्दीनेन सह युध्यमाना रामदेवसैनिकाः सर्वेऽपि सोत्साहा आसन् । कृष्णराव एवैकः शिथिलो युद्धेऽदृश्यत । तस्य तं भावं वीक्ष्य पूर्वतोऽपि ज्ञातमर्मा वीरवती तत्र संग्रामे स्वयं युध्यमाना सत्यवसरे अल्लाउद्दीन पक्षपातिनं कृष्णरावमभाषत देशद्रोही न मे पतिः' इति खड्गप्रहारेण तं धराशायिनं विधायान्यानपि यवनानगणितान् विनाशयन्ती वीरगतिं जगाम । इत्यहो क्षत्रियबालायाः स्वमातृभूमि-प्रेमा या देशद्रोहिणं पतिमात्मानं च मातृभूमिकृते संग्रामाग्नौ सञ्जुहाव ।

महावीरा रत्नावली

रत्नावली महावीरा प्रबुद्धा न्यायधर्मिणी ।
ररक्ष जैसलामेरं दुर्गं शत्रु-निरोधतः ॥

जैसलमेर नरेशो महारावलरत्नसिंहो राज्य-शत्रूणां दमनं कर्तुं यदा राजधानीतो बहिर्जगाम । तदा जैसलमेर-दुर्गरक्षणे प्रियपुत्रीमौरसीं रत्नावलीं नियुयोज । तदानीमेव दिल्लीश्वरस्य अल्लाउद्दीन-सम्राजः सेनापतिः मल्लिक-काफूरो महतीं सेनामादाय जैसलमेर-दुर्गं रुरोध ।

तदानीं सैव रत्नावली वीरवाला धैर्यशालिनी धनुर्बाणहस्ता दुर्गप्रासादे भ्रमन्ती सैन्यचालनं कुर्वती शत्रोरुपरोधस्य समुचित-मुत्तरमदात् ।

शत्रुर्दुर्गोपरोधेऽसाफल्यं पश्यन् कियतः सैनिकान् उपरि आरोढु मादिष्टवान् । रत्नावली तान् तप्ततैलपातेन विनाशयामास । सर्वथा-ऽसफलः काफूरः वृद्धद्वारपालमुत्कोचयामास । स हि परमविश्वस्तः सर्वं वृत्तं रत्नावल्यै न्यवेदयत् । सा च तद्द्वारैव काफूरसहितान् तान् बन्दिनश्चकार । इत्येवं सर्वथा स्वयमुपरुद्धः पङ्गुः शत्रु रल्लाउद्दीनः श्रीमते रत्नावलीपित्रे सन्धिपत्रेण सार्द्धं दूतं प्रैषयत् ।

एकस्मिन् दिने रत्नावली पश्यति स्म । यत् तत्पितृदेवः प्रसन्नवदनः स्वसैनिकैः सह दुर्गद्वारि समुपस्थितः । तदैव सेनापतिः काफूरो बन्दिभावान्मुक्तोऽवदत् । यदियं राजकुमारी रत्नावली महावीरा तु वरीवर्त्ति एव तथैव न्यायशीलाऽपि विद्यते । यतोहि अन्नसङ्कटे समुपस्थित इयं यथा स्वसैनिकेभ्यो यावदन्नं ददौ ततो द्विगुणितमस्मभ्यं ददाविति महती न्यायपरायणताऽस्याः । अहो आर्य्यकुमार्य्या न्यायमर्म-प्रियता ? यां शत्रवोऽपि प्रशंसन्ति ।

विद्युल्लता

विद्युल्लता राजकुमारिका दृढा
यशस्विनी देश-परायणा सती ।

देशद्रुहं वीक्ष्य मनोगतं पतिं
चिच्छेद खड्गेन कलेवरं निजम् ॥

यदा दिल्लीश्वरः सम्राट् अल्लाउद्दीनः द्वितीयवारं पद्मिनी-प्राप्ति-कामनया चित्तौरदुर्गमुपरुरोध । यदा च सर्वा अपि पद्मिनीप्रभृतयः क्षत्रियवीराङ्गना जौहरव्रते स्वात्महुतिं विदधुः । तदैव विद्युल्लता नाम्नी कस्यचन महाकुलीनस्य क्षत्रियस्य वीरबालिका समरसिंह-नम्ना सैन्ययुवकेन भाविपरिणयाऽसीत् ।

स हि युवा समरं विहाय कस्याञ्चन रात्रौ समेत्य तामुवाच विजयस्तु यवनसेनाया एव । अस्यां स्थितौ वयं किं कुर्मः । इति । तदानीं विद्युल्लता तं भर्त्सयन्ती युद्धायोद्दीपयामास ।

स हि कापुरुषो विना युद्धोपरामं विद्युल्लताप्राप्तिर्दुर्लभेति मत्वा शत्रुणा सह दुरभिसन्धिं कृत्वा चित्तौरदुर्गपराजयमकारयत् । शत्रुपक्षपातिनं तं विदित्वा भर्त्सयन्ती दूरत एवोवाच सा । त्वादृशेन देशद्रोहिणा कथं मम देसभक्ताया दाम्पत्यमिति त्वत्स्पर्शपापात् पूर्वमेवात्मानं विमोचयामीति पश्यत एव तस्य खड्गेन स्वोरस्थलं विदार्य्य प्राणान् विजहौ ।

भगवती वीरबालिका

पट्वी भगवती कन्या सरस्यात्मनिमज्जनात् ।
स्वधर्मं भ्रातरं स्वञ्चाप्यगौप्सीद् दुष्टशासकात् ॥

वैक्रमचतुर्दशशताब्दीघटनेयम् यद् औरङ्गजेब-(उरगजिह्व-) शासनकाले तदीयो विहारप्रान्तीयः शासको मिर्जा मुहम्मदीयो द्वित्रै रक्षिभिः सह नावमारुह्य गङ्गाविहारमकरोत् । तदानीं गङ्गातटे स्नान्तीः काश्चन बालिका ददर्श । तत्रैकामतिसुन्दरीं वीक्ष्य कामातुरोऽसौ तां स्वायत्तीं कर्तुं तत्रैव घट्टेऽवततार । यदा गुप्तगवेषणया होरिलसिंहस्य कनिष्ट-भगिनी सेति निश्चिकाय । तदा तं नावि समारोप्य निजराजधानीं नेतुमुद्यतोऽभूत् ।

तस्य कनिष्ठभगिनी सा भगवतीनामा बालिका शिक्षिता सुमेधाः स्वभ्रातरं शासकनिगृहीतं ज्ञात्वा मनसि तु अन्यथा किञ्चिन्निश्चित्य शासकं सूचयामास अहो मम तु भाग्यं यद्भवद्भवने मे वासः। त्यजतु मे भ्रातरं हिन्दुविवाह-रीत्या शिविकामधिष्ठायाहं भवद्भवने गमिष्यामीति।

तद्देशराजोऽसौ द्रुतं तां सर्वसाधनसम्पन्नां विधाय निजराजधानीं प्रापयितुं स्वमूलपुरुषानादिश्य स्वयं नावमारुह्य राजधानीं प्रतस्थे।

द्वित्रिदिनानन्तरं तैर्विनीयमाना सा शिविकारूढा भगवती यदा निजपितृपितामहनिर्मितस्य सद्दुर्गामन्दिरस्य महासरसः समीपमुपतस्थौ। तदाशिविकावाहकानुवाच। अहं स्वकुलदेवतां नमस्कृत्यैवाग्रे चलिष्यामीति दुर्गामन्दिरं मां नयन्तु। शासकपुरुषै रनुमोदिता सा भगवती दुर्गामन्दिरमुपेत्य कृत-देवी-पूजा तत एवोत्प्लुत्य तस्मिन् महासरसि निममज्ज शाशकपुरुषा रक्षकाः शिविकावाहकाश्च चकित-चकिताः किंकर्तव्यविमूढा एव तस्थुः।

जालपातनया यदा भगवती-शवं ते न प्रापुः। तदा होरिलसिंहः स्वयं जालमपातयत्। तस्मिञ्जाले भगवती शवमासक्तं बहिराबभूव। होरिलसिंहः स्वसुः शवं तत्रैव मन्दिरपार्श्वे दाहयामास, तत्स्थाने भगवती-मन्दिरं निरमापयत्। अद्यापि तत्र जनमेला भवति जनाश्च समेताः श्रीदुर्गादेव्यादर्शनेन सहैव भगवतीप्रतिमामपि वीक्ष्यात्मानं धन्यं मन्यन्ते।

पद्मा वीर-बालिका

पद्मा कृषक-पुत्री या सूक्ष्मा वीरबालिका।
भ्रातृ-स्नेहपरा भूत्वा सैन्यवृत्तिं समाचरत्॥

कम्पनीशासनप्रारम्भे भोपालराज्ये कस्यचन निर्धन-कृषाणस्य गेहे पद्मेयं जनुरलभत। तस्याः पितरौ बाल्ये विपन्नौ। सा भ्रात्रा पालिता। तस्या भ्रातापि कुमार एवासीन्। परन्तु स साहसी वीरोऽ-

प्यासीत् । शस्त्रशिक्षायां निपुणः स्वसारमपि शस्त्रशिक्षां ग्राहितवान् । एवमुभौ शस्त्रादिशिक्षाविशारदौ पितुर्धनेनैव जीवनं चालयन्तौ ऋणग्रस्तौ जातौ । तत्कालीन-प्रथानुसारं भोपालराज्यन्यायालये ऋणदातोत्तमर्णोऽभियोगं चालयित्वा जोरावरसिंहं पद्माभ्रातरम् कारागारे वन्दिनमकारयत् । तेन पद्मा भृशं दुःखिता भूत्वा पुरुष-सैनिकवेशं विधाय ग्वालियरनगरं गत्वा तत्र गोरण्डैः सह प्रवृत्ते संग्रामे सैन्यवृत्तिं कर्तुं ग्वालियरनरेशस्य दौलतराव-सेन्धियामहोदयस्य पार्श्वे पद्मसिंहनाम्ना प्रार्थनापत्रं ददौ। सैन्यपरीक्षायां चोत्तीर्णा सैनिकत्वे गृहीता । तत्र युद्धे सा कार्य्यपाटवात् युद्धकौशलात् साधारण-रक्षिपदादुच्चतरं हवलदारपदमधितष्ठौ । राजमान्या च याता । कदाचित् पद्मसिंहोऽयं न पुमान्, नारीति भेदोद्घाटने जाते । ग्वालियर नरेशः सेन्धिया दौलतरावः पूर्वत एव तत्पराक्रमप्रसन्नः स्त्री सेति आश्चर्यमग्नः पद्मसिंहमेकान्ते समाहूय पुरुषवेशधारणे कारणं पप्रच्छ। पद्मा-सर्वमपि भ्रातुःकारागृहवासादिकं स्पष्टं निःसङ्कोचं सैनिकस्वरे व्याजहार । तेनापि परमप्रसन्नो राजा सर्वमपि ऋणद्रव्यमुत्तमर्णाय दापयित्वा तद्भ्रातरं जोरावरसिंहं वन्दिगृहादानाय्य स्वसेनायां तद्योग्यं शोभनं पदं ददौ । पद्मायाः पाणिग्रहण-संस्कारश्च केनापि अपरिणी तेन सेनापतिना कारयामास ।

चञ्चलकुमारी तेजस्विनी वालिका

उग्रजिह्वं तिरस्कृत्य याप्यात्मानमगोपयत् ।
सा चञ्चलकुमार्यासीद्वन्दनीयार्य-वालिका ॥

एका यवनी वृद्धा मोगलसम्राजां हिन्दूराजानाञ्च प्रतिकृतिचित्राणि (फोटो) विक्रीणाना रूपनगरे तत्रत्यमहाराजस्य विक्रमसिंहस्य-सोलङ्कीमहोदयस्य राजभवनं जगाम । तत्र राज्ञस्तस्य राजकुमारी-चञ्चला नाम्नी राणाप्रतापस्य करनसिंह-राजसिंह-प्रभृतीनां चित्राणि तु जग्राह । परन्तु यवनसम्राजां तथा मानसिंह-जयसिंह-प्रभृतीनां

चित्राणि तु निदन्ती तत्याज। ततः सा वृद्धा उग्रजिह्वस्य (औरङ्ग-जेवस्य) चित्रं दर्शयन्ती उवाच। अस्य साम्प्रतिकसम्राजो दर्शनं कृत्वा शिरो नमयत यूयम्। चञ्चलकुमारी किञ्चिदुद्दीप्ता जगाद। इमं दुष्टं वीक्ष्य शिरो नमयिष्यामि, आहो पादप्रहारं दास्यामि इत्युक्त्वा पादेन तच्चित्रं किञ्चित्पस्पर्श। तदा सा वृद्धा त्वमेवं वदसि। सम्राट् यदि अश्रोष्यत् तदा रूपनगरस्य का दशाऽभविष्यत्। एतदनन्तरं चञ्चलकुमारो क्रुद्धा भूत्वा सखीरवादीत्। सर्वा अपि यूयं अस्य दुष्टस्योपरि एकमेकम् पादप्रहारं दत्त। सा वृद्धा तु कृत-मौना ततो विक्रीतचित्राणां मूल्यं तच्चित्रं च गृहीत्वाऽपससार। परन्तु दिल्लीं गत्वा न जाने किं किं जगाद। यतो दिल्लीश्वरसैनिका रूपनगरं ध्वंसयितुं ततश्चलिताः। प्रथममेव सम्राज उग्रजिह्वस्य दूत आगत्य विक्रमसिहमुवाच। त्वं स्वदुहितरं दिल्लीश्वराय देहि नोचेन्नगरमिदं विनष्टं स्यादिति। विक्रमसिहस्तु दुर्बलो राजा नगरविनाशभयात् दूतोक्तं कर्तुमुद्यतोऽभवत्। चञ्चलकुमारी बुद्धिमती वालिका त्वरितं पत्रं लिखित्वा राणाप्रतापसिंह-वंशोद्भवस्य राणा-राजसिंहस्य पार्श्वे दूतं प्रजिघाय। राणामहोदयस्त्वरितं स्वसैनिकान् सन्नद्धान् चकार। दूतश्चादिशत्। चञ्चलकुमारीं ब्रूहि निश्चिन्ता सा स्यादहं तां रक्षिष्यामि।

इतो दूतः परावृत्य विक्रमसिहाय सन्देशं यावदश्रावयत्। तावत्तु चञ्चलकुमारीं शिविकामारोप्य दिल्लीश्वरसेनापतिः सुप्रसन्नः प्रस्थि-तोऽभवत्। परन्तु स यावदरावलोनाम्नीं सङ्कीर्णां पर्वतघाटीं शमुप-स्थितोऽभूत्। तावत् तत्रोपरित उभयतोऽपि पर्वतशिखरतो वृहदाका-रान् प्रस्तरसङ्घान् वर्षयन्तो राणाराजसिंहसैनिका गमनागमनस्य मार्गमेव निरुद्धवन्तः सहस्रशस्तु तत्रैव विचूर्णिताः। अन्ये पलायिताः। एवं बहुषु विनष्टेषु शेषेषु च पलायितेषु शत्रुसैन्येषु, राजसिंहः सैनिकैः स्वैः सह समुपेत्य चञ्चलकुमारीमुवाच। सम्प्रति भवती मत्सैन्यैः सुर-क्षिता स्वपितृगृहं गन्तुमर्हति। परमविदुषी चञ्चलकुमारी राज-सिंह-

चरणदासीत्वमेव ययाचे। इति दिल्लीश्वरविक्रमसिंहयोर्भेदं जानानो राणा तद्याञ्चामुररीकृत्य चञ्चलकुमारीं मेवाडराजमहिषीं चकारेति सर्वविदितो वृत्तान्तः।

मरीचिः सिक्किमस्था वीरबालिका

गरीचिर्वालिका दिव्या सिक्किमस्था सुनिर्भया
अहन् दुर्भावगोरण्डमसिपुत्र्या शिरःस्थया।

भारतस्योत्तरस्यां दिशि नेपालभूटानयोर्मध्ये सिक्किमदेशोऽस्ति। तत्रत्यशासनाधिकारिणो यशपालसिंहस्य पुत्री मरीचिरतिसुन्दरी वीरस्वभावा भगवद्भक्ताऽभूत्। सिक्किमदेशस्था अपि नार्यो वीरस्वभावा भवन्ति। ता हि स्वकेशवेशेऽसिपुत्रीमासज्यारण्ये गच्छन्ति, पुष्पफलादिकमानयन्ति। सङ्कटे तयैवासिपुत्र्या दुष्टसत्वानपि विनाशयन्ति। मरीच्या अपि नियम आसीत्। सा हि केशवेशेऽसिपुत्रीमासज्यारण्यं गच्छति। ततो यदा कदा पुष्पफलादिकमानयति स्म।

एकदा कनिष्ठया सह मरीचिर्वनं गता, कस्यचन वनाधिकारिणो गोरण्डस्य दृष्टौ पतिता। स च तदीय-सौन्दर्यं वीक्ष्य दुष्टभावापन्नोऽवदत्। त्वं मया सह मद्गृहं चलेति। सा हि मरीचिरुद्दीप्ता भर्त्सयन्ती तमुवाच पुनरेवं वदिष्यसि चेत् जिह्वां ते छेदयिष्यामि। स तु अधिकारमदमत्तस्तस्या हस्तं जग्राह। सा हस्तं कृषन्ती सीमन्ताच्छुरिकां निःसार्य द्रुतमेव तदुरसि दृढं बलादासञ्जयत्। स तु तत्रैव भूशयोऽभूत्। सा मरीचिः स्वकनिष्ठया सह यथापूर्वम् निर्भया गृहमाजगाम। तस्याः कनिष्ठा सर्वमितिवृत्तं स्वपित्रे न्यवेदयत्।

तदनन्तरं बहवोऽश्वारोहिणो गोरण्डास्तत्रोपस्थिताः। सा मरीचिः पुनरपि तामेवासितुत्रीमादाय गृहाद्बहिर्भूयोवाच। कथं भवन्त इहोपस्थिताः। अहं सर्वान् अपि अनयैवासिपुत्र्या विनाशयिष्यामि। योऽपि मां दुष्टभावेन द्रक्ष्यति। इत्यादि तस्या निर्भयं वचनं श्रुत्वा ज्ञातसारास्ते यथागतं निवृत्ताः। तस्याः पिता तु पुत्र्या ओजस्वितां दर्शं दर्शं बहु प्रसन्नो भूत्वा तां समशामयत्। इति।

जेना सा वीरबालिका

जेनानाम्नी महावीरा नागलोकस्य बालिका
अद्भुतं साहसं कृत्वा दुर्गरक्षामचीकरत् ।

नागलोके (अमेरिकायाम्) मूलनिवासिनो विद्रोहिणोऽभवन् । गोरण्डैः सह युद्धे त एव प्रबला अभवन् । तदा गोरण्डा दुर्गाश्रिताः । परन्तु भुसुण्डी-साधनं बारूदद्रव्यन्तु ते बहिरेव पलायनत्वरायां विस्मृतवन्तः । ततः को नयेत् । नेतुं यो गमिष्यति । स एव विद्रोहिभिर्घातितः स्याद् । इत्येवं व्यतिकरे जेना सेनापतिपुत्री साहसशीला तद् द्रव्यमानेतुं सन्नद्धा समजनि । दुर्गद्वारमुद्धाटच गत्वा सर्वानपि विद्रोहिणो वञ्चयित्वा तेषां शस्त्राण्यपि विफलीकृत्य बारुदद्रव्यमानीतवती । यद्बलेन रात्रौ आक्रामकान् विद्रोहिणो गोरण्डाः पराजयन्त । इत्यहो जेनायाः साहसम् ।

क्रान्तिकारिणीनामार्य्यमहिलानां चरित-संक्षेपः

महिलाक्रान्तिकारिण्यो बहवोऽसूअहुर्मुदा ।
राष्ट्रं[१] भारतमुन्मोक्तुं रौरवादाङ्लशासनात् ॥ १ ॥
तत्र प्रीतिलतादेवी - प्रभृतीनां क्रमादहो ।
चरितं लिख्यते दिव्यं संक्षेपादिह वैभवे ॥ २ ॥

प्रीतिलता-चरितम्

सा सुन्दरी प्रीतिलता मनस्विनी दिव्याम्बरा वीरवरा सुधास्वना ।
नेतृत्वकृत् क्रान्तिकृतां विदेशिग-क्लबोपरोधे विषपानतो मृता ॥३॥

---

१. गोरण्डशासनकाले भारते क्रान्तिदले सम्मिलिता बहवो नवयुवका वयस्काः कुमार्य्यो वधूटचश्चार्य्यमहिला भारतं स्वतन्त्रं कर्तुं सदस्य-रूपेण यत्नं विदधुस्तासामेवेह कियतीनां चरितसंक्षेपो लिख्यते तत्र । प्रीतिलतायो वङ्गीयायाश्चरितमिदं सुस्पष्टम् ।

द्वात्रिंशदधिकोनविंशस्येशवीयाब्दस्य (१९२२ ई०) चतुर्विंशदिनाङ्के रात्रौ १० दशवादनवेलायां चट्टग्रामीणपर्वतस्थल्यां विद्यमानस्य गोरण्डीय-संस्थानस्य (यूरोपियन इन्स्टीट्यूट नाम्नः) उपरि वर्मारिवाल्वर-प्रभृति-साधनैराक्रमणे नेतृत्वं कुर्वन्त्याः प्रीतिलता आदेदारमहोदयायाः कुमार्य्याः शव एवोपलब्धोऽभूत् । न तु जीवन्ती सोपलब्धेति संक्षेपः ।

तत्राक्रमणे सर्वेऽप्यन्ये क्रान्तिकारिणः सुरक्षिता एव परावृत्ता गोरण्डाश्च बहवो निहताः । इयं हि गोरण्डैः सह युध्यमाना तेषां भुशुण्डीगुलिकया निहता सती 'ते मां जीवन्तीमेव न गृह्णीयुरिति' पोटेशियम शाइनाइड-भक्षणेन तदानीमेव भूमौ पतिताऽत्मनः प्राणान् विजहौ ।

इयं वी. ए. परीक्षोत्तीर्णा क्रान्तिकारिणः सूर्य्यसेनस्य शिष्या । पूर्वत एवास्या अन्वेषणे रक्षिणो व्यापृता आसन् । परन्तु न तैरियमुपलब्धा । अन्विष्यमाणेयं कदाचिच्चट-ग्राममण्डलस्य कस्मिश्चिद्ब्राह्मणनिलये निलीयमाना रक्षिभिर्ज्ञाताऽपि, तैः सह युध्यमाना सुरक्षितैव निष्क्रान्ताऽभूत् । इत्थं साहसिकेयं दिव्या देवी, यस्याश्चरितसंक्षेपोऽयम्–

मान्या प्रीतिलता देवी दर्शनीयाऽतिसुन्दरी ।
वीर-वेषधरा राष्ट्रे सुनेत्री कान्तिकारिणी ॥

कल्पनादत्ता-चरितम्

वीरस्त्री कल्पनादत्ता सुमहाक्रान्तिकारिणी ।
प्रसह्य-वित्ताहरणाभियोगे वन्दितां गता ॥

एवं हि कल्पनादत्ता नामिका कर्मठ-क्रान्तिकारिणी कुमारिकार्य्यमहिला चट्टग्रामाधिवासिनी वङ्गीया सुशिक्षितासीत् । या हि (१९३३) त्रयस्त्रिंशदधिकोनविंशे खीष्टाब्दे फेब्रुअरीमासीय-षोडशदिनाङ्के १० दशवादने रात्रौ गौरालाग्राम्यगुप्ताश्रमे निवसत्सु क्रान्तिकारिषु तदन्वेषकाणां रक्षिणां भुशुण्डीगुलिकां वञ्चयित्वाऽपि विनिर्गता

क्वापि अन्यत्र स्थाने रक्षिभिः सह युध्यमाना गुलिकासमाप्तौ निगृहीताऽभूत्। ततश्च चट्टग्रामीयतृतीय प्रसह्य-वित्ताहरणाऽभियोगे (डकैतीकेस-मध्ये) आजन्म कालापानीकारागारदण्डेन दण्डिता। तत्रैव निधनङ्गतेयं महासाहसा दिव्यदेवी पुण्यस्मृतिः।

यस्या नाम स्मरन्त्योऽद्य भारतीयाः कुमारिकाः।
मन्यन्ते पावनं स्वीयमात्मानं मानवाः समे। २।

अज्ञातबालिका-चरितम्

अनामा महिला काचित्प्रत्युत्पन्नमतिः सुधीः
याऽरक्षीत्प्रतुलं चन्द्रं स्वगेहे रक्षिसङ्कटात्। १।

देहरादूननगरे प्रतुलचन्द्रगाङ्गूलीनामा युवकः अनुशीलनदलस्य नेताऽसीत्। स हि स्वगृहे एव तदन्वेषणपरै रक्षिभिरकस्मात् सर्वतः समाक्रान्तः समजनि। तदानीं 'स किं करोतु' इति विमर्शयन् स्वगृहोपरि कुट्टिमात् कुट्टिमान्तरमाक्राम्यन् कस्यचन गृहाङ्गणे प्रोच्छलाञ्चकार। तत्रैका कुटुम्बिनी एकाकिनी गृहेऽभूत्। अन्ये बहिर्गता अभूवन्। साहि हठात् प्राङ्गणेपुरुषान्तरमुपस्थितमुपलभ्य भयाच्चीत्कर्तुं प्रवृत्ता। तावत् प्रतुलचन्द्रोऽहं रक्षिभिराक्रान्तोऽधुनेति सङ्केतयति तस्मिन्। सा हि पूर्वतो ज्ञातसारा बाला झटिति तं कस्मिंश्चित् प्रकोष्ठे सङ्गोप्य द्वारोपस्थितं रक्षिसङ्घं गृहे प्रवेष्टुकामं बहिरागत्य बहुसाहसातिरेकात् भर्त्सयामास।

सा—किमिदं चौरगृहं यद्भवन्तो गृहे प्रविशन्ति?
रक्षिणः—वयम् प्रतुलान्वेषकास्तव गृहेऽस्तीति सन्देहोऽस्माकम्।
सा—नेह प्रतुलः फतुलस्तिष्ठति। गृहमिदममुकस्य मम श्वशुरस्येति जानन्तु।

स हि कोऽपि शासनाधिकारीति तन्नाम श्रुत्वा रक्षिणोऽपि भीतभीता बलात्प्रवेशं विहाय परावृत्ताः। गतेषु तेषु सा स्वीयाश्वरथेन सङ्गो-

पितं प्रतुलचन्द्रं तन्निर्दिष्टस्थाने प्रापयत्। ततः समयेन समागतौ तस्याः पतिः श्वशुरश्च श्रुत्वा तदीयं साहसं भृशं प्रशशंसतुः।

एवं हि बहवो नार्य्यः कुमार्य्यश्चापि भारते,
क्रान्तिकारिदले स्थित्वा ररक्षुर्भारतं हृदा।

क्रान्तिकारिणीनां सूचिका

बहवोऽप्यभवन् बाला वध्वश्चेह पूर्वतः।
याः स्वजीवनसर्वस्वं जुहुवुर्भारतोद्धृतौ॥

काकोरीकाण्डे मन्मथनाथगुप्तस्य पितृव्यपुत्री साक्षाद्भागं गृहीतवती। बनारसबमकाण्डे निगृहीतापि प्रमाणाभावाद्विमुक्ताऽभूत्। तत्रैवाभियोगे निगृहीता मृणालिनी देवी सप्तवर्षावधि कारावासदण्डं भुक्त्वा मुक्ताऽजनि। इत्यादिबहूनां वीराङ्गनानां भारतराष्ट्रस्वातन्त्र्ये साहाय्यकरणं भारतीयार्यमहिलानां महद् गौरवं बिभर्ति। किमासां वीरबालिकानां वीरवधूटीनां च नामानि भारतीयेतिहास-पृष्ठतः कदाऽपि विस्मृतानि स्युः?

यावद्धि भारतं राष्ट्रं पृथिव्यां प्रथितं भवेत्।
तावदासाङ्कुमारीणां वधूटीनां यशोऽमृतम्॥ (१)

१—तादृशी हि विख्यविनी पारुल मुखर्जी दृढ़तया क्रान्तिकार्यं कुर्वाणा ऊनविंशतिशत-षट्त्रिंशदब्दीये जनवरीमासीयविंशे दिनाङ्के टीटागढ़ीय-गुप्तकेन्द्रे निगृहीता तत्केन्द्रीयषड्यन्त्राभियोगे ऊनत्रिंशत् क्रान्तिकारिणां मध्ये साऽपि पञ्चवर्षीय-कारावासदण्डेन दण्डिताऽभूत्।

२—सुहासिनी गाङ्गूली ('पुण्टू दी' इत्याख्यया ख्याता) स्नेहमयी मातृसमा क्रान्तिकारिणामाश्रयदा चन्दननगरे रक्षिभिर्निगृहीतेषु क्रान्तिकारिषु इयमपि निगृहीता। क्रान्तिकारिणामाश्रयदानदोषेण वर्षद्वयं कारावासमपि प्रापिता। ततोऽपि बहुवर्षावधि स्वगृहेऽपि रक्षिरक्षिता (नेत्रबद्धा-नजरबन्द) आसीदिति।

---

(१)—पाञ्चजन्यपत्रस्य क्रान्तिस्मरणाङ्कतो गृहीतम् इति वृत्तम्। अग्रेऽति संक्षिप्तं नामादिक-मात्रं प्रदीयते।

३—श्रीमती लीलावती नाग एम० ए०, डिप्टीमजिस्ट्रेट् श्रीगिरीशचन्द्रनागस्य दुहिता ढाकानगरे लीलावतीविद्यालयं कमरुन्निशाबालिकाविद्यालयं च संस्थापितवती 'दीपावलीसङ्घ' इति-नाम्नीं नारीणामभ्युदयकरीं संस्थामप्येकां चालयामास। 'जयश्री' नामिकाया मासिकपत्रिकायाः सम्पादिका ग्रामं ग्रामं पर्यटन्ती महिलासु आदर्शवादं प्रचारयामास।

त्रिंशदधिकोनविंशे खीष्टाब्दे दिसम्बरमासीयविंशे दिनाङ्के निगृहीता ८ अष्टवर्षावधि-कारावासे निबद्धाऽष्टात्रिंशत्तमे खीष्टाब्दे मुक्ताऽभूत्।

४—रेणुकासेन एम० ए० डलहौजी स्क्वायरबमकाण्डे निगृहीता मासं यावत्कारावासे निबद्धा पश्चान्मुक्ताऽभूत्। पुनरपि लीलावती देव्या सह निगृहीता वर्षं कारावासं भुक्त्वा मुक्ताऽजनि।

५—लीलाकमाल वी० ए० महाराष्ट्र-निवासिनी आशुतोषकालेजमध्ये पठन्ती ग्रीण्डले वैङ्कसम्बन्धाभियोगे निगृहीता समजनि। प्रमाणाभावाद्विमुक्ता।

६—इन्दुमती सिनहा चट्टग्रामस्थ-गोपाललालसिनहापुत्री षड्मासं कारागारे निरुद्धा पश्चान्मुक्ताऽभूत्।

७—अमितासेन-कुमारी १६३४ चतुस्त्रिंशदधिकोनविंशतितमाद्वर्षादष्टात्रिंशदधिकोनविंशतितमावधि कारागारे निरुद्धाऽसीत्। पश्चाद्विमुक्ताऽजनि।

८—कल्याणी देवी एम० ए० द्वात्रिंशदधिकोनविंशे खीष्टाब्दे निजभवने वालीगञ्जस्थे भुशुण्डीप्राप्तिकारणान्निगृहीता पश्चात्प्रमाणाभावाद्विमुक्ताऽभूत्।

९—कमला दासगुप्ता वी० ए० तथा वीणादासश्चेत्युभौ निगृहीतौ कारागारे निरुद्धौ जातौ।

१०—सुरमा दासगुप्ता वी० ए० सार्द्धवर्षं कारावासं भुक्तवती।

११—उषामुखर्जी वर्षत्रयं कारावासं भुक्तवती।

१२—सुनीतिदेवी वर्षद्वयं कारावासं भुक्तवती।

१३—प्रतिभाभद्रा वी० ए० पञ्चवर्षं कारावासं भुक्तवती ।

१४—सरयूचौधुरी टीटागढ़काण्डे निगृहीता वर्षचतुष्टयं कारागारे निरुद्धाऽसीत् ।

१५—इन्द्रसुधाघोषा वर्षचतुष्टयं कारागारे निरुद्धाऽभूत् ।

१६—प्रफुल्लनलिनी (ब्रह्मो) त्रिपुरा मजिष्ट्रेटहत्यायां निगृहीता कारागारे एव पञ्चत्वं गता ।

१७—हेलेनावाला वी० ए० स्वमातुलेन प्रफुल्लकुमारदत्तेन सहैव निगृहीता बहुवर्षावधि उभावपि कारागृहस्थौ आस्ताम् ।

१८—आशा दासगुप्ता पञ्चवर्षाणि कारावासमुषितवती ।

१९—अरुणा सन्याला तथैव कारावासमुवास ।

२०—सुषमादासगुप्ता बहुवर्षाणि गृहे दृष्टिरक्षिताऽसीत् ।

२१—प्रमिला दास गुप्ताऽपि वीणादासान्विता कारावासमुवास ।

२२—प्रभाभद्रा प्रतिभाभद्रानुजा बहुवर्षाणि कारागारे निरुद्धाऽसीत् ।

२३—शान्तिकला (सेन) वर्षद्वयं कारागृहे निरुद्धा ।

२४—शान्तिसुधा घोषा एम० ए० विक्टोरियाकालेजस्याऽध्यापिका ग्रीण्डले वैङ्ककाण्डे एव निगृहीता वर्षचतुष्टयं कारावासमुवास ।

२५—विमलप्रतिभादेवी त्रिंशदधिकोनविंशे खीष्टाब्दे विंशे दिनाङ्के जूनमासे निगृहीता ७ सप्तवर्षाणि कारावासमुवास ।

२६—ममतामुखर्जी कुम्मिलानगरे दृष्टिरक्षिताऽसीत् ।

२७—हास्यवाला देवी वारिसाले स्वभवने दृष्टिरक्षिताऽभूत् ।

२८—सरोजवाला (नाग) टीटागढ़ीयास्त्रकाण्डे निगृहीता मुक्ताऽपि बहुकालावधि कारागृहे एव रक्षिरक्षिताऽभूत् ।

२९—देवीमायागुप्ता प्रभृतयोऽन्याश्च बहवो देव्यः सन्ति । याः क्रान्तिदले सम्मिलिता हिंसया भारतं गोरण्डशासनतो मुक्तं कर्तुं

प्रयतमाना आसन् । यदा हि महात्मगान्धिनोऽहिंसामार्गतः कांग्रेसान्दोलनं महता वेगेन प्रारब्धमभूत् । तदा क्रान्तिकारिण्यो महिलाः पुरुषाश्चापि तत्राहिंसामार्गेऽविश्वसन्तोऽपि परीक्षाधिया सम्मिलिता अभवन् । ईश्वरकृपया तत्रापि सुभाषबोसोद्योगजनित-सैन्यविद्रोह-प्रधानकारणाद्भारतं स्वतन्त्रमभूदिति रहस्यम् ।

महिला क्रान्तिकारिण्यः प्रसङ्गादिह सूचिताः ।
खुदीरामादयः सर्वे पुरुषा नेह कीर्तिताः ॥
इतिहासोऽमरस्तेषां मौनिनां क्रान्तिकारिणाम्,
स्वतन्त्रे भारते स्थाता यावच्चन्द्रदिवाकरौ ॥

इति शुभम्भूयात् ।

—:*:—

स्त्रीधर्म-प्रश्नोत्तरी

विदुषी प्रश्नकृद् वाला प्रतिभा चोत्तरप्रदा।
प्रश्नोत्तरस्वरूपेण स्त्रीधर्मोऽभिहितो मनाक् ॥

विदुषी—भगिनि प्रतिभे मां त्वं स्त्रीधर्मान् बोधयाऽधुना।

प्रतिभा—स्त्रीणां कृते मत्तो मुख्यम् धर्मं पातिव्रतं शृणु।

विदुषी—स्वतन्त्रतायुगेऽस्मिन् नारीव्रत्यं कथं नहि।

प्रतिभा—अहो नारीव्रत्यं तु सर्वदैवास्ति। स्वतन्त्रतायुगे एव कथं? सर्वदैव पुरुषाणां कृते एकपत्नीव्रतम् स्त्रीणां कृते पाति-व्रत्यम् अस्तीति जानीहि।

विदुषी—परन्तु सम्प्रति पुरुषास्तु नारीव्रत्यं नाचरन्ति।

प्रतिभा—नाचरन्ति चेत्तेन किं स तेषां धर्मो न स्यात्? सदाचारी पुरुषः स्वकर्तव्य करोत्येव। पश्य मर्य्यादापुरुषोत्तमो रामः सीतात्यागेऽपि, तस्याः स्वर्णप्रतिमां विधायाश्वमेधयज्ञं कृतवान् एकपत्नीव्रतं पालितवान्न वा?

विदुषी—अस्तु—स्वधर्मपालनं कर्तव्यमित्येव ते तात्पर्य्यम्।

प्रतिभा—अथ किम्—स्वे स्वे कर्म्मण्यभिरतः संसिद्धिं लभते नरः।

विदुषी—तर्हि स्त्री केवलं पातिव्रत्यमेव कुर्य्यान्नान्यत् किञ्चित्?

प्रतिभा—अथ किम्—नास्ति स्त्रीणां पृथग् यज्ञो न व्रतं नाप्युपोषणम् पतिं शुश्रूषते येन तेन स्वर्गे महीयते। इति पतिभक्तिरेव मुख्यो धर्मः स्त्रिया मनुनाऽभिहितः।

विदुषी—किम् नारी ईश्वरभक्तिमपि न कुर्य्यात्?

प्रतिभा—अयि सरले! स्वकर्तव्यपालनमेव ईश्वरभक्तिः। इत्युक्तमेव मया 'तस्मिन् परमगुरौ सर्वक्रियाफलानां समर्पणम् ईश्वरप्रणि-

धानम्' इत्येव ईश्वरभक्तिरित्यनुशासनं योगशास्त्रस्य। इत्यपि जानीहि।

विदुषी—अद्यत्वे हिन्दुस्त्रियः पीरपैगम्बरचैत्यपूजनादिकमपि कुर्वन्ति ? किमिदं तासां कर्म साधु ?

प्रतिभा—हा हा इदन्तु तासां महागर्हितं कर्म्म। नेदं कदापि कार्यम्। इदं हि स्त्रीशूद्रकल्कनं कथ्यते। मन्दबुद्धीनां स्त्रीशूद्राणां वञ्चनार्थं धर्मध्वजिन इत्थमेव भूतप्रेत-ब्रह्मपिशाच-डाकिनी-शाकिन्यादि-पूजनच्छद्मना द्रव्यमपहरन्ति मन्दबुद्धीनामन्धश्रद्धालूनां तेषाम्। स्त्रीणान्तु, चरित्रमपि पातयन्ति, शीलभङ्गं कुर्वन्ति। तदेव दर्शं दर्शं विधर्माणो यवनादयोऽपि भारतेऽत्र पीर-पैगम्बरतकियामशान मज्जितकब्रपूजनादिकं छद्म-दम्भकृत्यं चालयित्वा स्त्रीवर्गतो द्रव्य-मपि गृह्णन्ति, तासां चरित्रपातमपि कुर्वन्ति। स्वतन्त्रभारतेऽद्यापीदं कुकृत्यं चलति। इदन्तु सर्वं शासनतः प्रत्येकराज्ये विधान-सभातो नियमं निर्माप्य स्त्रीशूद्रकल्कनरूपं कुकृत्यं विलोपनीयम्। स्वतन्त्रभारते तु कुकृत्यस्यास्य नामापि न श्रूयेतेत्यलम्। अत एव शास्त्रे—

"जपस्तपस्तीर्थयात्रा प्रव्रज्या मन्त्रसाधनम्।
देवताराधनं चैव स्त्रीशूद्रपतनानि षट्॥"

इत्यादि वाक्यैः स्त्रीशूद्रकल्कनरूपमित्यादि छद्मकर्म निषिद्धं विद्यते।

विदुषी—तर्हि मन्त्रयन्त्रतन्त्रौषधादि कर्मास्माभिः स्त्रीभिर्न कर्तव्यं किम् ?

प्रतिभा—अत्र कर्मणि वञ्चना भवतीति ज्ञात्वा सावधानं विश्वस्त-जनैरेवेदं कृत्यं कारयितव्यं। नहि यत्र तत्र यैः कैश्चिदपि धूर्तं र्वकवैडालव्रतैर्द्विजैरन्यैर्वा विधर्मभिरिति। सर्वथा सर्वदा सावधान-ताऽपेक्ष्यतेऽत्रेति विभावनीयम्। अस्मिन् कर्मणि वञ्चनापि भवतीति ज्ञातव्यम्।

विदुषी—तर्हि विश्वस्तजनैः कृतन्तु मन्त्रयन्त्राद्यौषधं कर्म सफलं भवति। इति तवाभिप्रायः।

प्रतिभा—अवश्यं मन्त्रा यन्त्राणि औषधं ग्रहनिमित्तं च रत्नधारणं सर्वमेव कृत्यं सफलम् भवति ।

'मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्याद्'

इदं गौतमीयं न्यायसूत्रम् । पाणिनेः षट्पद-सूत्राणि 'लः कर्मणि च भावे चाकर्मकेभ्यः ३।४।६६' इत्यादीनि वृश्चिकदंशे सफलानि दृष्टानि सन्ति । सर्पदशने सर्पमन्त्राश्च सफला भवन्त्येव । एवं हि जन्मकुण्डली-हस्तरेखादिकं सर्वमेव सफलमस्ति । परन्तु तत्र तामसा दम्भिनोऽनधिकारिणः प्रविश्य तत्सर्वं विनाशयन्ति । तद्व्याजेन मन्दबुद्धीन् स्त्रीशूद्रादीन् वञ्चयित्वा द्रव्यमुपार्जयन्ति । इत्यलम्—

विदुषी—कथं त्वमिदं जानासि ?

प्रतिभा—अहं संस्कृतभाषां पठितवतीति शास्त्राणि अधीत्य जानामि ।

विदुषी—शास्त्र-पठनेन स्त्रियो विगुणिता भवन्ति । अतः शास्त्रं तु ताभिर्न पाठ्यम् ।

प्रतिभा—हाय ! हाय ! अयमेव कुसंस्कारः कथ्यते । अत्र भारते गार्गी मैत्रेयी आत्रेयी सीता सावित्री प्रभृतयोऽसंख्याताः स्त्रियो विदुष्योऽभवन् । वेदमन्त्रद्रष्ट्र्योऽपि स्त्रियोऽभूवन् । स्त्रीभिः शास्त्रं न पठनीयमिति कुसंस्कारम् सवथा स्त्रियः सन्त्यजेयुस्तदैव तासामभ्युदय इति जानीहि ।

विदुषी—(स्मितं कृत्वा) मर्षयतु भगिनी । मया तु साम्प्रतिकीनां नारीणां भाव एव व्यक्तीकृतः । नाहं स्त्रीणां पाठविधिविरोधिनी । केवलं साम्प्रतिकपाठविधिं नाभिलषामि ।

प्रतिभा—ओ३म् त्वमिदं सम्यक् कथयसि । सम्प्रति स्वतन्त्रेऽपि भारते भारतीयनारीणां शिक्षा पाश्चात्यपद्धत्या चलतीति गर्हितमिदं । स्त्रीणां शिक्षा भारतीयपद्धत्या चलेदिति नितान्तमपेक्षितम् । नारीजागरणनाटके देवीदृश्ये द्वितीयाङ्के नारीणां शिक्षा विवृताऽस्ति । तत्र त्वया द्रष्टव्या सेति शिवम् ।

विदुषी—लघुविद्यालयः (प्राइमरी) वालिकानां बालानां कथं स्यादिति वद ।

प्रतिभा—इत्येव तु परिष्करणीयम् विद्यते। सम्प्रति लघुविद्यालयेषु अयोग्या अपि शिक्षका गृह्यन्ते । इति न साधीयसी शिक्षा वालिकानां वालानां च भवति। तत्रानुभविनो योग्याः शिक्षकाः शिक्षिकाश्च अपेक्षिताः। तथा महाविद्यालयेऽपि उभयेषां नारीणां नराणां च शिक्षा सहैव भवतीति गर्हितमिदं । भारतीयमर्य्यादा-शून्यम् इदं कार्यम्। पाश्चात्यदेशेऽन्या नारी-मर्य्यादा, भारतदेशेऽन्या। अतश्च सैव नारी-मर्य्यादा नात्रोचितेति लघुविद्यालयस्तु स्यादुभयोरेकः। परन्तु माध्यमिकविद्यालयो महाविद्यालयश्चोभयोः नारीनरयोः पृथगेव स्यात्। पाठ्य-विषया अपि भिन्ना एव स्युरिति शाश्वतिको नियमो वैज्ञानिकश्चेत्यलमत्र विवादः।

विदुषी—षोडश मातरः का इति मां बोधय भगिनि प्रतिभे !

प्रतिभा—अहो साधु पृष्टं त्वया ब्रह्मवैवर्तपुराणतोऽहं श्रावयामि । शृणु—

स्तनदात्री गर्भदात्री भक्ष्यदात्री गुरुप्रिया,
अभीष्ट-देवपत्नी च पितुः पत्नी च कन्यका।
सगर्भजा च भगिनी पुत्रपत्नी प्रियाप्रसूः ।
मातुर्माता पितुर्माता सोदरस्य प्रिया तथा ।।
मातुः पितुश्च भगिनी मातुलानी तथैव च ।
जनानां वेदविहिता मातरः षोडश स्मृताः ।।

इतिहि १६ षोडश मातरः कथ्यन्ते । इति जानीहि—

विदुषी—भगिनि प्रतिभे मामादर्शनारीचरितं बोधय—

प्रतिभा—ओम् ओम् शृणु अहम् एकस्या आदर्शनार्य्या गृहकृत्यं श्रावयामि त्वं सावधाना शृणु तथाहि—

स्त्रीभिरनुकरणीयमादर्शनारीकृत्यम्

एकस्मिन् परिवारे १२ द्वादश प्राणिन आसन्। दम्पती तयोस्त्रयः पुत्रा द्वे कन्ये पुत्राणां वध्वोऽपि तिस्रः; तासु द्वयोः सन्तान एक एक आसीत्। कनिष्ठस्य भार्या तु मुग्धा नूतनैवागतासीत्। कन्ये अपि अपरिणीते बालिके आस्ताम्। तत्र गृहे परस्परं कार्यकरणे ईर्ष्यावशात् स्त्रीषु कलहो भवति स्म। ज्येष्ठा अभिलषति यत् कनिष्ठा कथं सुखं करोति। कनिष्ठा अभिलषति ज्येष्ठा कथं सुखं स्थास्यति। एवं लघुनो लघुनो वस्तुनः कृतेऽपि परस्परं कलहायन्ते स्म। तयोरेव ज्येष्ठकनिष्ठयोः कलहप्रभावात् बालकयोरपि तादृश एव स्वभावोऽजनि। सा मुग्धा वराकी कनिष्ठ-पुत्रभार्या नवीना समागता आसीत्। साधुव्यवहारा च सा हि वीक्ष्य कलहपूर्णं गृहं भृशं दुःखिता गृहकोणे समुपविश्य विलपन्ती विचारयामास। हा हा कथमहमस्मिन् नरकगृहे समागता मे जीवनं तु कष्टमयं जातम्। किं करोमि कथमिह जीविष्यामि। मम मरणं वरमित्यादि-चिन्तया व्यग्रा भूत्वा भृशं रुरोद। तदानीमेवान्तः-करणस्य प्रेरणा तस्या अभूत्। यद् अयि मुग्धे त्वं कथमेवं विलपसि? एतदर्थमेव त्वमस्मिन् गृहे प्रेषितासि, यन्नरकगृहमिदं स्वर्गं कुरु। इति। त्वमेवेदृग् अधीरा भवसि, तर्हि कथमस्य गृहस्य सुधारः स्यात्। इति।

इत्थमेवं विचिन्त्य सा गृहकोणादुत्थाय मुखप्रक्षालनं कृत्वा कलहकारणमन्वेषयामास। तत्र सा दृष्टवती, यत् श्वश्रूर्ननान्दा च बहिस्तनं कार्यं कुरुतः। यातरौ गृहकृत्यं कुरुतः। परस्परं कार्यं विभक्तमस्ति। तत्र सर्वा अपि अभिलषन्ति, यत् मया कार्यं स्वल्पं कर्तव्यं विश्रामो भूयान् विधेय इति। यदा कापि दैवात् रुग्णा भवति तर्हि तस्याः कार्यं का कुर्यात्। सर्वा अपि केनापि छद्मना स्वात्मानं मोचयन्ति स्म। तत एव कलहो जायते। एकस्मिन् दिने आपणान्मिष्टान्नमागतमासीत्। तस्य कृते एव कलहोऽभूत्। सर्वासामिच्छाऽभूत् मह्यमधिकं मिलेदिति। इत्थं हि तुच्छं तुच्छं निमित्तमुपादाय ताः परस्परं कलहायन्ते स्म। एकस्मिन् दिने सा मुग्धा चिन्तयित्वा

ज्येष्ठां यातरं गत्वा एकान्ते प्रार्थयामास । यत् अयि भगिनि ! भवती पुत्रवती अस्ति । पुत्रलालने बाधा भवति । अहं भवत्याः पाककार्यं प्रतिदिनं करिष्यामि । भवती विश्रामं करोतु ।

प्रथमं तु नानेति कृत्वा तां प्रशंसन्ती उवाच त्वमधुनैवागतां कियन्ति दिनानि विश्रामं कुरु पश्चात्सर्वं कारिष्यसीत्यादि । पश्चात्तु तस्या हार्दमनुरोधमुपलभ्य स्वीचकार । एवमेव सा कनिष्ठा मध्यमामपि समनुरुध्य तस्या अपि पाककृत्यं गृहीतवती । एवमेव शनैः शनैः उभय-कालिकमुभयोर्यात्रोः पाककृत्यं सैव कुर्वती 'यस्या हस्ते पाकस्तस्या वशे सर्वे' इति नियमात् सा सर्वानपि गृहजनान् स्ववशे चकार । तस्याः प्रशंसामपि सर्वे कुर्वन्ति । श्वश्रूस्तां बहु स्निह्यति । मध्ये मध्ये तस्याः साहाय्यं करोति । सा तु नहि नहि मातः ! त्वं केवलं साक्षिणी भूत्वा पश्यतु । मां त्रुटौ सत्यां बोधयतु । सा सदाग्रहेण तस्याः साहाय्यं करोति । कन्यके अपि मातरमनुकुर्वन्त्यौ तथैव कुरुतः । सा यदा तत्कार्यतो मुक्ता भवति स्म तदैव पात्राणां मार्जनं स्वच्छं शुद्धं विधाय दर्शयति । पश्यतु कीदृक् शोभनं पात्रमिदं भाति । यदा सा मातरं दर्शयति, तदा ननान्दाऽपि अहन्तु त्वत्तोऽपि अधिकं स्वच्छं करोमि । एवमहमहमिकया सा सर्वमपि गृहकृत्यं स्वयं कुर्वती सर्वाभ्योऽपि कारयति स्म । एकस्मिन् दिने सा श्वश्रू (मातर)-मुक्तवती मातः आपणाच्चूर्णमायाति । तन्न शोभनं । भवती गोधूम-मानाययतु । तं सम्यक् स्वच्छं विधायाहं चक्रीमध्ये चूर्णं करिष्यामि । पेषणेन मे स्वास्थ्यं सम्यग् भविष्यति । प्रसवे गर्भपीडा न भवतीति मया मातुः श्रुतमस्ति । स्वगृहजनाः समीचीनां कर्पटिकामत्स्यन्ति । इति महत् पुण्यं मे भविष्यति । श्वश्रूरुक्तवती त्वन्तु सर्वं पुण्यं स्वयं ग्रहीष्यसि किम् । अस्मान् अपि तु तत्र भागिनीः कुरु । सत्यमेवमहमनु-मोदिष्ये । सोवाच भवत्यो गोधूमपरिष्कारे साहाय्यं करिष्यन्ति । कन्यके ऊचतुः । आवां पेषणे साहाय्यं करिष्यावः । सोवाच प्रथमं गोधूमानयन-मनुमोदयन्तु । पश्चात्तु अहमेव सर्वं कर्तुं पर्याप्तेति । सर्वासां सदा-

ग्रहाद् गृहे गोधूममप्यागतम्। सर्वासां साहाय्येन तस्य स्वच्छता-कण्डनादिकं सर्वं सम्पन्नम्। सा कनिष्ठा रात्रिशेषे एव समुत्थाय पेष्टुमारब्धवती। चक्रीशब्दं श्रुत्वा श्वश्रूरपि उत्थाय अयि ! अयिबधु ! स्वयमेव सर्व पुण्यं ग्रहीष्यसि मह्यमपि किञ्चिद् देहि। इति कथयन्ती पेष्टुं सहयोगं चकार। कियतैव क्षणेनोभाभ्यां श्वश्रूवधूभ्यां चूर्णं पिष्ट्वा स्थापितं। प्रातः सर्वा दृष्ट्वा चमत्कृता जाता। अहो कुत एतावच्चूर्णमस्माकं गेहे कथमागतम्। श्वश्रूः कथयामास सर्वं वः कनिष्ठभ्रातृजायायाः कृत्यमिदम्। साहि उषसि समुत्थाय चक्रीं चालयित्वा चूर्णमकार्षीत् गोधूमम्। पश्यतम् सम्प्रति तर्कुयन्त्रं चालयन्ती सूत्रं निःसारयति। कन्यके उत्थाय, तर्कुयन्त्रमस्मानपि बोधयतु। वयमपि चालयिष्यामः। इत्येवं सा कनिष्ठभ्रातृजाया सर्वानपि गृहजनान् उद्योगपरवशान् चकार। यत्र गृहे सर्वा अपि स्त्रियः परस्परं कलहायमाना ईर्ष्यालव आसन्। तत्रैवेदानीं "हेतावीर्ष्येत् फले न तु" इति वाग्भटीयमनुशासनं पालयन्त्यः स्त्रियोऽहमहमिकया कार्य-व्यापृता दृश्यन्ते। काऽपि तर्कुयन्त्रं चालयति। कापि स्वयं पात्रशुद्धिं करोति। काऽपि पाककार्ये व्यापृता। काऽपि सर्वेषां कृते मोदकं जलपानार्थं निर्माति। इत्येवं तदेव गृहं यत् पूर्वं नरकगृहमासीत्तदधुना स्वर्गगृहं जातम्। गृहे स्त्रीणां सौहार्दं वीक्ष्य बहिः पुरुषा अपि परस्परं सौहार्दसम्भृता अहमहमिकया कार्यं कुर्वन्ति स्म। यतो हि प्रतिवेशिजना अपि पूर्वं तानुपहसन्ति स्म। सम्प्रति तेऽपि तान् प्रशंसन्ति। अहो भवतां गृहे तु पूर्वं प्रतिदिनं कलहः श्रूयते स्म। सम्प्रति सर्वा यातरः परस्परं महता सौहार्देन कार्यं कुर्वन्ति। भवद्गृहं सम्प्रति स्वर्गतुल्यं दृश्यते। मित्राणि सर्वाणि भवतां कनिष्ठां बधूं प्रशंसन्ति। सा हि यतः कालादागता ततः प्रभृति एव भवद्गृहस्य वातावरणं परावर्तितं जातम्। एतदेवोच्यते। एकैव सफरी तडाकं दूषयति। एकमेव चम्पकपुष्पं सर्वमुद्यानमुद्दीपयति। गृहे यदि एकापि लक्ष्मीः नारी भवति। तर्हि सर्वं गृहं स्वर्गायते। तत्रैवैकापि यदि लक्ष्मी-ज्येष्ठभगिनी दरिद्रा समायाति। तर्हि नरकायते। उक्तं च—

नारी यदा स्याद्गृहिणी सुशिक्षिता,
लक्ष्मीस्तदा तद्गृहवासमाश्रयेत् ।
सैवानिशं वाक्परुषा कुचैलिनी,
स्याच्चेद् दरिद्रा कुलगेहनाशिनी ॥ १ ॥

इति कुलवधूभिरनुकरणीयं गृहकार्यम् ।

विदुषी—भगिनि प्रतिभे त्वं तु आदर्शनारीकृत्यं श्रावयित्वा बहूपकृतवती माम् । सम्प्रति मनोऽभिलषितसन्तानोत्पत्तिप्रकारं वद—

प्रतिभा—भगिनि विदुषि ! संस्कारेषु सर्वाभ्यर्हितस्य गर्भाधानसंस्कारस्य स्वतन्त्रेऽपि भारते महत्वं नास्ति । अतोऽहम् आर्य्यनारीणां कृते गर्भाधानसंस्कारप्रकारं वच्मि । शृणु –

यथाहि अस्थायिन्याः स्वप्रकृतेः (फोटो) ग्रहणे दम्पती सावधानौ भवतस्ततोऽप्यधिकमत्र सावधानताया आवश्यकतास्ति सन्तानरूपस्थायिप्रतिकृति-(फोटो) ग्रहणार्थम्—

यदा नारी पुष्पवती जायते । तत आरभ्य दिनचतुष्टयं महता प्रयत्नेन तया संयमो वर्तनीयः । अन्यत्रापि—शास्त्रेऽस्ति । यत् शुक्रशोणितयोर्दोषविनाशाय गुणसम्पत्तये च सदाचारपातिव्रत्याभ्यां शुद्धकुलसम्बन्धेन पुंसवनादिसंस्कारेण हितौषधाऽहारसेवनेन ऋतुकालिक शास्त्रविहितचर्यया यथामुहूर्तसम्प्रयोगेण गर्भधारणे वैशिष्ट्यमायाति । तदनन्तरमपि गर्भिणीनियमादिपालनेन गर्भजशिशौ वैशिष्ट्यमायाति । काश्यप-संहितायाम्—

आहाराचारचेष्टाभिर्यादृशीभिः समन्वितौ ।
स्त्रीपुंसौ समुपेयातां तयोः पुत्रोऽपि तादृशः ॥
यानि द्रव्याणि पुण्यानि मङ्गलानि शुचीनि च ।
नवान्यथाप्यखण्डानि पुन्नामानि प्रियाणि च ॥
गर्भाधानेऽप्युपहरेद् वासांस्याभरणानि च ।
धूपितार्चितसम्मृष्टं प्रबुद्धं वेश्म शस्यते ॥

प्रातरुत्थाय शौचान्ते गुरुदेवार्चने रता ।
अर्चेदादित्यमेवासौ गन्धपुष्पार्घवार्जपैः ॥
क्षीयमाणं च शशिनं नास्तं यान्तं च भास्करम् ।
न पश्येद्गर्भिणी क्वापि नाप्युभौ राहुदर्शने ॥
सूत्रेण तनुना रज्वा स्तम्भनं बन्धनानि च ।
वर्जयेद् गर्भिणी क्वापि कामं बद्धानि मोचयेत् ॥
उपविष्टैव नासीताऽनिर्विण्णा चात्रपान्विता ।
दोषाभिघातैर्गर्भिण्या यो यो भागः प्रपीड्यते ।
स स भागः शिशोस्तस्या गर्भस्थस्य प्रपीड्यते ॥

गर्भाधानार्थं पुंसा घृतपक्वं स्त्रिया च तैलपक्वं लघु भोजनं कार्यम् । रात्रौ शुभमुहूर्ते दक्षिणपादेन पुंसा वामपादेन च स्त्रिया शय्यारोहणं कार्य्यम् । स्वेष्टदेवं संस्मृत्य संयोगो विधेयः । सावहितौ सम्भृतानन्दौ, "आनन्दाद्धि खलु इमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति ।" इत्यादि श्रुतिः ।

अत्र सन्तानसौन्दर्य्यलालसा माता प्रातः ऋतुस्नानकाले स्नात्वाऽतिसुन्दरस्यैव चित्रस्य दर्शनं कुर्य्यात् । चित्राभावे कस्यापि स्वीयसुन्दरबालस्य पत्युर्वा सर्वाभावे स्वस्यैव मुखस्य दर्पणे दर्शनम्—

ऋतुस्नाता प्रसूः पश्चाद् यदाकारं निरीक्षते ।
तदाकारं सुतं सूते विधानाच्छाश्वताद्विधेः ॥

विदुषी—सखि प्रतिभे ऋतुकाले संयमस्य महत्वमुक्तं त्वया तद्विस्तराद् बोधय ।

प्रतिभा—शृणु किञ्चित्पूर्वमप्युक्तं सम्प्रति विस्तरात्छृणु—

दम्पत्योः शयनं देवाः प्राहुः शय्याद्वये सदा ।
ऋतुकाले विशेषेण, संयोगे हि सहस्थितिः ॥

आतपे वाताधिक्येऽतिशीतस्थाने शयनाभावः । स्रावावधि नहि स्नानम् । स्रावावरोधे चतुर्थे पञ्चमे वा दिने प्रातः स्नानम् ।

उदरे शीतप्रयोगो वर्ज्यः। यानारोहणं, सोपानारोहणावतरणे, क्वाप्युच्चस्थाने आरोहणावतरणे, अत्यधिकभारोत्थापनम् नेत्रयोरञ्जनम्, कर्णे तैलम्, शरीरे च मर्दनम्, केशप्रसाधनम्, नखकर्तनम्, चण्डशब्दश्रवणम्, गानं, वाद्यम्, शृङ्गारम्, नर्तनं सर्वमपि उत्कटकृत्यं रजस्वला विवर्जयेत्। मनूक्ता नियमाः पालनीयाः— सर्वथा एकान्ते स्थितिः। केनापि कयापि वा स्पर्शो वर्ज्यः। कांस्ये भोजनं निषिद्धम्। दिनत्रयं भोजन-संयमः। प्रस्रावदिनावधि ब्रह्मचर्य्यव्रतम्। एतेन स्त्रियाः स्वास्थ्यम् सन्तानसौन्दर्यञ्च। आर्तवकालरक्षा स्त्रीणां सन्तानस्य च हितावहेति तत्रावधानं सर्वेषामेव गृहस्थानां श्रेयस्करम्।

विदुषी—यदि तत्राज्ञानात्प्रमादश्चेत्को दोषस्तमपि ब्रूहि—

प्रतिभा—अहो! अस्मिन् काले स्वल्पेऽपि प्रमादे महानर्थो जायते। पश्य—पत्युः शय्यास्पर्शे स्त्रीणां भयङ्करा रोगाः कटौ पीडा ऋतुस्रावे वृद्धिः। शरीरं दुर्बलं जायते। दम्पत्योरुन्मादः। सन्तानोत्पादनिरोधः। प्रदररोगात् स्त्रीणां मृत्युः पत्युः प्रज्ञानेत्रज्योतिर्वलवीर्य्यविनाश इति सर्वथा पृथक् छयनं विहितम्। शीताऽघाताद् रजःप्रसावनिरोधस्तेन सर्वरोगोद्भवः। विहारवैगुण्याद्भयङ्कररोगोद्भव आहारवैगुण्येऽपि स एव दोषः। सन्तानोपरि अपि आर्तवनियमविघातफलं भवति। यथा—अञ्जनेनान्धः। तैलमर्दनात्कुष्ठी। शृङ्गारात्कुरूपः। केशमार्जनात् खल्वाटः। नखनिकृन्तनेन कुनखः। चण्डशब्दश्रवणाद् बधिरः। किम्बहुना केवलं स्त्रिया नियमपालनात् तस्याः, पत्युः, सन्तानस्य चेतित्रयाणां लाभो भवतीति मन्वादिशास्त्रेभ्यः सर्वोऽपि रजस्वलानियमः स्त्रियाऽन्विष्यान्विष्य पालनीयः।

विदुषी—भगिनि प्रतिभे रजस्वलानियमानन्तरं गर्भवतीनियमानपि श्रावय संक्षेपेण—

प्रतिभा—शृणु सावधाना, गर्भिण्यापि पतिसंयोगो हेयः। भारोद्वहनम्, अतिश्रमः, तिक्तरूक्षविदाहिभोजनत्यागः, औषधं कटु सन्त्यजेत्। चायकाफीभङ्गमद्यप्रभृतिमादकद्रव्यत्यागः। स्त्रीणान्तु बीडी-सिगरेट् प्रभृतिमादकवस्तूनां सर्वथा त्यागः—

याद्दङ्मातुः स्वभावः स्यात्सन्तानस्तादृशो भवेत्।
महतां चरित-ध्यानं पुण्य-पुस्तक-पाठनम्॥
आहाराश्च विहाराश्च संयता मात्रया ध्रुवम्।
लघुव्यायामकृत्यं यद् गृहकार्य्यव्यवस्थितिः॥
हकारेण बहिर्याति सकारेण विशेत्पुनः।
हंसा हंसेति मन्त्रोऽयं सर्वाभिः सर्वदोच्यते॥

इति श्वासस्य प्रवेशनिर्गमाभ्यां साहं साहम् इत्येव जायतेऽतोऽस्यैव मन्त्रस्य जपो गर्भिण्याऽनायासेन सर्वदाऽनुष्ठेयः। इत्यलम्।

विदुषी—भगिनि प्रतिभे त्वं तु स्वमातुः सकाशात् सर्वं जानासीति गर्भिण्या विशेषतः आहारविहारौ ब्रूहि—

प्रतिभा—सखि विदुषि! शृणु तस्याः सामान्यतो विशेषतश्चाहार-विहारौ। तथाहि—

गर्भिण्या आहारविहारौ

गर्भिण्याः शरीरमनसोः स्थितिरेव भविष्यतः सन्तानस्य शरीर-मनसोः कारणमिति गर्भिणी सर्वदा सावधानैव तिष्ठेत्।

गर्भिणी माता यद्धि भुङ्क्ते पिबति तदेव तु द्विधा परिणमति। मातृ-कृते क्रमशो [१]रस-रक्त-मांस-मेदोऽस्थि-मज्जारजो-रूपतः परिणमति। तथैव शिशु-कृतेऽपीति शाश्वतिकमद्भुतं यन्त्रमिदमैश्वरं प्रचलति। अतश्च गर्भिणी यदि-नियम-पालनं नित्यं सावधाना करोति

१—रसश्च रक्तं च मांसं च मेदश्च अस्थि च मज्जा च रजश्चेति रस-रक्त-मांस-मेदोऽस्थि-मज्जा-रजांसि तेषां रूपाणि तैः। अत्र सार्वविभक्तिकः तसिल् प्रत्ययः।

तदा गर्भगः शिशुः स्वस्थो हृष्टः पुष्टो दृढाङ्गो जायते। माता च सुख-प्रसवा भवति। तत्रैव लेशतोऽपि प्रमादे जाते शिशुर्दीनो हीनो विकृताङ्गो विविध-दोष-पूर्णो दुःख-प्रसवो मातुरपि मृत्यु-कारणं भवतीति सर्वदा सावधानताऽपेक्षिता मातुस्तत्र काले—

तत्र आहाराः

रुचिकराः स्निग्धा लघवो दधि-दुग्ध-घृत-हैयङ्गवीन-बहुलास्तण्डुल-यव-गोधूम-मुद्ग-मसूराढकी-प्रधानाः पपीता-बञ्जवीजाम्र-द्राक्षोदुम्बर-कदली-सन्तरादिफलभृता वास्तुक-तण्डुलीय-पालक्य-कद्दु-पटोल-कारवेल्ल-महाकौशातकी- रामकौशातकी-श्वेत-कुष्माण्डोपकरणा आहारा उपयोगिनः। सदुग्ध आम्ररसो वरीयान्। द्वितीयमासावधि गोदुग्ध-प्रधानः। तृतीये विषम[1]-मधु-घृत-मिश्रितं गोदुग्धम् उपयुक्तं भवति। चतुर्थे दुग्धभक्तादि-फलबहुल आहारः। पञ्चमादिमासेषु तरल-लघु-पुष्टिप्रदा आहाराः। गोदुग्धन्तु सर्वदोपयोगि। अष्टमादिषु बार्लीसाबूदाना-प्रभृति पपीतौल्ल-मूलकं फलमार्द्रं शुष्कं वोभयमुपकारि। गर्भिण्याः कृते उपोष्य व्रतं निषिद्धम्। ऋतु-फलानि लकुच[2]-बदरीफल-विरहितान्येवोपयोगीनि। अति[3]-तिक्तोष्ण-शीतकटु-कषाय-गरिष्ट आहारः सर्वथा विवर्जितः। मादक-द्रव्य (चाय-काफी) पानादिकं गर्हितम्।

अथ विहाराः

स्वच्छ-वस्त्रं धार्यम्। अतिरक्त[4]-नील-पीतं नैव धार्यम्। उत्कट-पानं धावनं नदीतरणं बाहुभ्यां वर्जयेद्गुर्विणी। बहुपरिश्रमो

१—मधु च घृतं च मधुघृते विषमे च ते मधुघृते विषममधुघृते ताभ्यां मिश्रितं मिलितं (मधुघृते समभागं चेद् विषं जायतेऽतो मधु घृताद्द्विगुणितं त्रिगुणितं कर्तव्यमिति भावः) २—लकुचम् 'बड़हर' इति विहारराज्य-भाषा। ३—नात्युष्णम् नातिशीतमित्थं सर्वत्रैव अतिशब्दस्य योगः। ४—रक्तं च नीलं च पीतं चेति रक्त-नील पीतानि अति=अत्यधिकानि च तानि रक्तनील-

निषिद्धः। लघु-परिश्रमस्त्वावश्यकः। प्रातर्भ्रमणं सपति, सपुत्रं, सभृत्यं, वा विधेयं न [1]त्वेकाकिभ्रमणम् कदापि। वस्त्राधिक्यं स्थूलं दृढवन्धनं त्याज्यम्। उच्चावचारोहणम्। उच्चबद्धोपानत्परिधानम् तैलाभ्यंजनमुद्वर्तनादि सर्वमपि निषिद्धं वर्जनीयम्। व्यञ्जनकर्तनमपि निषिद्धं गर्भिण्या इति। तर्कुचक्रचालनं वेसवारादिपेषणं गृहमार्जनादि स्वरुचिकरं कृत्यं कार्यम्। यतः प्रसवपीड़ा न स्यात्। अङ्ग-चालन-क्षमाल्पाल्प-प्रयासेन प्रसवपीड़ा न भवतीति न विस्मरणीयं गर्भिण्या।

त्याज्यानीमानि वस्तूनि गर्भिण्या सावधानया।
त्याज्योऽत्र पतिसयोगो वेगरोधस्तथैव च॥
[2]शीघ्रयान-समारोहो धावन-प्लवनादिकम्।
भारोत्तोलनमत्यन्त-सूक्ष्म — वस्तु-निरीक्षणम्॥

अत्यन्तजागराध्वाद्यं हास्यभाष्यादि-साहसम्।
मनः-खेद-करात्यूग्र-सर्पव्याघ्राद्यवेक्षणम् ।
सिनेमा-चित्र-दर्शं च गर्भिणी स्त्री विवर्जयेत्॥

विदुषी–भगिनी प्रतिभे! अत्रैव प्रसूतिकाया अपि आहारविहारौ ब्रूहि–

प्रसूतिका भोज्यविहारौ

प्रसूतिका-भोज्यं स्निग्धं लघु दुग्धलं[3] वायु हरं परिमितं स्यात्। आहार-वैगुण्येन प्रसविन्याः शिशोश्च हानि-सम्भव इति, आहार-विहार-

---

पीतानि अतिरक्तनीलपीतानि। अत्यधिकं रक्तं वस्त्रमित्यादि नैव धार्य्य गर्भिण्या।

१—एकाकि च तद् भ्रमणम् एकाकिभ्रमणं न कार्य्यम्। २—शीघ्रगं यानम् शीघ्र-यानम् तत्र समारोहः। धावनं च प्लवनं च आदिनी यस्य कार्य्यस्य तत् धावनप्लवनादिकं कार्य्यम्। ३—दुग्धं लातीति ला आदाने धातुतः अचि आलोपे दुग्धलम् = दुग्धयुक्तमित्यर्थः।

योः सर्वथा सावधानतया[१] भाव्यम्। नियतं तैल[२]-मर्दनं प्रतिदिनं भवेत् वालस्य प्रसूतिकायाश्च। स्त्रीणां तैलपक्वमापूपादिकं घृतपक्वापूपादिभ्योऽपि वरं वोभवीति। आयुर्वेदग्रन्थेषु सार्षपतैलं बहुमानितमस्ति। अतस्तैलेन स्त्रियो घृतेन पुमांस उपचर्य्या इति (आयुर्वेदः) 'तण्डुलाष्टगुणं पिष्टं पिष्टादष्टगुणं पयः। पयसोऽष्ट-गुणं तैलं मर्दनान्नतु भक्षणात्।' इति पुंसां कृते। स्त्रीणां कृते तु तैलमुभयथोपयोगि मर्दनाद्भक्षणादपि। इत्यलम्।

विदुषी—भगिनि प्रतिभे! एवमवसरो न मिलति। अवसाने-प्रसूति गृहस्वरूपमपि ब्रूहि—

प्रतिभा—साधु श्रूयतां प्रसूति-गृहस्वरूपम्—

प्रसूति-गृहम्

सम्प्रति स्वतन्त्र-भारतीय-शिशोः प्रथमावतरण-गृहमिति सर्वथा रमणीयं दर्शनीयं निर्विघ्नं साग्नि सुगन्धि प्रशस्तं च स्यात्। तत्रानुपयोगीनि वस्तूनि न स्युः। केवलं प्रसूत्युपयोगीनि एव तानि सम्भृतानि स्युः। वायुप्रवेश-क्षमं गवाक्षादि-युतं प्रकाशान्वितं सूर्य्यातपपरिष्कृतं चेदतीव योग्यम्। तत्र समशीतोष्णता स्यात् धूमगन्धोऽपि न स्यात्। अगरु-तगरु-ज्वालामुखी-गन्धस्तु स्यादेव। मृत्तैलदीपो (किरोसिन आयल) न ज्वलेत्। तत्र सार्षपतैलदीपेनैव भाव्यम्। सार्षप-तैल-दीपस्तु रक्षाकरो बोभवीति विद्युद्दीपो वा स्यात् (इलेक्ट्रिक लाइट)। सोपि नात्युत्कटो नातिमन्दो भवेत्। शौचालय-स्नानागारादि पार्श्वतोऽपि न स्यात्। इति लक्षणलक्षितम्प्रसूति-गृहं शोभनं भवति।

१—अवधानेन सहिताः तासां भावः तया।

२—चक्षुर्जलं च व्यायामः पादाधस्तैलमर्दनम्।
कर्णयोर्मूर्ध्नि तैलञ्च जराव्याधि-विनाशकृत्॥

इत्यादि पद्यमपि तैल-मर्दन-फलं ब्रूते।

विदुषी—भगिनि प्रतिभे ! सर्वावसाने सन्तानपालनपोषणप्रकारमपि बोधयित्वा विश्रामं कुरु ।

प्रतिभा—अस्तु तवेच्छापूर्तिः । शृणु सावधाना—

सन्तान-रक्षोपायाः

प्रसवो हि स्त्रीणां स्वाभाविको धर्मः । यदि ता बाल्यादेव शरीर-नियमान् गर्भावस्थायां च गर्भिणीनियमान् यथाविधि पालयेयुः तदा सुखप्रसवा भवन्ति एव, तत्र नैव भवति किमपि कष्टम् । विधिविधानमेवेदमिति जानीहि । इत्थं सुखप्रसवे जाते सर्वप्रथमं नालीच्छेद-प्रक्रियोपस्थिता भवति । तत्र चतुरा धात्री अपेक्ष्यते । याहि शिक्षिता शासनतः प्राप्तप्रमाणा अनुभविनी वृद्धा स्यादिति । तया सह कापि नवीना स्यान्नाम नात्राग्रहः । प्रसूतिगृहञ्च योग्यं स्यादित्युक्तमेव पूर्वम् । तत एव सविधि नालच्छेदे जाते शिशूपचारः प्रारभ्यते । नालच्छेदात् पूर्वं मधुना जिह्वोपरि सरस्वतीवीजयन्त्रो-ल्लेखो यदि भवेत्तर्हि महांल्लाभः । स्वच्छ वस्त्रे वेष्टयित्वा शिशुः संस्था-पनीयः । तैलमर्दनविधिरपि प्रयोज्यः । नियमतस्तैलमर्दनं दुग्धपान-प्रक्रिया च चलेत् ।

साम्प्रतिक्यः पाश्चात्य-भावापन्ना मातरो दुग्धपानादुद्विजन्ति । नेदं साधु । विधिविधानमिदं यद् यदैव शिशुर्मातुरुदराद्बहिरेति तदैव तदीयजीवनव्यवस्थाकृते कलसीद्वये दुग्धं सम्भृतं जायते । तन्निरोधि-कास्ताः कथं स्युः । तत्र तु यथा यथा शिशुर्दुग्धं पिबति तथा तथा मातुर्गर्भाशय-सङ्कोचो जायते । इत्यादि वैज्ञानिकं कृत्यं ब्रह्मणैव विहितं विद्यते तदन्यथाकरणमेव रोगोत्पादकम् ।

दुग्धपानमपि नियमतः स्यादन्यथा बाला दुग्धं वमन्ति । यदैव बालो रुद्यात्तदैव दुग्धदानमपि न वरं । दशदिनावधि द्विघटिकानन्त-रम् अर्धकलामात्रं दुग्धमात्रा स्यात्ततः सार्द्धमासान्तम् सार्द्धद्विघटिका-नन्तरं पादोनकलान्ता दुग्धमात्रा स्यात् । (कला-कनवा इति ज्ञेयम्)

ततः षण्मासावधि त्रिघटिकानन्तरं सार्द्धकलातो द्विकलामात्रं दुग्धं स्यादेवमेव क्रमशः कालपरिमाणतो दुग्धमात्रापि वर्द्धनीया स्यात्। समये समये मात्रयैव दुग्धपानं कारयितव्यम्। मातुरेव दुग्धमुपकरोति शिशुम्। यदि मातुर्दुग्धमल्पं भवेत् तदा माता स्वयं गोदुग्धपानं कुर्वती स्वदुग्धं शिशुकृते वर्द्धयेत्। अन्यादुग्धं गोदुग्धं न दद्याच्चेत्साधु। मातृदुग्धवर्द्धनस्यैवोपाया विधेया दुग्धलपदार्थभोजनविषयेत्यलम्।

यदि माता रुग्णा जायेत। तदा अजा-दुग्धं गोदुग्धं वा मात्रया दातुं योग्यम्। तदपि मात्रायामधिकं न स्यान्न्यूनं स्यान्नाम न हानिः। शिशुस्तु वक्ता नास्ति। पाययित्री एव तत्र सावधाना स्यादित्यलम्।

शिशवः प्रायो मातृदोषादेव रुग्णा भवन्ति। अधिकदुग्धपानात् मातुर्विकृतदुग्धपानात् च। माता हि जिह्वालौल्यात् तिक्तगरिष्टादिदोषयुक्तं भोजनमाचरति चेत्तच्छिशवेऽहितकरं जायते। अत एवेहापि सन्तानरक्षणाय मातृसंयमोऽपेक्ष्यते। उक्तमेव शास्त्रे—

पितुरभ्यधिका माता गर्भधारणपोषणात्।
श्रद्धाधिक्येन शास्त्रेषु कीर्तिता मातृषोडशी॥

रोदन-निवृत्तये मादक-द्रव्य-प्रयोगोऽपि गर्हितः। शयाना माता न दुग्धं पाययेदुत्थायोपविष्टा मस्तकोपरि प्रेमबहुलं हस्तं स्पृशन्ती मधुरमधुरं श्लोकगानं कुर्वती लालनया दुग्धं पाययेद्। बुद्धिमती माता मदालसा राज्ञीव स्व-सन्तानं योग्यतमं कुर्य्यात्।

शिशूनां समक्षे दम्पती न किमपि परस्परं वार्तालापं कुर्य्याताम्। न कापि कुभावचेष्टां वा कुर्य्याताम्। मातैव सर्वदा शिशुं रक्षेच्छिक्षयेच्चास्मिन्कालेऽनायासादेव शिशुः शिक्षितो जायते। यादृशी चेष्टा योऽपि भावः शिशुसमक्षे भवति तामेव चेष्टाम् तमेव भावं सोऽग्रे गत्वोद्बुद्धः सन् करोतीति विज्ञानम्। अत एव शिशुः क्वापि मेलायां कुत्रापि अन्यस्या मातुः क्रोडे न नेयो देयो वा। प्रसूतिगृहान्निर्गमनस्य प्राङ्गणादपि बहिर्द्वारगमनस्यापि शास्त्रे मुहूर्तनिर्देशो विद्यते।

अस्मिन्नेव समये जातकर्मनामकरणसंस्कार-भूम्युपवेशनसंस्कार-बहिर्गमनान्नप्राशनादिसंस्कारा अपि शिशोरभ्युन्नतिकरा भवन्ति। तेऽवश्यम् कारयितव्याः। कुलपरम्परातो ये संस्कारा आयान्ति। तेषामनुष्ठानमप्यावश्यकम् यथा तैलमर्दनानन्तरं ललाटे कृष्णतिलकम्। शिशु-शयनस्थाने स्वयमन्यो वा कोऽपि तिष्ठेत्। तस्य पार्श्वे किमपि लौहशस्त्रमपि स्यात्। कस्याः स्त्रियाः कस्यापि बालस्य हस्ते शिशोरप्रदानम्। इत्यादि नियमाः पालनीया एव।

दुष्टग्रहबाधनेऽन्यनेत्रनिरीक्षणबाधने वा "गोमूत्रेण स्नापयित्वा पुनर्गोरजसार्भकम्" इत्यादि भागवतमन्त्रैः शिशुबाधाग्रहदूरीकरणार्थं मातुरेव तावत् संस्कृतभाषाऽध्ययनमावश्यकम्। (भा० १०।६।२०)

सम्प्रति पाश्चात्यपद्धत्या बहवः शिशूनामपि औषधं कारयन्ति। नेयं प्रथा साधीयसी बाल्यादेव वैद्यचिकित्साहस्ते गमनम्। शिशूनां कृते तु निश्चितमौषधम् 'बालघोंटी' प्रभृति प्राचीनाः स्त्रियोऽपि जानन्ति। तथा शिशूपचार एवैवं करणीयो येन रोगोद्गम एव न स्याद् इति।

अद्यत्वे दम्पती स्वमनोरथानुकूलं शिशूनपि वस्त्रैरुपानत्प्रभृतिभिः सर्वथाऽप्राकृतिकशृङ्गारादिना सज्जयन्ति। नेदं समुचितम्। सम्प्रति तु शिशूनां प्राकृतिकस्थितिरेवोपकारिका भवति। तत्रैव दृष्टिर्देया नैवाप्राकृतिकोपचारे, तेन तु बालो जन्मरोगी जायते। तस्य स्वास्थ्यं सर्वदाकृते विगुणितं जायते।

निष्कर्षोऽयमायाति यज्जननी–शिक्षा शिशु–संरक्षणकलया समापनीयेत्यलम्।

विदुषी—सखि प्रतिभे त्वन्मुखान्नारी कर्तव्यं श्रुत्वाऽऽप्यायिताऽहं तुभ्यं धन्यवादं वितरन्ती आवश्यकं प्रश्नं पृष्ट्वाऽवशेषयामि ते कृत्यम्। यदा प्रसवे विलम्बो जायते। प्रसूत्याश्च कष्टं वर्द्धते। तदा क उपचारः कर्तव्य इत्यपि मां बोधय—

प्रतिभा—अहो इदं किं पृच्छसि रजस्वलागर्भिणीकृते विहितनियमपालिकानां नारीणान्तु किमपि कष्टं प्रसवे न भवतीति बहुशोऽभिहितासि । दैवाद् यदि प्रसवे विलम्बः स्यात्तदा १–कैमोमिला १२ (होमियोपैथमौषधम्) एकमात्रामात्रपानेन सुखं प्रसूयते । बिलम्बे अर्द्धहोरानन्तरं पुनस्तावदेव तद्देयम् । २–कण्टकारि-मूलम् हस्ते पादे च बद्धं शीघ्रं प्रसवं जनयति । ३–चिञ्चा-(इमली वृक्षस्य) वृक्षस्य पोतस्यैव मूलम् मुखाग्रे शिरःकेशे बद्धं शीघ्रं प्रसवं जनयति ४–अधोलिखितं समन्त्रं यन्त्रं गर्भिणी मस्तके न्यस्तं शीघ्रं प्रसवं जनयति । (प्रसवे जाते तत् त्रितयं क्षेप्यम् कण्टकारि-चिञ्चा-मूलं यन्त्रंच)

अस्ति गोदावरीतीरे जम्भला नाम राक्षसी ।
तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत् ॥

द्वात्रिंशिका यन्त्रिका

१	८	९	१४
११	१२	३	६
७	२	१५	८
१३	१०	५	४

५—अच्युतानन्त-गोविन्द-नामोच्चारणभेषजात् ।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥

इतिमन्त्राभिमन्त्रितं जलमपि गर्भिण्या पीतं शीघ्रं प्रसवं जनयति ।

प्रतिभा—भगिनि विदुषि दशमूलक्वाथं प्रसूतिकाकृते बहूपकारि भवति । तदपि तया सन्ताने जाते व्यवहर्तव्यम् । इति जानीहि । अपरञ्च सन्तानोद्भवानन्तरं वर्षत्रयं यापयित्वैव सन्तानवती नारी पतिसंयोगमाकांक्षेत मध्ये तु स्वप्नेऽपि संयोगवाञ्छा न कार्य्या सन्तानमात्रेति विधिविधानम् ।

विदुषी—भगिनि ! सम्प्रति शास्त्रीयं सन्ततिनिरोधयन्त्रं श्रावयित्वा समापयतु प्रश्नोत्तरकथामिमाम् ।

प्रतिभा—आम् साधु साधु ! मयाऽप्यधुना विश्रामबुद्धचेदमेव चिन्तित मासीद् यत्त्वया स्वयमेवोक्तम् । शृणोतु सावधानम्—सन्तति निरोधे हि—

शास्त्रीयं यन्त्रं भारतेऽतिप्रसिद्धं प्राकृतिकं पूर्वपूर्वतरैरनुष्ठितमिह संक्षेपतोऽहं विवृणोमि । तच्च त्वया सह साम्प्रतिवयो युवतयो युवानश्च परिशीलयन्तु । इति ममाग्रहः । यतोहि मनसिजोऽयं कामदेवो मनो निरोधेन निरुध्यते । मनसोऽनियन्त्रणेनैव विवर्द्धते । इति सरलं विज्ञानम् । मनोनिरोधप्रकाराश्च शास्त्रे बहुधा वहुत्र वर्णिताः । ते तत एव द्रष्टव्याः किञ्चिदिहापि निर्दिश्यते—

प्रथमं तावल्लज्जाशस्त्रमेकं स्त्रीषु निहितमस्ति येन शस्त्रेण सर्वदा ता आत्मानं मनोजोद्रेकाद्रक्षन्ति । सदा च सन्तानसेवा-व्यासक्ता श्वश्रू-श्वशुरादिगृहजनसेवा-गृहकार्य्यादि-विविध-कर्म-व्यापृता नारी समयमेव नाश्नुति[1] मनोजोद्रेकस्य । रात्रावपि दिनव्यापारनिमग्ना दृढ-निद्रापरवशा कथं मनोजोद्रे कमनुभवेदित्यनवसरस्तस्या-स्तत्कृते[2] । पुरुषाणामपि एवमेव विशिष्टा नियमाः सन्ति । स्त्रीणां समादरः कन्या-भगिनी-मातृ-रूपेणैव महिलान्तरनिरीक्षणमिति तत्तद्-भावपरवशे[3] मनसि कथं मनसिजोद्रेकः । स्वयोषिति च—शास्त्रीयं बन्धनं सर्वथा दृढतरमस्ति । यतो वर्षत्रयेऽपि दिनस्यैकस्यापि रात्रिः क्वापि प्राप्तुं शक्यते स्व-भार्यया सह संवस्तुं नवेति सन्देह एव । तथाहि—

१—अश्नुति + प्राप्नोति । मनसि जायते इति मनोजः कामः तस्य उद्रेकः आविर्भावः तस्य । २—तस्याः स्त्रियाः तस्य कामोद्रेकस्य कृते तत्कृते अनवसरः अवसराभावः । इति । ३—ते च ते च भावाः तत्तद्भावाः (कर्मधारयः) तेषां परवशमाधीनं तस्मिन् तस्मिन् मनसि । अर्थात् इयं मम कन्या, इयं मम

[1]गण्डान्तं त्रिविधं त्यजेन्निधनभं, जन्मर्क्षमूलान्तकम्।
दास्रं पौष्णमथोपरागदिवसं पातं तथा वैधृतिम्॥
पित्रोः श्राद्धदिनं दिवा च परिघाद्यर्धं स्वपत्नीगमे।
भान्युत्पात-हतानि मृत्युभवनं जन्मर्क्षतः पापभम्॥

[2]भद्रा-षष्ठी-पर्वरिक्ताश्च सन्ध्ये
भौमार्कार्की नाद्य-रात्रीश्चतस्रः।
गर्भाधानं त्र्युत्तरेन्द्वर्क-मैत्र-ब्राह्म-
स्वातो-विष्णुवस्वम्बुपे सत्॥

[3]केन्द्र-त्रिकोणेषु शुभैश्च पापै
स्त्र्यायारिगैः पुंग्रह-दृष्ट-लग्ने।
ओजांशगेऽब्जेऽपि च युग्मरात्रौ
चित्रादितीज्याश्विषु मध्यमं स्यात्॥

इत्येवं गर्भाधान-मुहूर्त-चिन्तापरवशे मनसि कथं मनोजोद्रेकः। इत्यादि-शास्त्राज्ञानुसारं व्यवहरतोर्दम्पत्योर्नास्ति सन्ततिनिरोधा-यान्यकारणप्रयोजनमिति। इत्थञ्च संयमशिक्षया ब्रह्मचर्य्य-व्रतसिद्धि-रपि भवति द्वितीयो लाभः, शारीरिकावयवपरिपुष्टिरायुर्वृद्धिः स्यात्।

भगिनी, इयं मम माता, इति भावो मनसि यत्र विद्यते तस्मिन् मनसि कथम् मनसिजस्य उद्रेको भवेदिति तात्पर्य्यम्। नैव कामोद्भेदस्तत्र स्यादिति भावः।

१—स्वभार्य्यया सह पत्युः स्वपतिना सह भार्य्यायाश्च संयोगे मुहूर्त विचारः–त्रिविधं–१–नाक्षत्रं २–लग्नगं ३–तिथिगम् इति गण्डान्तम्। निधनभं वधनामकं सप्तमं तारकम्। जन्म नक्षत्रं- मूलं भरणी अश्विनी रेवती मघा ग्रहणदिनानि व्यतिपातं वैधृतिश्च योगं मातुः पितुश्च श्राद्धदिनं–इत्यादि स्वय-मूहनीयम्—२—रजोदर्शने प्रथमतश्चतस्त्रो रात्रयो वर्ज्याः। तिस्र उत्तरा मृगशिराः अनुराधा रोहिणी स्वाती श्रवणम् धनिष्ठा शतभिषेति नक्षत्राणि ३–१, ४, ७, १०, ६, ५ स्थानगेषु शुभग्रहेषु। ३' ११ः ६ स्थानगेषु पापग्रहेषु। अब्जे चन्द्रे। अन्यत् स्पष्टम्।

निरामयाश्च जना भूयासुः। सर्वं विशदमायुर्वेद-शास्त्रेषु वर्णितमस्त्येव ततो हि बुधैरवगन्तव्यम्।

मया क्षेत्रसंगोपिकाक्रान्तिकर्त्री प्रभृत्यार्य्यनारीमहत्वेन साकम्।
निबद्धं कियत्कृत्यमावश्यकं यत् प्रशील्यं सदैवेह तुर्ये प्रबोधे॥

वीराङ्गना-वैभव-पुस्तकेऽस्मिन्नारीनराभ्युन्नतिसाधकेऽद्धा।
गोपालशास्त्रिप्रणयप्रणद्धे तुर्यप्रबोधोऽयमगात्समाप्तिम्॥

शक्ति-प्रधाना किल सृष्टिरेषिका,
सिद्धान्त एष स्तुत आगमान्तिमः।
अतः स्वतन्त्रे खलु भारतेऽधुना
सम्मानयोग्या महिलाऽदिशक्तिका॥

वीराङ्गनावैभव-पुस्तिकैषिका सतीमहिम्नां महिता-निदर्शिका।
समर्पिताऽध्यायिविमर्श-शक्तये वीराङ्गना-वैभव-वृद्धिमानयेत्॥

इति श्री म० म० पण्डितराज-श्रीगोपालशास्त्रि-
दर्शनकेशरि-विरचिते वीराङ्गनावैभवे
चतुर्थः प्रबोधः समाप्तः।
समाप्तश्चायं ग्रन्थः

—:*:—

मूल्यम्